शास्त्रसंदेश-४४

# स्तोत्रसंदेशमाला

## पू.आचार्यादियोग्यमन्त्रस्तोत्राणि

१८





मुनि विनयरक्षितविजयजी म.सा.

शास्त्रसंदेश-४४

# स्तोत्र संदेशमाला-१८

## पू.आचार्यादियोग्यमन्त्रस्तोत्राणि


: સંપાદક - સંકલન :

પ.પૂ.આચાર્ય ભ.શ્રીમદ્

વિજય રામચન્દ્રસૂરીશ્વરજીના સામ્રાજ્યવર્તી

પૂ.આ.શ્રી બોધિરત્નસૂરીશ્વરજી મ.સા.ના

શિષ્યરત્ન

પૂ.મુ.શ્રી વિનયરક્ષિતવિજયજી મ.સા.



પ્રકાશક-પ્રાપ્તિ સ્થાન

**શાસ્ત્રસંદેશ**

C/o અસલ, ૩, મણિભદ્ર એપાર્ટમેન્ટ,

આરાધના ભવન માર્ગ, સુભાષચોક, ગોપીપુરા-સુરત-૧

# સ્તોત્ર સંદેશમાલા-૧૮

## पू.आचार्यादियोग्यमन्त्रस्तोत्राणि

આવૃત્તિ : પ્રથમ, વિ.સં. ૨૦૭૮, મૌન એકાદશી,
તા. ૧૪-૧૨-૨૦૨૧

પેજ : ૧૨ + ૨૯૬ + ૪

સ્તોત્ર : ૫૦ શ્લોક : ૨૬૪૬

: પ્રમાર્જના :

પૂ.આ.શ્રી **દીવ્યકીર્તિસૂરિશ્વરજી** મ.સા.

પૂ.પં.શ્રી **શ્રુતતિલકવિજયજીગણી**

પૂ.મુ.શ્રી **હિતરક્ષિતવિજયજી** મ.સા.

ટાઈપ સેટીંગ : શ્રી સાંઈ કોમ્પ્યુટર્સ-નિતિનભાઈ, અમદાવાદ.

મુદ્રક : બાલારામ ઓફસેટ-અમદાવાદ.

વિશેષ નોંધ : સ્તોત્ર સંદેશમાલાના ૨૦ ભાગનું સંપૂર્ણ પ્રકાશન જ્ઞાનદ્રવ્યના વ્યયથી કરવામાં આવેલ છે. ગૃહસ્થવર્ગે મૂલ્ય આપી ઉપયોગ કરવો.

આભાર...!　　　અનુમોદનીય...!　　અનુકરણીય...!

## સ્તોત્ર સંદેશમાલાના
## ભાગ ૧૭-૧૮ ના
## દ્રવ્ય લાભાર્થી



## શ્રી શીતલનાથ જૈન શ્વે. મૂ.તપા. સંઘ
## ધનજીવાડી મલાડ (પૂર્વ)

*આપશ્રીએ જ્ઞાનદ્રવ્યથી કરેલ શ્રુતભક્તિની*
*શાસ્ત્રસંદેશ ભૂરિ ભૂરિ*
*અનુમોદના કરે છે.*
*ટ્રસ્ટીગણ ના અમો*
*આભારી છીએ.*

*શાસ્ત્રસંદેશ, સુરત*





*સ્તોત્ર સંદેશમાલાના ૨૦ ભાગમાં નીચે જણાવેલ પુસ્તકોનો સંપૂર્ણ સમાવેશ કરવામાં આવેલ છે. તેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.*

(૧) જૈન સ્તોત્ર સંચય-૧, ૨, ૩ - આ. માણિક્યસાગરસૂરિ
(૨) જૈન સ્તોત્ર સંચય-૪, ૫ - મુનિ લાભસાગરગણિ
(૩) જૈન સ્તોત્રાવલી - મુનિ લાભસાગરગણિ
(૪) જૈન સ્તોત્ર સંગ્રહ ભાગ-૧,૨ - મુનિ ચતુરવિજયજી
(૫) સ્તોત્ર સમુચ્ચય-મુનિ ચતુરવિજયજી
(૬) શ્રી જૈન સ્તોત્ર સંગ્રહ ભાગ-૧,૨ - યશોવિજય જૈન ગ્રંથમાળા, બનારસ
(૭) શ્રી સ્તોત્ર રત્નાકર ભાગ ૧,૨ - યશોવિજય જૈન સંસ્કૃત પાઠશાળા, મહેસાણા
(૮) સ્વાધ્યાય દોહન - આ. કનકચન્દ્રસૂરિ
(૯) શ્રી નેમિનાથ સ્તોત્ર સંગ્રહ-મુનિ તીર્થભદ્ર વિ.ગણિ
(૧૦) સ્તોત્ર સંગ્રહ - મુનિ વૈરાગ્યરતિ વિ.ગણિ.
(૧૧) બૃહદ્-નિર્ગ્રન્થ-સ્તુતિ મણિમંજુષા-મધુસૂદન ઢાંકી - જિતેન્દ્ર શાહ
(૧૨) સંસ્કૃત પ્રાચીન સ્તવન સંદોહ-મુનિ વિશાલવિજયજી
(૧૩) વિવિધ તીર્થકલ્પ - મુનિ જિનવિજયજી
(૧૪) શ્રી જૈનસ્તોત્રકોશ - મુનિ ચંદ્રોદયવિજયજી સૂર્યોદયવિજયજી
(૧૪) શાસન પ્રભાવક આ. જિનપ્રભસૂરિ ઔર ઉનકા સાહિત્ય
(૧૫) અનુસંધાન ભાગ ૧ થી ૮૫ - આ. શીલચન્દ્રસૂરિ
*(દરેક ભાગમાં આવતા પ્રાચીન અપ્રકાશિત સ્તોત્રો)*

**સ્તોત્ર સંદેશમાલાના આ ૨૦ ભાગમાં નીચે જણાવેલ પુસ્તકોમાંથી અમુક સ્તોત્રો લીધેલા છે. તેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.**

(૧) વિવિધ કલ્પ સંગ્રહ
(૨) નમસ્કાર સ્વાધ્યાય ભાગ ૧,૨, ૩
(૩) સરસ્વતી પ્રાસાદ
(૪) કાવ્ય સંગ્રહ ભાગ ૧,૨
(૫) વર્ધમાન વિદ્યાકલ્પ
(૬) વિધિ માર્ગપ્રપા
(૭) શ્રી વલ્લભીય લઘુકૃતિ સમુચ્ચય
(૮) સમયસુન્દર કૃતિ કુસુમાંજલી
(૯) ચતુર્વિંશતિ જિનેન્દ્ર સ્તવનાવલિ
(૧૦) શ્રી જિનવલ્લભસૂરિ ગ્રંથાવલિ
(૧૧) યુગાદિવંદના
(૧૨) શ્રી અજીતનાથ વંદનાવલી
(૧૩) શ્રી સંભવનાથ વંદનાવલી
(૧૪) શ્રી પ્રકરણ રત્નાકર ભાગ-૨
(૧૫) મહાકવિ શ્રી જયશેખરસૂરિ ભાગ-૨

(૧૬) શ્રી પાર્શ્વનાથ ઉપાસના

(૧૭) મહાપ્રભાવિક નવસ્મરણ

(૧૮) ભૈરવ પદ્માવતી કલ્પ

(૧૯) તુલસીપ્રજ્ઞા (પાર્શ્વ સ્તુતિ સંગ્રહ)

(૨૦) ધર્મવર્દ્ધન ગ્રન્થાવલી

(૨૧) બૃહત્ હ્રીંકારકલ્પ વિવરણ તથા વર્ધમાન વિદ્યા કલ્પ

(૨૨) શ્રી ઋષભ-વીરેશાદિ ચતુર્વિંશતિ જિન સ્તવનાવલી

(૨૩) મન્ત્ર કલ્પ સંગ્રહ

(૨૪) શ્રી જિનેન્દ્ર નમસ્કારાદિ સંગ્રહ

(૨૫) ગિરનાર ગ્રંથોની ગોદમાં

(૨૬) સૂરિમન્ત્ર સમુચ્ચય ભાગ-૧/૨

(૨૭) શ્રી જીરાવલા સ્તોત્રાદિ સંગ્રહ

(૨૮) સમ્બોધિ (ઈ.સ. ૨૦૧૪ સુધીના)

(૨૯) નિશ્રેયસમ્ ભાગ ૧ થી ૧૧

(૩૦) શ્રુતસાગર - કોબા

---

***આ સિવાયના પણ અનેક પુસ્તકોમાંથી સ્તોત્રો એકત્રિત કરવામાં આવેલ છે તે સર્વેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.***

---

*સ્તોત્ર સંદેશમાલાના આ ૨૦ ભાગમાં એકત્રિત કરેલ સ્તોત્રોના પુસ્તકો માટે નીચે જણાવેલ જ્ઞાનભંડારોનો વિશેષ સહકાર મળેલ છે. તેના ટ્રસ્ટીગણ અને કાર્યકરોના અમો આભારી છીએ.*

(૧) વિજયરામચન્દ્રસૂરીશ્વરજી આરાધના ભવન
ગોપીપુરા-સુરત

(૨) વિજય દાનસૂરીશ્વરજી જૈન જ્ઞાનભંડાર
ચંદનબાળા- મુંબઈ-૭

(૩) શ્રી રત્નત્રયી આરાધના ભવન - પાલડી - અમદાવાદ

(૪) શ્રી કૈલાસસાગરસૂરિ જ્ઞાનમંદિર - કોબા - અમદાવાદ

(૫) શ્રી ગીતાર્થ ગંગા- પાલડી - અમદાવાદ

(૬) શ્રી નેમિ-નંદન શતાબ્દિ ટ્રસ્ટ - પાલડી-અમદાવાદ

(૭) શ્રી શ્રુતઆનંદ ટ્રસ્ટ -પાલડી - અમદાવાદ

(૮) આ.શ્રી ૐકારસૂરિ જ્ઞાનમંદિર - સુરત

(૯) શ્રી હરિભદ્રસૂરિ શાસ્ત્રસંગ્રહ - સુરત

# પ્રકાશકીય...!

પૂર્વના પુણ્યવંતા મહાપુરુષોએ પ્રરૂપેલા પ્રકરણોની એક ગ્રંથમાળા એટલે શાસ્ત્રસંદેશમાલા, આજથી ૧૬ વર્ષ પૂર્વે ૪૦૬ પ્રકરણો ગ્રંથો ૨૦ ભાગમાં પ્રકાશિત કરેલ તે પછી ૧૧ વર્ષે પૂર્વે ૧૩૭ પ્રકરણ ગ્રંથો ચાર ભાગમાં તથા ૬૨૬ ગ્રંથોના ૧,૭૭,૦૦૦ શ્લોકો સમાવતા અકારાદિના ચાર ભાગ અને સંવેગરંગશાળા નામનો મહાનગ્રંથ પ્રકાશિત કરેલ અને આજે ૮૦ પ્રકરણ ગ્રંથો બે ભાગમાં પ્રકાશિત થઈ રહ્યા છે. એટલે આજ સુધીમાં ૬૨૩ પ્રકરણ ગ્રંથોના ટોટલ ૨૬ ભાગ અને અકારાદિ ચાર ભાગમાં સમાવિષ્ટ કરી પ્રકાશન કરવાનો લાભ અમોને મળેલ છે.

પ્રકરણોની સાથે સાથે પૂજ્યશ્રી સ્તોત્રો-સ્તુતિઓ પણ સંગ્રહિત કરી રહ્યા હતા તે પણ આજે ૨૨૦૦ થી અધિક સ્તોત્રો અને ૨૦૦૦ થી અધિક સ્તુતિઓના ૨૦ ભાગ અમો પ્રકાશિત કરી રહ્યા છીએ.

જૈનશાસનમાં આજ સુધીમાં પ્રકાશિત થઈ બહાર પડેલ પ્રકરણ ગ્રંથો અને સ્તોત્રો-સ્તુતિઓ જે અલગ અલગ હતા તે બધા જ આજે હવે એક સાથે મળી રહેશે. આ

દ્વારા શ્રી ચતુર્વિધ સંઘની સેવાનો લાભ અમોને મળેલ છે તે માટે અમો ધન્યતા અનુભવીએ છીએ.

સંખ્યાની દૃષ્ટિએ અધધ... થઈ જાય તેવા ૬૨૩ પ્રકરણ ગ્રંથો ૬૨૬ + ૮૦ ગ્રંથોની અકારાદિ, ૨૨૦૦ થી અધિક સ્તોત્રો અને ૨૦૦૦ થી અધિક સ્તુતિઓ પૂજ્યશ્રીએ સંકલન-સંપાદન કરી આપ્યા તે માટે અમો તેઓશ્રીના આભારી છીએ.

પૂર્વની જેમ આ ૨૦ + ૨ પુસ્તકો માટે પણ અલગ-અલગ સંઘોએ પોતાના જ્ઞાનદ્રવ્યમાંથી લાભ લીધેલ છે તે માટે પણ અમો તે તે સંઘ + ટ્રસ્ટીઓ + કાર્યકરોના પણ આભારી છીએ.

ટાઈપ સેટીંગ શ્રી સાંઈ કોમ્પ્યુટર્સવાળા નિતિનભાઈ તથા પ્રીન્ટીંગ બાઈન્ડીંગનું કાર્ય બાલારામ ઓફસેટવાળા રીતેશભાઈએ વિશેષ ખંત-કાળજીપૂર્વક કરી આપેલ છે.

**-શાસ્ત્રસંદેશ**

# अनुक्रमणिका



| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| १ | प्रणम्य श्रीमहावीरं विद्यारत्न- | पू.आ. श्री भद्रगुप्तसूरि | १ |
| २ | नत्वा जिनं गुरुं किञ्चिद् ज्ञानं | पू.आ. श्री सिंहतिलकसूरि | १९ |
| ३ | श्रीवीरजिनं नत्वा वक्ष्ये | पू.आ. श्री सिंहतिलकसूरि | ८४ |
| ४ | नत्वा विबुधचन्द्रार्च्यं | पू.आ. श्री सिंहतिलकसूरि | ९२ |
| ५ | श्रीवर्द्धमानमीशं ध्यात्वा | पू.आ.श्री सिंहतिलकसूरि | १०५ |
| ६ | श्रीवीरजिनं नत्वोपाध्याय- | पू.आ.श्री सिंहतिलकसूरि | १०८ |
| ७ | श्रीवीरजिनं नत्वा यशोदेवं | पू.आ. श्री सिंहतिलकसूरि | ११८ |
| ८ | वक्ष्याम्यथानुषङ्गात् प्रणव- | पू.आ. श्री सिंहतिलकसूरि | १३२ |
| ९ | जयश्रियं श्रीजिनशासनस्य | पू.आ.श्री मुनिसुन्दरसूरि | १३४ |
| १० | जयश्रियं शासनमार्हतं | पू.आ.श्री मुनिसुन्दरसूरि | १३५ |
| ११ | श्रीमत्पार्श्वं जिनं नत्वा तथा | पू.आ.श्री मेरुतुङ्गसूरि | १३६ |
| १२ | शुचिर्भूत्वाऽल्पनीरेण त्रिसन्ध्यं | पू.आ.श्री मेरुतुङ्गसूरि | १३८ |
| १३ | श्री[मद्]वीरजिनं नत्वा स्मृत्वा | पू.आ.श्री कमलाकरसूरि | १४४ |
| १४ | गौतमस्वामिमन्त्रोऽयं सम्य- | श्रीदेवाचार्यगच्छीयसूरिशिष्य | १४६ |
| १५ | प्रणम्य तत्त्वकर्तारं महावीरं | पू.आ. श्री जयसिंहसूरि | १४७ |
| १६ | मायाबीजबृहत्कल्पात्, | पू.आ.श्री जिनप्रभसूरि | १४९ |
| १७ | आद्यन्तवर्णप्रविवृद्धशोभं | पू.आ. श्री विद्याभूषणसूरि | १५२ |
| १८ | योगोपदेशदैवतसकलीकरणो- | | १६१ |
| १९ | ॐ ह्रीँ श्रीँ अर्हं अर्हद्भ्यो | पू. आ. श्री कमलप्रभसूरि | १६६ |

| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| २० | प्रणवस्त्वं ! परब्रह्मन् ! | पू.आ. श्री समन्तभद्रसूरि | १६९ |
| २१ | विलसंत जोइबीए परमिट्ठीणं | पू.आ. श्री चक्रेश्वरसूरि | १७० |
| २२ | स्वात्मस्थितः सर्वगतः | महाकवि धनञ्जय | १७२ |
| २३ | कल्याणाङ्कुरवारिदः | पू.आ.श्री सागरचन्द्रसूरि | १७६ |
| २४ | अष्टदलपद्मकोशे श्रीमत्पार्श्वं | | २३४ |
| २५ | मन्त्राधिराजाक्षरवर्णयुक्ति- | | २३७ |
| २६ | सर्वातिशयसम्पूर्णान् ध्यात्वा | | २३८ |
| २७ | चतुर्दश्यामथाष्टम्यां कृतो- | | २४० |
| २८ | रोगशोकादिभिर्दोषै, रजिताय | | २४२ |
| २९ | श्रीजिनं भक्तितो नत्वा, | | २४३ |
| ३० | पद्मोद्बोधविधात्म(य) कात्म- | | २४५ |
| ३१ | श्वेतं रक्तं तथा पीतं, नीलं | | २४९ |
| ३२ | सवर्णपार्श्वं लयमध्यसिद्ध- | | २५१ |
| ३३ | ह्रौँकारस्य किं तत्त्वं, वदे | | २५३ |
| ३४ | सिरिरिसहेसर अजीयजिण, | | २५६ |
| ३५ | जगद्गुरुं नमस्कृत्य श्रुत्वा | पू.आ.श्री भद्रबाहुस्वामी | २५७ |
| ३६ | शान्ति शान्तिनिशान्तं, शान्तं | पू.आ.श्री मानदेवसूरि | २५८ |
| ३७ | भो भो भव्याः ! शृणुत वचनं | | २६० |
| ३८ | अरिहंते णमिऊणं सिद्धे | पू.आ.श्री उद्योतनसूरि | २६५ |
| ३९ | सिरिसूरिमंतपवरे जे सिद्धा | पू.आ.श्री मानदेवसूरि | २६७ |

| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| ४० | पवयणपडिवक्खाणं, सरिऊण | पू.आ.श्री मुनिसुन्दरसूरि | २६९ |
| ४१ | तिजय-पहुत्त-पयासय, अट्ठ- | | २७१ |
| ४२ | पणमिय सिरिसंतिजिणं | पू.आ.श्री नन्नसूरि | २७३ |
| ४३ | आनन्दोल्लासनमत्त्रिदशपति- | | २७४ |
| ४४ | आसि किलट्ठुत्तरसय-पय- | पू.आ.श्री जिनप्रभसूरि | २७५ |
| ४५ | उत्तत्तकणयवन्नं झाणं धरिऊण | पू.आ. श्री पूर्णचन्द्रसूरि | २७७ |
| ४६ | पणमह लच्छिनिवासं, धरणिंद- | | २७८ |
| ४७ | नमिऊण सयलतिहुयणदुरि- | पू.मु.श्री देवभद्रगणि | २८१ |
| ४८ | पढमपए सुनिविट्ठा विज्जाए | | २८८ |
| ४९ | एयाए विज्जाए हिअयनिहि- | | २९० |
| ५० | अरहओ नमो भगवओ | | २९६ |

पू.आ. श्रीभद्रगुप्ताचार्यविरचिता

# १. ॥ अनुभवसिद्धमन्त्रद्वात्रिंशिका ॥

## प्रथमोऽधिकारः ।

प्रणम्य श्रीमहावीरं विद्यारत्नमहानिधिम् ।
मन्त्रद्वात्रिंशिकां वक्ष्ये सर्वकार्यप्रसाधिकाम् ॥ १

स्तम्भनं मोहमुच्चाटं वश्याकर्षण-जृम्भनम् ।
विद्वेषणं मारणं च शान्तिकं पौष्टिकं तथा ॥ २

मुक्तिमार्गं च शास्त्रेऽत्र भणिष्यामि यथाविधि ।
एकाग्रीभूय भो भव्याः ! श्रूयतां भक्तिपूर्वकम् ॥ ३

'सर्वज्ञाभं' महामन्त्रं सर्वकल्याणकारणम् ।
सर्वकर्मकरं चैव साधयेच्च यथाविधि ॥ ४

ब्रह्म-त्रिलोक-कमला अकारो नभसोऽक्षरम् ।
रेफ-बिन्दु-कलाक्रान्तं नमश्च मन्त्र उच्यते ॥ ५

पीतं स्तम्भेऽरुणं वश्ये क्षोभणे विद्रुमप्रभम् ।
कृष्णं विद्वेषणे ध्यायेत् कर्मघाते शशिप्रभम् ॥ ६

द्वादशसहस्रजापो दशांशहोमेन सिद्धिमुपयाति ।
मन्त्रो गुरुप्रसादाद् ज्ञातव्यस्त्रिभुवने सारः ॥ ७

'विद्याप्रवाद' पूर्वस्य तृतीयप्राभृतादयम् ।
उद्धृतः कर्मघाताय श्रीवैरस्वामिसूरिभिः ॥ ८

नासाग्रे प्रणवं शून्यमनाहतमिति त्रयम् ।
ध्यायन् गुणाष्टकं लब्ध्वा ज्ञानमाप्नोति निर्मलम् ॥ ९

शङ्ख-कुन्द-शशाङ्काभांस्त्रीनमून् ध्यायतः सदा ।
समग्रविषयज्ञानप्रागल्भ्यं जायते नृणाम् ॥ १०

द्विपार्श्वप्रणवद्वन्द्वं प्रान्तयोर्मायया॒ऽऽवृतम् ।
सोऽहं मध्येऽधिमूर्धानम् अर्हँकारं विचिन्तयेत् ॥ ११

कामधेनुमिवाचिन्त्यफलसम्पादनक्षमाम् ।
अनवद्यां जपेद् विद्यां गणभृद्वदनोद्गताम् ॥ १२

षट्कोणेऽप्रतिचक्रे फडिति प्रत्येकमक्षरम् ।
सव्ये न्यसेद् विचक्राय स्वाहा बाह्येऽपसव्यतः ॥ १३

भूतान्तं बिन्दुसंयुक्तं तन्मध्ये न्यस्य चिन्तयेत् ।
'नमो जिणाणं' इत्याद्यैरोँपूर्वैर्वेष्टयेद् बहिः ॥ १४

कर्मदावहुताशस्य प्रशान्तिनववारिदम् ।
गुरूपदेशाद् विज्ञाय 'सिद्धचक्रं' विचिन्तयेत् ॥ १५

चीर्णैरपि चिरं कालं तपोभिरमलैः सदा ।
कथञ्चित् प्राप्यते पुम्भिः महामन्त्रो महागुणः ॥ १६

अनाख्येयमसाधूनां साधूनामपि यत्नतः ।
कथ्यमेकान्तदेशेषु मन्त्रस्यास्य स्वरूपकम् ॥ १७

मूलमन्त्रोऽपि व्याख्येयो महागुणविवर्धनः ।
येन विज्ञातमात्रेण सम्पदः सर्वतोमुखाः ॥ १८

त्रिभुवनस्वामिनीं विद्यां त्रिभुवनस्वामितास्पदम् ।
विद्यां स्मरत हे धीराः ! यद्यक्षयसुखेच्छवः ॥ १९

लक्षैकस्य प्रजापेन प्रसूनैर्जातिसम्भवैः ।
दशांशहोमतो याति सिद्धिं विद्या प्रसाधिता ॥ २०

इत्याचार्यश्रीभद्रगुप्तविरचितायामनुभवसिद्धमन्त्रद्वात्रिंशिकायां
सर्वकर्मकरमन्त्राष्टकवर्णनो नाम प्रथमोऽधिकारः ॥ १

## द्वितीयोऽधिकारः ।

अथातः सम्प्रवक्ष्यामि वश्याकर्षणमुत्तमम् ।
येन विज्ञातमात्रेण सुखं सम्पद्यतेऽद्भुतम् ॥ १

प्रणवमायया युक्तं कमलायुतमेव च ।
कलिकुण्डयुतं चापि स्वामिने वशमानय ॥ २

पुनरानय स्वाहेति मन्त्रः पार्श्वजिनाग्रतः ।
त्रिरात्रं साधितः पुष्पैरयुतेन 'वशंवदः' ॥ ३

प्रणवं कामबीजं च मायाबीजं तथैव च ।
अधोरेफयुतं शून्यं वाग्बीजेन प्रसंयुतम् ॥ ४

माया-वाग्भवबीजेन सहिता मायया पुनः ।
शून्यं रेफेण संयुक्तं सपार्श्वं सविसर्गकम् ॥ ५

श्रीअपराजितदेव्या मन्त्रोऽयमपराजितः ।
लक्षत्रितयजापेन सिद्धिं याति सुनिश्चितम् ॥ ६

पिण्डाकृष्टिं फलाकृष्टिं द्रव्याकृष्टिं च कामिताम् ।
वस्त्राद्याकर्षणं सर्वं कुरुते नात्र संशयः ॥ ७

वश्या भवन्ति कामिन्यो भ्रश्यत्परिहिताम्बराः ।
आजन्मदास्यभावं च भजन्ते नात्र संशयः ॥ ८

यद् यत् कामयते सर्वं तत् सद्यस्तस्य जायते ।
मन्त्रराजप्रसादेन फलमस्य न संशयः ॥ ९

प्रणवं पार्श्वनाथाय मायाबीजं तथैव च ।
एवं लक्षप्रजापेन मन्त्रोऽयं सिध्यति स्फुटम् ॥ १०

नारीणां पुरुषाणां च भूपतीनां विशेषतः ।
आराध्यमानो यत्नेन दशाहेन वशङ्करः ॥ ११

सहस्रमेकं यत्नेन दशाहं प्रतिवासरम् ।
पदभ्रष्टो जपेद् यस्तु स सद्यो लभते पदम् ॥ १२

वाञ्छितानि च जन्तूनां फलान्यस्य प्रभावतः ।
कल्पद्रोरिव जायन्ते नानारूपाणि नित्यशः ॥ १३

पाशं पाशयुतं शून्यं विषघ्नं मङ्गलं तथा ।
कल्याणं चेति मन्त्रोऽयं पार्श्वयक्षाभिधानतः ॥ १४

देयोऽयं भक्तियुक्ताय सूर्य-चन्द्रोपरागयोः ।
दीपोत्सवेऽथवा मन्त्रो रहस्सु गुरुपूजया ॥ १५

तेनापि भक्तियुक्तेन शुद्धचित्तेन सन्ततम् ।
माया-मोहवियुक्तेन क्रोध-लोभ-मदोज्झिना ॥ १६

सत्यवाक्यप्रधानेन गुरुपादोपसर्पिणा ।
एकभक्तोषितेनैव ब्रह्मचर्यविधायिना ॥ १७

सहस्रैकस्य जापेन षण्मासान् प्रतिवासरम् ।
श्रीमत्पार्श्वजिनेन्द्रस्य गुरोः पूजापुरस्सरम् ॥ १८

ध्यातव्यः सुधिया नित्यं मन्त्रोऽयममरार्चितः ।
सिद्धिं याति ततस्तस्य महासत्त्वशिरोमणेः ॥ १९

यस्यायं सिद्ध्यते मन्त्रो वशे तस्य वसुन्धरा ।
सद्यो भवति मर्त्यस्य कर्तव्यो नात्र संशयः ॥ २०

द्वारे तस्य च गर्जन्ति शैलोत्तुङ्गशरीरकाः ।
मुहुःस्रवन्मदासारसिक्तोर्वीका मतङ्गजाः ॥ २१

हेषन्ति च हया द्वारे वेगनिर्जितवायवः ।
प्रणतिं यान्ति पादान्तं तस्य स्फारितभक्तिकम् ॥ २२

पादपीठलुठन्मूर्धमुकुटकोटितटोत्कराः ।
पादयोस्तस्य भूपाला लुठन्ति बहुमानिनः ॥ २३

न दोषान् कोऽपि गृह्णाति गुणान् सर्वोऽपि भाषते ।
तस्य सौभाग्ययुक्तस्य यस्य तुष्टो जिनेश्वरः ॥ २४

ब्रह्म-त्रिलोक-कमला मूलबीजत्रयं ततः ।
कलिकुण्डलदण्डाय ह्रीँ नमश्चाक्षराणि च ॥ २५

रविसङ्ख्यसहस्राणि प्रसूनैर्जातिसंभवैः ।
पयःपूर्णालुकामध्ये जापं कुर्याज्जिनाग्रतः ॥ २६

सिद्धिं याति ततो मन्त्रः पार्श्वस्यैव प्रभावतः ।
कामदो मोक्षदश्चापि भक्तिभाजां शरीरिणाम् ॥ २७

रक्षो-यक्षोरग-व्याघ्र-व्यालानल-गरादयः ।
नापकर्तुमलं तेभ्यो ये चास्य शरणं गताः ॥ २८

वह्नि-व्याधि-पयोनिधि-हरि-करि-फणि-चौर-संयुगादीनाम् ।
भयमखिलमस्य संस्मृतिमात्रादपि देहिनां व्रजति ॥ २९

व्यन्तर-विष-विषमज्वर-दुष्टग्रह-शाकिनीप्रमुखदोषाः ।
दूरे तस्य वहन्ते यस्यायं भवति हृदयस्थः ॥ ३०

सद्यो दासति कर्षितकरालकरवालकोपितः शत्रुः ।
श्रीपार्श्वनाथमुच्चैरुच्चरतां देहिनां नित्यम् ॥ ३१

निन्दू-विरूप-वन्ध्या-शल्यवती-दुर्भगादिदोषत्वम् ।
भजते न जातु जिनवरमन्त्रपरायणो जन्तुः ॥ ३२

कीर्तिः कमला रमणी राज्यं सौभाग्यमाशु सौख्यानि ।
मन्त्रे लब्धेऽप्यस्मिन्निह जन्तोः सपदि जायन्ते ॥ ३३

तममररमणीनिकरः सरभसमभिसरति दिव्यविश्रान्तम् ।
लावण्यसिन्धुगाहनगिरिराजे यस्य चेतसो वृत्तिः ॥ ३४

येषां परब्रह्मणि मन्त्रेऽस्मिन् परममानसी प्रीतिः ।
ते हन्त ! साभिलाषं वीक्ष्यन्ते मुक्तिकामिन्या ॥ ३५

वाग्भवं कामबीजं च सान्तं षान्तेन संयुतम् ।
ॐकारेण युतं यापि मन्त्रं 'वश्यकरं' परम् ॥ ३६

ऊर्ध्वाधोरेफसंयुक्तं षष्ठमस्वरभूषितम् ।
नाद-बिन्दु-कलाक्रान्तं साध्यनामैकगर्भितम् ॥ ३७

तद्बाह्येऽष्टदलं पद्मं कर्णिकाकोटिभूषितम् ।
तत्र चौँ पार्श्वनाथाय स्वाहेति पदमुल्लिखेत् ॥ ३८

स्वराः षोडश तद् बाह्ये हर-हरेति ततो बहिः ।
कादि-क्षान्तपदैः पश्चात् पूरयेत् सततं बहिः ॥ ३९

मायाबीजेन तद्बाह्ये रेखात्रितयवेष्टितम् ।
भूर्जपत्रे लिखेच्चक्रं सर्वसम्पत्तिकारणम् ॥ ४०

कर्पूरागरु-कस्तूरी-कुङ्कुमादिसुगन्धिभिः ।
विलेख्यं जातिलेखिन्याः शुभलग्ने शुभे दिने ॥ ४१

वेष्ट्यं कुमारसूत्रेण बाहौ बद्धं च देहिनाम् ।
सौभाग्यभाग्यमुख्यानि सौख्यानि कुरुते क्षणात् ॥ ४२

प्रणवं माययोपेतं कमलालङ्कृतसन्निधिम् ।
मायायुक्तं पुनर्नामगर्भितं कमलोदरे ॥ ४३

बहिरष्टदलाक्रान्तमायाबीजसमन्वितम् ।
बहिः प्रणव-ह्रीँकारपार्श्वनाथाय ह्रीँ नमः ॥ ४४

लिखित्वा पूजयेद् भूर्जे सुगन्धद्रव्ययोगतः ।
कन्यासूत्रेण संवेष्ट्य धारणीयं करादिषु ॥ ४५

भूतादिदोषविद्रावं योषितां गर्भसम्भवम् ।
सौभाग्यादिगुणाँश्चैवं यन्त्रमेतत् करोत्यहो ! ॥ ४६

प्रणवं परमं तत्त्वं मायाबीजविराजितम् ।
परमेष्ठिपदं चैव ह्रीँकारं च नमःपदम् ॥ ४७

त्रिसन्ध्यं विजने भूत्वा जातिपुष्पैरथोत्तमैः ।
अष्टोत्तरशतं जाप्यमस्य सर्वार्थसिद्धये ॥ ४८

इत्याकृष्टिं च वश्यादौ मन्त्राष्टकमुदीरितम् ।
श्रुताम्भोधिमवगाह्य रत्नोच्चयमिवोज्जलम् ॥ ४९

इत्याचार्यश्रीभद्रगुप्तविरचितायामनुभवसिद्धमन्त्रद्वात्रिंशिकायां
वश्याकृष्ट्यादिकर्मकरमन्त्राष्टकवर्णनो नाम
द्वितीयोऽधिकारः

## तृतीयोऽधिकारः ।

अथातः सम्प्रवक्ष्यामि स्तम्भ-स्तोभादिकं विधिम् ।
येन विज्ञातमात्रेण जगतो जय्यता भवेत् ॥ १

ऊर्ध्वाधोरेफयुक्तस्य कला-बिन्दुयुतस्य च ।
नामसंगर्भितस्याद्यो(ऽ)शून्यवर्णस्य संलिखेत् ॥ २

परमेष्ठिपञ्चबाह्ये सम्यग्ज्ञानं च दर्शनम् ।
चारित्रं च ततः स्वाहा ॐपूर्वकं ततः स्वरान् ॥ ३

वर्गाष्टकं च पत्रेषु सन्धौ तत्त्वाक्षराणि च ।
मायाद्यमङ्कुशे रुद्धं रेखात्रितयवेष्टितम् ॥ ४

भूमण्डलं ततः कृत्वा यथाविधि समन्वितम् ।
पट्टे पटे च भूर्जे वा द्रव्यैश्च गुलिकादिभिः ॥ ५

शरान् शक्रादिदेवानामपि स्तम्भनमुत्तमम् ।
भाराक्रान्तमिदं चक्रं कुरुते नात्र संशयः ॥ ६

एतदेव पटे भूर्जे कर्परे मृतकपटे ।
विलिख्य निखनेत् प्रेतवने सम्पुटमध्यगम् ॥ ७

तिल-तुष-राजी-लवणैर्मिश्रीकृत्यैकविंशतिदिनानि ।
अष्टशतमुभयकालं जपतां मन्त्रेण सिद्धसक्तेन ॥ ८

उच्चाटन-मारण-विद्वेषण-गुरुमोहमुख्यकर्माणि ।
मन ईप्सितानि जनानां जायन्ते सद्गुरुप्रसादात् ॥ ९

'ॐ उल्कामुखि ! अलामाक्षि ! विद्युज्जिह्वे ! महाबले ! ।
अमुकस्य ज्वरं सद्य आनयानय रौद्रके ! ॥ १०

द्विर्दह द्विः पचोच्चार्य स्वाहान्ते च ततः क्षिपेत् ।
एकभक्तं ततः कृत्वा सिद्धयेऽष्टशतं जपेत् ॥ ११

कृष्णाष्टम्यां चतुर्दश्यां चिताङ्गारं समाहरेत् ।
खरीमूत्रेण सकुथ्यारलुकद्रुमसम्पुटे ॥ १२

विलिख्येदं महामन्त्रमेकान्ते सम्पुटं क्षिपेत् ।
अष्टोत्तरशतं चास्य प्रजपेत् प्रतिवासरम् ॥ १३

यन्नाम लिखितं गर्भे जप्तं चोद्यमपूर्वकम् ।
तस्यानयेज्ज्वरं सद्यः सप्तास्यमपि तत्क्षणात् ॥ १४

न तच्छक्योऽपि संहर्तुं शक्नोति ज्वरमुत्थितम् ।
तदक्षराली नो यावत् क्षालिता पयसा किल ॥ १५

ॐ अमृतोद्भवे ! देवि ! वर्षय वर्षयामृतम् ।
इत्यादिकेन मन्त्रेण वह्निस्तोभो विधीयते ॥ १६

ॐकारमध्यसंस्थानं मायाबीजेन वेष्टितम् ।
अमुकं देवि ! कुरुकुल्ले ! कुरु स्वाहेति चोच्चरेत् ॥ १७

षट्कोणं यन्त्रमालिख्य मूलमन्त्रेण गर्भितम् ।
अष्टोत्तरशतं जप्त्वा ततः कर्म समाचरेत् ॥ १८

दुष्टकुष्ठं क्षयं याति क्षारनीरं पयायते ।
पुष्पमालायते व्यालः कुन्ताग्रं कुसुमायते ॥ १९

नीरपूरायते वह्निर्गरलं च सुधायते ।
माघमासायते ग्रीष्मो रविः शीतकरायते ॥ २०

नित्यैक-द्वित्रिसम्भूतज्वरो याति परिक्षयम् ।
कम्प-स्वेदादिका दोषा गच्छन्ति प्रलयं क्षणात् ॥ २१

आज्ञामात्रेण च क्षुद्रा वृश्चिकाद्यास्तनूभृतः ।
दूरे व्रजन्ति विद्याया एतस्याः सुप्रभावतः ॥ २२

ॐ उच्छिष्टपिशाचिनि ! देवि ! मही स्वाहेति कथ्यते ।
उच्छिष्टपिशाचिनी नाम विद्या सर्वज्ञभाषिता ॥ २३

मृण्मयीं पुत्रिकां कृत्वा जरत्क्रपरसूर्पिकाम् ।
एकान्ते स्थापयेत् तां च पूजयेच्च यथाविधि ॥ २४

त्रयोदश दिनान्युच्चैः पूजा-नैवेद्यपूर्वकम् ।
उच्छिष्टोच्छिष्टवेलायां जपद् वारांस्त्रयोदश ॥ २५

डुम्बिकायै प्रदातव्यं नैवेद्यं प्रतिवासरम् ।
चतुर्दशेऽह्नि सम्प्राप्ते मध्ये कृष्णघटं क्षिपेत् ॥ २६

रक्तपुष्पैश्च सम्पूज्य पुत्रिकां तां च मृण्मयीम् ।
यावता तैलपूरेण ब्रुडेत् तावत्प्रमाणकम् ॥ २७

कूपे सरसि नद्यां वा प्रवाहयेत् ततो घटम् ।
सिध्यत्येषा ततो विद्या महासत्त्वैकशालिनाम् ॥ २८

यद्येकदाऽपि पुरुषाणां साधयतां स्खलितं भवेत् ।
षण्मासान्ते ततो विद्यां पुनरेतां प्रजापयेत् ॥ २९

सिद्धा सतां च जन्तूनां ददाति प्रतिवासरम् ।
द्रम्मान् त्रयोदशैवैतान् पुनरन्यस्य नो वदेत् ॥ ३०

परमागमसंप्रोक्तं 'विश्वकम्पैकचेटकम्' ।
द्रम्माष्टकपदं सद्यः साधयेत् धैर्यसंयुतः ॥ ३१

ॐ चल चल प्रचल प्रचल विश्वं कम्पय कम्पय ।
वेलात्रयं च ठः ठः ठः स्वाहा विश्वं कम्प कम्पेति च ॥ ३२

श्रीपर्णीपट्टके मन्त्रं लिखित्वैनं महामतिः ।
जातिपुष्पैस्ततो जापं पञ्चायुतं प्रमाणकम् ॥ ३३

दशांशेन च होतव्यं त्रिमधुरेण संयुतम् ।
बदरप्रमाणगुटिकाभिर्महिषाख्यस्य च द्रुतम् ॥ ३४

कृष्णाष्टम्यां निशामध्ये नवम्यां भास्करोदये ।
अष्टोत्तरशतं रक्तपुष्पाणि प्रजपेत् ततः ॥ ३५

चेटकप्रतिमां कृत्वा चिताङ्गारेण मण्डले ।
हृदये साध्यनाम च लिखित्वा प्रजपेत् ततः ॥ ३६

निर्धूमाङ्गारसम्पूर्णं घटमाधाय होमयेत् ।
तान्येव पूर्वजप्तानि रक्तपुष्पाणि शक्तिमान् ॥ ३७

विद्वेषोच्चाटनं सद्यः कुरुते देहिनामयम् ।
कपिलाक्षश्चेटको ह्येवं जप्तः पठितसिद्धिदः ॥ ३८

ॐ नमो भगवत्यादौ शिवचक्रे च मालिनि ! ।
स्वाहापदं ततो देयं मन्त्रोऽयं लाभदो मतः ॥ ३९

श्वेतार्कस्य च मूलेन बिम्बं पार्श्वजिनेशितुः ।
विधाय च प्रतिष्ठाप्य मन्त्रेणानेन पूजयेत् ॥ ४०

यद् यद् विचिन्त्यते कार्यं मनुजैरिहलौकिकम् ।
तत् तत् संपद्यते सद्यो मन्त्रस्यास्य प्रभावतः ॥ ४१

राजद्वारे व्यवहारे विवादे धान्यसङ्ग्रहे ।
इत्येवमादिकार्येषु सर्वेष्वेनं विचिन्तयेत् ॥ ४२

इत्याचार्यश्रीभद्रगुप्तविरचितायामनुभवसिद्धमन्त्रद्वात्रिंशिकायां स्तम्भ-स्तोभादिकमन्त्राष्टकवर्णनो नाम तृतीयोऽधिकारः ॥

## चतुर्थोऽधिकारः ।

अथातः सम्प्रवक्ष्यामि शुभाशुभादिसूचकम् ।
मन्त्राष्टकमिदं रम्यं सद्यः प्रत्ययकारकम् ॥ १

प्रणवं मायया युक्तं ला ह्वा प ल क्ष्मिकान्वितम् ।
वायुशून्यावसानं च मन्त्रं मन्त्रविदो विदुः ॥ २

सहस्रदशकं जातीपुष्पैः पूर्वं प्रजप्य तु ।
पश्चाद् दशांशहोमेन सिद्धिरस्य विधीयते ॥ ३

कार्यकाले च सम्प्राप्ते विधायैकाशनं तपः ।
अष्टोत्तरशतं जप्त्वा स्वपेद् भूमौ व्रतस्थितः ॥ ४

लाभालाभं भविष्यन्तं शुभाशुभं जयाजयम् ।
जीवितं मरणं चैव सुभिक्षं क्षममेव च ॥ ५

वर्षावर्षं भयं भीतिवर्जितं सुखदासुखम् ।
लगित्वा कर्णयोर्देवी सर्वमाख्याति निश्चितम् ॥ ६

ॐ ह्रीँ ल्वाँ ह्वाँ प लक्ष्मीं झ्वीँ क्ष्वीँ च कुश्च हंसश्च ।
स्वाहाकारं ततो देयं मन्त्रोऽयं मुनिभाषितः ॥ ७

त्रयोदशसहस्राणि जातीपुष्पैश्च पूर्वतः ।
जापोऽस्य हि विधातव्यो महासत्त्वैकशालिभिः ॥ ८

तदनुत्तरसेवायां दशांशहोमतस्तथा ।
मन्त्रोऽयं साध्यतां नेयः संयमारामगामिभिः ॥ ९

विधिः पुनरयं चात्र मन्त्रस्यास्य प्रसाधने ।
स्नात्वा विलिप्य सर्वाङ्गं सदृशश्वेतवस्त्रभृत् ॥ १०

स्वयं चोपोषितो भूत्वा कन्याभोजनदायकः ।
कुमारी-गुरु-पूज्यानां वस्त्रदानपुरस्सरम् ॥ ११

श्रीमदम्बालिकादेव्या बिम्बमाधाय सद्भुवि ।
स्नानपूजादिकं कृत्वा तस्या एव पुरःस्थितः ॥ १२

विद्यामेतां महाभक्त्या संयताक्षो महामतिः ।
दिनत्रयेण संसाध्य केवलीव भवेन्नरः ॥ १३

यत् परैश्चिन्तितं कार्यं स्वयं वा चिन्तितं भवेत् ।
नष्टं वा निहितं चापि तच्चाज्ञातस्य नामकम् ॥ १४

अतीतं वर्तमानं वा भविष्यं वा तदर्थयेत् ।
ज्ञातुं मन्त्री तकं सर्वं कथयत्येष कर्णयोः ॥ १५

ॐ ह्रीँ ला ह्वा प लक्ष्मी च हंसः स्वाहा च विन्यसेत् ।
विश्वोपकारिणीं विद्यामेतां तत्त्वविदो विदुः ॥ १६

सहस्रदशकं जातीपुष्पैः पूर्वं प्रजप्यते ।
हूयते तु दशांशेन पश्चाद् विद्या प्रसिध्यति ॥ १७

आज्ञामात्रेण संसिद्धा करोत्येषा शरीरिणाम् ।
जङ्गमे स्थावरे चापि विषे वीर्यविनाशनम् ॥ १८

एतद् विद्यात्रयं भव्यजीवोपकृतिहेतवे ।
मयाऽऽगममहाम्भोधिमध्यादुद्धृत्य दर्शितम् ॥ १९

मिथ्यादृशां न दातव्यं दातव्यं सुदृशां पुनः ।
दातव्यं योग्यजीवानामयोग्यानां न दापयेत् ॥ २०

षान्तं ककारसंयुक्तं लकारं सान्तसंयुतम् ।
रेफ-स्वर-कलाक्रान्तं बिन्दूपेतं महाक्षरम् ॥ २१

इदमेवाक्षरं लक्षवारं रक्तप्रसूनकैः ।
जाड्यं हरति जन्तूनां जप्तं सज्ज्ञानमुद्रया ॥ २२

जप्तं करोति जन्तूनां वश्याकृष्टिमहोदयम् ।
इदमेवाक्षरं लक्षवारं रक्तप्रसूनकैः ॥ २३

गजा गोयोषितः क्षुद्रजन्तवो यान्ति वश्यताम् ।
एतद्बीजप्रभावेन साधकानामसंशयम् ॥ २४

विद्वद्वादिमहेभानां स्तम्भकुम्भविदारणे ।
एतदेव परं बीजं कण्ठीरवपदायते ॥ २५

ॐ ह्रीँ देवि ! नमस्तुभ्यमम्भोरुहनिभानने ।
नमन्नभश्चरीचूलामाणिक्यारुणितक्रमे ॥ २६

लक्षत्रयप्रजापेन जातीपुष्पैः प्रसिद्ध्यति ।
सरस्वती महादेवी दिव्या कमलवासिनी ॥ २७

गद्य-पद्यमयी वाणी गङ्गानीरानुकारिणी ।
निर्याति सततं तस्माद् यस्य तुष्टा सरस्वती ॥ २८

बन्धे बोधेऽपि तेषां चाविश्रान्तं जृम्भते मतिः ।
येषामेषा महादेवी वरदीभूतमानसा ॥ २९

प्रबन्धसेतुबन्धेन रामस्येव पताकिनी ।
तेषां प्रयाति सत्कीर्तिः पारं नीरपतेरपि ॥ ३०

ॐ वाग्बीजं च माया च कमला-कामवर्णकौ ।
सतत्त्वमादिवर्णाश्च नमोऽन्ताः सर्ववेदिनाम् ॥ ३१

एष लोके महामन्त्रः पञ्चानां परमेष्ठिनाम् ।
त्रिभुवनस्वामिनी नाम पुण्यलभ्या महात्मभिः ॥ ३२

लक्षजाप्यप्रदानेन दशांशेन च होमतः ।
सिद्धिं याति महामन्त्रो गुरुसत्त्वैकशालिनाम् ॥ ३३

मेघाकृष्टिं घटस्तम्भं प्रतिमाचालनं तथा ।
करोत्येष मनुष्याणां मनोवाञ्छितसिद्धिदः ॥ ३४

राज्यवश्यं देववश्यं वश्यं च सुरयोषिताम् ।
वश्याकर्षणदक्षोऽयं सर्ववश्यविधायकः ॥ ३५

ॐ ऐँ माययोपेतं पद्मा सतत्त्वकामदम् ।
ब्लूँ कलिकुण्डनाथाय सौँ ह्रीँ नम इत्यपि ॥ ३६

कलिकुण्डदण्डस्य मूलमन्त्रोऽयमुत्तमः ।
तपोभिरमलैर्लभ्योऽनुचीर्णैः पूर्वजन्मनि ॥ ३७

श्रीमत्पार्श्वजिनस्याग्रे यन्त्रमाधाय सद्विधि ।
जातीपुष्पैर्जपेल्लक्षं मन्त्रमेनं दशांशतः ॥ ३८

होमेन साधयेद् धीमान् सर्वकामफलप्रदम् ।
भक्तिभाजां विशेषेण शुभाशुभनिरूपकम् ॥ ३९

एकभुक्तोषितो भूत्वा यद्वा षण्मासकावधिः ।
अष्टोत्तरं शतं जाप्यं कुर्यादस्य दिने दिने ॥ ४०

भवद्-भूत-भविष्यानि सुख-दुःखानि देहिनाम् ।
सैकत्रावस्थितो वेत्ति योजनानां शतैरपि ॥ ४१

ब्रह्मचर्यभृतं पञ्च वर्षाणि ध्यायतः सतः ।
सद्ध्यानध्याननिष्ठस्य विकथारहितस्य च ॥ ४२

पलं पलं सुवर्णस्य ददात्येष्वनुवासरम् ।
व्यये तु तच्च कर्तव्यं न धर्तव्यं हि नान्तरे ॥ ४३

धृतेन हीयते सिद्धिः सिद्धिर्वर्धेत तद्व्ययात् ।
व्ययोऽत एव कर्तव्यः सत्पात्रादौ मनीषिभिः ॥ ४४

ॐ शून्यद्वयं षष्ठस्वराद्यं बिन्दुसंयुतम् ।
पुनः शून्यद्वयं ह्येकादशस्वरसमन्वितम् ॥ ४५

सप्तवर्गादिमं मन्त्रं षष्ठस्वरविराजितम् ।
बिन्दूपेतं च ह्रीँ हूँ फडिति वर्णविभूषितम् ॥ ४६

सर्वकर्मकरं मन्त्रं श्रीमत्पार्श्वजिनेशितुः ।
लक्षजापप्रदानेन साधयित्वा स्फुटं कुरु ॥ ४७

राजद्वारे व्यवहारे सभायां देशनाविधौ ।
विद्वद्विवादवेलायां परविद्यान्तकर्मणि ॥ ४८

वश्ये विद्वेषणे मोहे पापोच्चाटनकर्मणि ।
तीर्थप्रभावनादौ च रुष्टानयनकर्मणि ॥ ४९

एष एव महामन्त्रो महाकल्याणकारणम् ।
सर्वदा सर्वकार्येषु स्मरणीयो मनीषिभिः ॥ ५०

इत्याचार्यश्रीभद्रगुप्तविरचितायामनुभवसिद्धमन्त्रद्वात्रिंशिकायां शुभाशुभादिनिरूपणमन्त्राष्टकवर्णनो नाम चतुर्थोऽधिकारः ॥

## पञ्चमोऽधिकारः ।

अथातः सम्प्रवक्ष्यामि गुरु-शिष्यशुभाशुभम् ।
येन विज्ञातमात्रेण कल्याणं जायते द्वयोः ॥ १

गुरुणा ज्ञाततत्त्वेन सकलागमवेदिना ।
शशाङ्कशान्तचित्तेन क्षमागुणविराजिना ॥ २

पूर्वमात्महितं ज्ञात्वा सूरिणा गुणभूरिणा ।
शिष्यस्यापि हितं चिन्त्यं दातुकामेन किञ्चन ॥ ३

सिद्धं साध्यं च विज्ञेयं सुसिद्धं शत्रुरूपिणम् ।
मृत्युदं चैव निःशेषं मन्त्रं मन्त्रविदो विदुः ॥ ४

सिद्धं सारफलं ज्ञेयं दातव्यं भक्तिशालिने ।
साध्यं साध्यफलं चापि देयं तदपि सूरिणा ॥ ५

स्वल्पफलं सुसिद्धं सुमन्त्रो यच्छति देहिनाम् ।
सोऽपि कस्यापि दातव्यस्तद्धितस्य शरीरिणः ॥ ६

शत्रुरूपश्च शत्रुस्तु मृत्युदो मृत्युनामकः ।
नैव कस्यापि दातव्यौ परलोकफलार्थिभिः ॥ ७

अ इ उ ए ओ पञ्चैतान् स्वरान् कोष्ठकपञ्चके ।
कादिकान् हान्तवर्णांश्च ङ ढ णाक्षरवर्जितान् ॥ ८

वर्णक्रमेण संलिख्य मातृकाचक्रमुज्ज्वलम् ।
योग्यायोग्यं ततो विद्यान्मन्त्र-शिष्यद्वयोरपि ॥ ९

सिद्धं वा यदि वा साध्यं मन्त्रं प्राप्य दुरासदम् ।
शिष्येणापि विधातव्या सद्गुरोर्भक्तिरीदृशी ॥ १०

भोजनं वस्त्रदानं च पात्रदानं तथैव च ।
दानं सारसुवर्णस्य विधातव्यं मनीषिणा ॥ ११

पादप्रक्षालनं चैव पृष्ठिसंवाहनं तथा ।
स्वयमासनदानं च कर्तव्यं सद्गुरोरिह ॥ १२

दक्षो जितेन्द्रियो धीमान् कोपानलजलोपमः ।
सत्यवादी विलोभश्च मायामदविवर्जितः ॥ १३

मानत्यागी दयायुक्तः परनारीसहोदरः ।
जितेन्द्री गुरुभक्तश्च मन्त्रग्राही भवेन्नरः ॥ १४

सुलग्ने शोभने वारे तिथि-नक्षत्र-चन्द्रके ।
मन्त्रादानं विधातव्यं गुरुपूजापुरस्सरम् ॥ १५

दीपोत्सवे व्यतीपाते चन्द्र-सूर्योपरागयोः ।
विशेषेण विधातव्यं मन्त्रादानं यथाविधि ॥ १६

श्रुतसागरमालोड्य महारत्नसमा मया ।
एते मन्त्राः समाख्याता योग्यानां हितकाम्यया ॥ १७

परीक्षितगुणानां तु भक्तियुक्तशरीरिणाम् ।
श्रद्धावतां प्रदातव्याः सुखमिच्छुभिरात्मनः ॥ १८

मायाऽहङ्कारयुक्तेषु श्रद्धाहीनदुरात्मसु ।
निर्गुणेषु च एताँस्तु मन्त्रान् दाता स्वदोषतः ॥ १९

सोऽनन्तं लप्स्यते सद्यः संसारं दुःखरूपिणम् ।
अनन्तानि च दुःखानि शिष्यस्यापि प्रदास्यति ॥ २०

इति ज्ञात्वा प्रयत्नेन एकान्ते गुरुभक्तितः ।
भक्तियुक्ताय शिष्याय दद्यान्मन्त्रमनुत्तरम् ॥ २१

द्वात्रिंशिकाया यः कल्पं भक्तियुक्तः करिष्यति ।
सदभ्यस्तं सदा तस्य सर्वज्ञत्वं भविष्यति ॥ २२

इहलोकेऽपि दुःखानि दारिद्र्याणि च दूरतः ।
क्षयं तस्य प्रयास्यन्ति योऽमुष्मै भक्तिबन्धुरः ॥ २३

तस्मादेतां महामन्त्रद्वात्रिंशिकां महामतिः ।
अनाख्येयामयोग्यानां स्वयं नित्यं विभावयेत् ॥ २४

इत्याचार्यश्रीभद्रगुप्तविरचितायामनुभवसिद्धमन्त्रद्वात्रिंशिकायां गुरु-शिष्यशुभाशुभसंसूचको नाम पञ्चमोऽधिकारः समाप्तः ।

पू.आ. श्रीसिंहतिलकसूरिविरचितम्

## २. ॥ मन्त्रराजरहस्यम् ॥

(मङ्गलाचरणम्-)

नत्वा जिनं गुरुं किञ्चिद् ज्ञानं वक्ष्यामि सिद्धिकृत् ।
पञ्चाशल्लब्धयः सुष्ठुव्रतभाजाममूर्मताः ॥ १

(ध्यानजाः पञ्चाशल्लब्धयः-)

जिनावधि-परानन्तानन्तानन्तावधेर्जिनाः ।
सर्वावधिजिना बीज-कोष्ठबुद्धि-पदानुगाः ॥ २

सम्भिन्नश्रोतसः क्षीर-मध्वाश्रवामृताश्रवाः ।
अक्षीण-जल्ल-खेलाऽऽम-विप्रुट्-सर्वाग्रिमौषधिः ॥ ३

वैक्रियः सर्वलब्धिश्च ऋजुश्च विपुला मतिः ।
जङ्घा-विद्या-प्रज्ञामुनि-विद्यासिद्ध-नभोगमाः ॥ ४

दीप्त-शीत-तेजोलेश्या दृष्ट्याशीविष-वाग्विषाः ।
चारणास्तु महास्वप्नास्तैजसाऽग्निनिसर्गिणः ॥ ५

वाद्यष्टाङ्गनिमित्तज्ञाः प्रतिमाप्रतिपन्नकाः ।
जिनकल्पप्रतिपन्ना अणिमाद्यष्टसिद्धयः ॥ ६

केवलित्रितयं चोग्रतपो-दीप्त-तपस्विनः ।
चतुर्दश-दशपूर्वविद एकादशाङ्गवित् ॥ ७

(कर्मभवा लब्धयः-)

महाराज-महाश्रेष्ठि-चक्रभृत्त्रितयं बलः ।
षडेता लब्धयः कर्मभवा न ध्यानजाः स्फुटम् ॥ ८

(लब्धिपदोत्पन्नविद्यासहस्रम्–)

एकैकलब्धिभाजः स्युर्विद्याविंशतिसिद्धयः ।
विद्यासहस्रमित्येतत् पञ्चाशल्लब्धिगं मतम् ॥ ९

(आद्यपीठाधिदेवता–)

आद्यपीठे इदं ब्राह्म्यध्यक्षं बाहुबलेः पुरः ।
आख्यन्नाभिभवः पीठस्यास्य ब्राह्म्यधिदेवता ॥ १०

(विद्या–मन्त्रयोर्लक्षणम्–)

तथा मन्त्रसहस्रं च मन्त्रराजान्तरानुगम् ।
विद्या ससाधना मन्त्रः पाठसिद्धोऽत्र लक्षणे ॥ ११

(लब्धिपदानां कृत्यकारित्वम्–)

लब्धि–स्तुतिपदैकत्वमथैषां कार्यकृत् क्रमः ।
सप्रणव–नमःपूर्वमिष्टदाः सर्वलब्धयः ॥ १२

जिनावधि–परानन्तानन्तानन्तावधेर्जिनाः ।
केवलित्रयमित्यष्टौ पट्टे कर्पूर–चन्दनैः ॥ १३

विलिख्य तदधो बद्ध्वाऽभिधां च कुसुमैः सितैः ।
अर्चाऽष्टाधिसहस्रेण त्र्यहात् तद्बन्धमोक्षकृत् ॥ १४

उग्रतपश्चरणाद्या दीप्त–तप्ततपस्विनः ।
प्रतिमाप्रतिपन्नाश्च चतुर्भिर्दिक्चतुष्टये ॥ १५

वज्रपञ्जरमाधाय तदन्तः स्वं विचिन्तयन् ।
परविद्याच्छिदां कुर्यादजय्यः सप्तरात्रतः ॥ १६

महातपो–घोरतपो–महाघोरतपस्त्रयम् ।
उग्र–दीप्तपदान्तर्यदात्तं पृथग् न लब्धिषु ॥ १७

चतुर्दश-दशपूर्वास्तथा एकादशाङ्गभृत् ।
पदानुग-ऋजुमति-विपुलमतयश्च षट् ॥ १८

अनम्ल-लवणाहारो यदि चैकान्तराशनः ।
जातीपुष्प-सहस्रार्कजापः सारस्वतप्रदः ॥ १९

कफ-विप्रुड्-मलामर्श-सर्वाद्यौषधिपञ्चकम् ।
आलिख्य सुरभिद्रव्यैः पात्रै रोग्याभिधामधः ॥ २०

अष्टाधिकसहस्रेण सितपत्रैर्दिनत्रयम् ।
जपन् मन्त्राक्षरांश्चन्द्रभासो रोगिवपुः प्रति ॥ २१

सुधां वर्षत्यनुध्यायन् गोपयःक्षालितं च तम् ।
पाययेदुञ्जनादम्भःप्रदानैः कुष्ठरोगहृत् ॥ २२

अल्पमृत्युर्नृणां मारिरुन्मादोऽथ ग्रहग्रहः ।
शाम्यन्ति रोगदोषाश्च क्रमाद् वा पदपञ्चकात् ॥ २३

विद्यासिद्ध-क्षीराश्रव-मध्वाश्रवामृताश्रवाः ।
चतुष्कं पूर्ववद् ध्यातं स्थावरादिविषापहम् ॥ २४

सर्पिः-सर्वाश्रवलब्धी इह क्षीराश्रवान्तरा ।
तदमूर्लब्धिसङ्ख्यायां पृथग् नोक्ते न दूषणम् ॥ २५

अष्टादशकुष्ठहरं सर्वज्वरहरं परम् ।
सर्वोपसर्गनाशि स्यादाश्रवत्रितयं क्रमात् ॥ २६

बीजबुद्धि-कोष्ठबुद्धी सम्भिन्नश्रोतसस्तथा ।
अक्षीणमहानसिकाः सर्वलब्धिश्च पञ्चकम् ॥ २७

प्राग्वदालिख्य सत्पुष्पैरष्टोत्तरसहस्रकैः ।
जापात् त्र्यहाद् भवेल्लाभस्तद्वदक्षीणकोशता ॥ २८

वैक्रियर्द्धि–नभोगामि–जङ्घा–विद्याचरा इति ।
चतुष्कं सर्वदिग्भासि त्रैलोक्योपरि दोषहृत् ॥ २९

तेजः–शीत–तप्तलेश्या दृगाशीर्विष–वाग्विषाः ।
चारणास्तु महास्वप्नास्तैजसाऽग्निनिसर्गकाः ॥ ३०

नवेति प्राक्स्तुतिपदैर्युक्तानि स्वर्णभाजने ।
कर्पूर–चन्दनालिप्ते विलेख्य समवासृति ॥ ३१

(यन्त्रालेखनम्–)

'ॐ अर्हँ' पूर्वं श्रीयुगादिनाथाय पवन–गगनान्तम् ।
तस्याधो रोग्यभिधां पूर्वस्यां दिशि 'विनीतायाम्' ॥ ३२

'राज्यं करोति' धनदाशायां 'राज्यं ददाति पुत्रेभ्यः' ।
'दीक्षां गृह्णाति विभुः श्रेयांसात् पारणं वर्षे' ॥ ३३

दक्षिणदिशि 'मौनधनो विचरति' वरुणस्य दिशि 'लसज्ज्ञानः।
देवासुर–मनुजसभावन्द्यपदो धर्ममुपदिशति' ॥ ३४

आलिख्य चिन्तयन्निह समग्रमन्त्राष्टयुतशतस्य जपः ।
शतपत्रार्चा 'भक्तामर'स्तवः 'शान्ति'भणनं च ॥ ३५

अष्टोत्तरशतकलशैस्तीर्थाम्बुभृतैश्च जन्मकल्याणम् ।
स्मृत्वा कृत्वा स्नात्रं तत्सिक्तः स्वस्थ एवार्त्तः ॥ ३६

चिरदोषे नृपवादे विघटितकार्येषु सर्वथा विपदि ।
प्रागुक्तं सर्वमिदं कार्यं सकलाशिवोपशमः ॥ ३७

(विद्याष्टकम्–)

'यैः शान्तराग' मुख्यान्यष्टौ विद्याष्टकान्वितानीह ।
प्रातर्वृत्तानि पठति स स्वस्य परस्य शान्तिकरः ॥ ३८

इत्यष्टकार्यकारीह विद्याष्टकमिदं क्रमात् ।
प्रयोज्यं वर्मितं धर्मवित्सु नान्येषु कुत्रचित् ॥ ३९

(लब्धिपदानां जापविधिः-)

उक्तादन्येषु लब्धीनां पदेषु स्वाभिधाऽनुगा ।
कार्यसिद्धिरिह ज्ञेयोत्सर्ग-ध्यान-जपादिभिः ॥ ४०

आदौ लब्धिपदान्युक्त्वा सर्वेभ्य एभ्य एषयेत् ।
'नत्वा प्रयुञ्जे यां विद्यां सा मे विद्या प्रसिद्ध्यतु' ॥ ४१

इत्युक्तिपूर्वकं जापः सर्वत्राष्टोत्तरं शतम् ।
कायोत्सर्गोपवासाद्यं ज्ञेयं तत्सिद्धिदायकम् ॥ ४२

पञ्चाशल्लब्धिमध्यात् तु चत्वारिंशत्पदानि यत् ।
दृश्यन्ते वाचनास्वादावतस्तेषां प्रदर्शनम् ॥ ४३

(वाचनास्वादौ चत्वारिंशल्लब्धिपदनामानि-)

"जिनावधि-परानन्तानन्तानन्तावधेर्जिनाः ।
केवलि-भवा-ऽभवस्थ-केवल्युग्रतपश्चराः ॥ ४४

चतुर्दश-दशपूर्वैकादशा अङ्गधारिणः ।
वैक्रियर्द्धि-सर्वलब्धी ऋजुश्च विपुला मती ॥ ४५

प्रज्ञाश्रम-जङ्घागति-विद्यासिद्ध-नभोगमाः ।
कफ-विप्रुण्मलामर्श-सर्वौषध्यश्च वाग्विषाः ॥ ४६

आशीविष-निमित्तज्ञाः सम्भिन्नश्रोतसस्तथा ।
तप्तलेश्या-शीतलेश्या-बीज-कोष्ठादिबुद्धयः ॥ ४७

द्वादशाङ्ग-सर्वसिद्धा अक्षीणादिमहानसाः ।
क्षीराश्रव-मध्वाश्रव-सुधाश्रव-मनोविदः" ॥ ४८

(चत्वारिंशल्लब्धिपदानां कृत्यकारित्वम्-)
एषामर्थक्रियाकृत्त्वं प्रत्येकमथ दर्श्यते ।
'ॐ नमः' पूर्वका क्वापि 'ॐ ह्रीँ नमः' पुरः क्वचित् ॥४९

(चत्वारिंशल्लब्धिपदफलम्-)

नाभेयाच्छशिलक्ष्मान्तं पुराऽऽसीदेकवाचना ।
ततस्तच्चैत्ययोर्वीरचैत्यतीर्थेशहेतुतः ॥ ५०

एषां जन्मादिकल्याणे स्वर्णाम्बुजस्थितं हृदि ।
पुण्डरीकं गुरुं ब्राह्मीं गौतमं च निवेशयेत् ॥ ५१

प्रातिहार्याष्टकोपेतं जिनं सातिशयं मुनिः ।
उत्सर्गेऽष्टशतं ध्यायन् विसूचिकाहरो भवेत् ॥ ५२

अवधिजिनं साष्टशतं कायोत्सर्गे जपन् करस्पर्शात् ।
जलपानाद् वा सर्वज्वरहर एवं च सर्वत्र ॥ ५३

परमावधिजिनजापो हरते रोगं शिरोभवं स्पर्शात् ।
कर्णरुजां तदनन्तावधिजिनजापोऽष्टशतजप्तः ॥ ५४

एवमनन्तानन्तावधिजिनजापश्च नेत्ररोगहरः ।
केवलित्रितयस्य जपाज्ज्ञानं बद्धस्य मोक्षश्च ॥ ५५

उग्रतपसो गमनहाश्चतुरधिदशपूर्वजापतस्तद्वत् ।
दशपूर्विजपाद् बाहुश्रुत्य-लवणाम्लरहितभुजः ॥ ५६

एकादशाङ्गधारिस्मृत्या गुरुवर्जितागमार्थज्ञः ।
वैक्रियलब्धेर्जापोऽरुणकणवीरैः स्वकामाप्तिः ॥ ५७

सर्वलब्धिप्रभावात् प्रसृतयशाः सर्वतोऽपि शास्त्रादौ ।
ऋजुमति-विपुलमतीनां ध्यानं विद्विष्ट-शान्तिकरम् ॥ ५८

प्रज्ञाश्रमणर्षिजपः सितकणवीरैस्त्र्यहाद् वदत्यायुः ।
जङ्घागति-नभसिगमौ काञ्जिकभुक्त्या नभोगतिं कुरुतः ॥ ५९

विद्यासिद्धध्यानं विद्याजापेषु विघ्नहरमेव ।
खेलौषधिलब्धिजपः सितपत्रैरल्पमृत्युहरः ॥ ६०

विप्रुड्लब्धिस्मरणं नरमारिं हरति सितकुसुमैः ।
समलौषधिलब्धीनां स्मृतिर्जलपानात् प्रयाति मदरोगः ॥ ६१

सर्वामर्शौषध्योर्जापो ग्रहदोष-मोक्षकृत् त्रिदिनात् ।
वागाशीविषजापः प्रेतवने शत्रुविद्वेषे ॥ ६२

अष्टाङ्गनिमित्तध्यानं स्वप्ने शुभाशुभं ब्रूते ।
सम्भिन्नश्रोतोमुनिजापात् कर्णादिभिः पश्येत् ॥ ६३

माघेऽपि तप्तलेश्यास्मृत्या शीतोज्झितोऽरिदाहकरः ।
शीतलेश्याऽध्यायी शीतो दाहज्वरार्त्तिहरः ॥ ६४

कोष्ठादिबुद्धिविभवो जठरोद्भवशूल-गुल्म-कृमिहारी ।
द्वादशसूत्रविदोऽमी सुसर्वसिद्धाश्च जनशान्त्यै ॥ ६५

अक्षीणमहानसिकाः सितपत्रजपेन कोशवृद्धिकराः ।
क्षीराश्रवर्षिजापात् क्षीराम्बु पिबँश्च कुष्ठनिर्मुक्तः ॥ ६६

मध्वाश्रवप्रजापादेकाहज्वरापहारः स्यात् ।
अमृताश्रवहृत्पर्यवजापः सर्वोपसर्गहरः ॥ ६७

सामान्यादुत्सर्गः शतपत्राण्यष्टसहस्राद्यम् ।
सप्तादिद्वात्रिंशद्दिनान्तमम्भःकरस्पर्शात् ॥ ६८

अन्यच्च, (अप्रतिचक्रायन्त्रम्, गणधरवलयश्च-)
षट्कोणेऽप्रतिचक्रायन्त्रं षडधिकशतद्व्यधित्रिंशत् ।
अन्तर्दलं स्तुतिपदी दिगन्तरे गणभृतां वलयम् ॥ ६९

(जपभेदाः-)

रेचक-पूरक-कुम्भा गुणत्रयं स्थिरकृति-स्मृती हक्का ।
नादो ध्यानं ध्येयैकत्वं तत्त्वं च जपभेदाः ॥ ७०

(स्थलम्, आसनम्, ध्यातुर्योग्यता च-)

एकान्तरम्यभूमावुपविश्य सुखासनो जिताक्षगणः ।
गुरुभक्तः प्रकृतिशुचिर्दृढधर्मा ध्यातुमुद्यतते ॥ ७१

(१-६. रेचकादेः गुणत्रिकस्य च लक्षणम्-)

ब्रह्माध्वना दिनकृतं विरिच्य रोषं तमोगुणं च समम् ।
रागं च राजसगुणं कृष्णारुणमर्कमार्गेण ॥ ७२

आक्षिप्य वीतरागं सत्त्वगुणं पूरकेण चन्द्रपथे ।
कुम्भेन स्थिरयित्वा ध्यायति शान्त्यै च बन्धमोक्षाय ॥ ७३

विक्षिप्य सत्त्वमुज्ज्वलमाक्षिप्य रजो वशीकृति-स्तम्भे ।
आक्षिप्य तमश्च रुषा द्वेषोच्चाटन-मृतीः कुर्यात् ॥ ७४

यदि वा,

प्रागुक्तवक्ष्यमाणे मन्त्रपदे रेचनात् पुरः पश्येत् ।
आक्षिप्य पूरकेण तु हृदि कुम्भेन स्थिरीकुर्यात् ॥ ७५

रेचकतो द्वेष-मृती पूरकतो वश्य-लाभ-सङ्क्षोभान् ।
कुम्भकतोऽरिस्तम्भं कुर्वीत त्रिगतमन्त्रपदैः ॥ ७६

(७. स्थिरीकरणलक्षणम्-)

व्यालातप-शीत-रुजा क्लेशावेशेऽपि मधुरभक्ष्यादौ ।
न क्षुभ्यति मन्त्रपदे लीनमनास्तत् 'स्थिरीकरणम्' ॥ ७७

(८. स्मृतेर्लक्षणम्-)

मन्त्रस्य हृदि स्मरणं नासाग्रे दृक् 'स्मृतिः' सकृत् सा तु ।
द्वि-त्रिरियं परिवृत्तिर्निःशब्दहृदेकतां प्राप्ता ॥ ७८

(९. हक्कायाः लक्षणम्-)

सहसा रोषे 'हक्का' मन्त्रान्ते क्षोभदा ग्रहाद्यपहा ।
यद्वा निःश्वासे हस्तत्सहचारी स उच्छ्वासे ॥ ७९

(१०. नादस्यानाहतनादस्य च लक्षणम्-)

शून्यशिरस्तद्द्वयमप्येके सर्वं स्मरन्ति मन्त्रपदम् ।
'नादो' भृङ्गध्वनिरिव शङ्खिन्युत्थस्त्वनाहतो नादः ॥ ८०

(११. वर्ण-मण्डलपूर्वकं ध्यानम्-)

ध्यानं तु 'वर्ण-मण्डल'-तत्त्वानुगमत्र लब्धिमन्त्रपदम् ।
श्वेतं भू-जलमण्डल-तत्त्वगतं शान्ति-पुष्टिदं विषहम् ॥ ८१

अरुणं वह्निमण्डल-तत्त्वं प्राक् तत्त्वगं च वश्याय ।
पीतं भूमिमण्डलतत्त्वगं च कुर्यान्मुखस्तम्भम् ॥ ८२

धूम्रं च वायुमण्डल-तत्त्वगमुच्चाटनं सुहृद्द्वेषम् ।
कृष्णं व्योमान्तरगं मृत्युं कुर्वीत न प्रयुञ्जीत ॥ ८३

(१२. ध्येयैकत्वम्-)

ध्येयः सातिशयजिनो गणधर-देव्यादि-मन्त्रवर्णा वा ।
ध्येयेन प्राणानामैक्यं सर्वत्रगं 'तदेकत्वम्' ॥ ८४

(१३. तत्त्वम्-)

आविशति पूरक-कुम्भकपवने चान्द्रेऽर्धरात्रपूर्वाह्णे ।
वाच्योऽक्षरः शुभार्थे व्यस्तो व्यस्तार्थके इदं 'तत्त्वम्' ॥ ८५

षट्कोणाकृतिदेहे विन्यस्याक्षरांस्तथा स्वान्तम् ।
तत्तद्वर्णाकारं कृत्वा ध्यायति स सिद्धिपदम् ॥ ८६

(सूरिमन्त्रस्यैतिह्यवृत्तम्-)

यत् पूर्वं नाभेयः श्लोकत्रिशतानि पुण्डरीकाय ।
गणभृन्मन्त्रं प्रददौ विद्यासिद्धः स मुक्तश्च ॥ ८७

चन्द्रप्रभान्तमेवं तीर्थानुच्छेदतो बभूवास्य ।
एकैव वाचनातो भिन्ना भिन्ना तु वीरान्तम् ॥ ८८

श्रीगौतमाय मन्त्रं वर्णानेकाधिविंशतिशतानि ।
स्वामी ददौ तदाज्ञावश्यः श्रीगौतमोऽप्येनम् ॥ ८९

द्वात्रिंशत्श्लोकमितं चक्रे कालेन हीयमानममुम् ।
अध्युष्टश्लोकमितं पठिता श्रीदुष्प्रसभसूरिः ॥ ९०

श्रीमत्सुधर्मगणभृत्सन्तानेऽप्येक एव मन्त्र इति ।
आराधि गौतमश्चेत् सर्वेऽप्याराधिता गुरवः ॥ (त्रिभि.) ९१

(मन्त्रजापयोग्यं स्थानादि-)

वृष-चन्द्र-सिंहलाञ्छनजिनचैत्ये ज्ञान-जन्मकल्याणे ।
दिवसे सुभिक्षदेशे तीर्थे वा रम्यभूमौ वा ॥ ९२

राज्ञि प्रशान्तवैरे शासति लोकं विशुद्धदिग्गगने ।
रम्योपश्रुतिशकुने प्रदुष्टनर-तिर्यगीक्षणत्यक्ते ॥ ९३

(मन्त्रजापविधिः-)

हैमे सहस्रपत्रे कमले विन्यस्य शुद्धरौप्यमयम् ।
श्रीगौतममस्याधः 'आँ क्रौँ ह्रीँश्रीँ' निवेश्योच्चैः ॥ ९४

एतेनाहूयैनं शून्यैर्भूतैश्च पञ्चभिः पूर्वम् ।
करपर्वन्यासेनाधाय स्वाङ्गेषु रक्षां च ॥ ९५

त्रैधं ब्रह्मविशुद्धो निरशनमेकं च पञ्चनिर्विकृतीः ।
कुर्वन्नप्यविभिन्नं विच्छिन्नं वा जिनाङ्घ्रिदृढभक्तिः ॥ ९६

पद्मासने निविष्टो मुद्रां परमेष्ठिनः प्रवचनस्य ।
कुर्वन् स्नानसुगन्धितदेहो ध्यायत्यमुं गाथाम् ॥ ९७

(मन्त्रः-)

"कणयमयसहसपत्ते कमलम्मि निवेसिओ य लद्धिजुओ ।
बहुपाडिहेरकलिओ झायव्वो गोयममुणिंदो ।" ॥ ९८

(मन्त्रध्यानविधिः-)

भणनात् प्रागथ पश्चात् कर्पूरसुगन्धिजातिपुष्पाद्यैः ।
अष्टाधिसहस्रार्चापूर्वं श्रीगौतमं जपति ॥ (स. कु.) ९९

(मन्त्रफलम्-)

सिद्धोऽथ पञ्चशत्या रात्रौ जापात् शुभाशुभं दिशति ।
नित्यस्मृतिश्च लाभं ग्रामप्रवेशे महत्त्वं च ॥ १००

यदिवा, (ग्रामप्रवेशमन्त्रः-)

'प्रणवो नमो भगवते गौतमतः स्वामिने ततः ।
लब्ध्या सम्पन्नाय च सर्वाभीष्टाग्रतः सिद्धिम् ॥ १०१

कुरु कुरु माया स्वाहा' द्वादशसाहस्रिकोऽस्य करजापः ।
होमो दशांशतोऽसौ सिद्धः सर्वार्थसिद्धिकरः ॥ १०२

यदिवा, (मन्त्रः, अशिवोपशमनपदानि-)

"ॐ नमो भगवओ गोयमस्स सिद्धस्स बुद्धस्स ।
अक्खीणमहाणसस्स ह्रीँ अवतर अवतर
अक्खीणमहाणसी स्वाहा ।" ॥ १०३

(मन्त्रफलम्-)

जापोऽष्टाधिसहस्रैः पुष्पैः श्रीखण्ड-तण्डुलैरस्य ।
सच्चन्दनसमतन्दुलं मुख्यं वश्याक्षयाय लाभाय ॥ १०४

यदिवा, (मन्त्रः-)

"अक्खीणमहाणसिलद्धिसञ्जुओ जयइ गोयमो भयवं ।
जस्स पसाएणऽज्जवि सुसाहुणो सुत्थिया भरहे ॥" ॥ १०५

(मन्त्रफलम्-)

पूर्वाचार्यकृतैषा गाथा मन्त्रात्मिकाऽष्टशतजप्ता ।
प्रातर्विचरणकाले नित्यं वस्त्रान्नलाभाय ॥ १०६

नैवेद्यं पक्वान्नं परमान्नं दुग्ध-शालि-घृतपूरान् ।
द्राक्षां गौतमपुरतस्तथैव भुक्तिर्निजस्यापि ॥ १०७

(गौतमनाममाहात्म्यम्-)

यत्रास्ति 'गौतम'पदं तन्मन्त्रः सैव सा महासिद्धिः ।
स श्रीसुधर्मगणभृत् किन्तु श्रीपुण्डरीकोऽपि ॥ १०८

गणभृन्मन्त्रप्रस्तावाच्च-

"ॐ नमो भगवओ" ॐ पाससामिस्स सव्वलद्धि- ।
सम्पन्नस्स भयवं केसिगणहरस्स ह्रीँ स्वाहा ॥" ॥ १०९

(मन्त्रजापविधिः-)

कल्याणकेषु पार्श्वं जातीपुष्पाष्टयुतसहस्रेण ।
नैवेद्य-फलं दत्त्वा मन्त्रमिमं शालिदशशत्या ॥ १९०

अष्टोत्तरं सहस्रं करेण परिजप्य सिद्धतां नीतः ।
अष्टाधिशतस्मृत्या गौतम इव लाभदः सुयतेः ॥ १११

(कोट्यंशमन्त्रः, तदैतिह्यवृत्तं तच्छक्तिश्च-)

श्रीप्रभवाद् वज्रर्षि यावदभून्नवगुणस्थितिप्राप्तिः ।
ज्ञानत्रितयं मुख्यं कोट्यंशस्तत्र मन्त्रोऽयम् ॥ ११२

यत् पश्यति सर्वज्ञोऽनन्तद्रव्यादि तस्य कोट्यंशम् ।
अस्य ध्याता पश्यति कोट्यंशस्तत्र मन्त्रोऽयम् ॥ ११३

कोट्यंशमन्त्रसिद्धावणिमाद्या अष्टसिद्धयोऽस्यात्र ।
मोक्षोऽमुत्र त्रिजगज्जनवन्द्यो विश्वशान्तिकरः ॥ ११४

कोट्यंशसमुत्थितौ श्रीवज्रस्वामिशिष्यशाखाभिः ।
तिसृभिः कोट्यंशस्य स्मृत्यै कोटीगणो विहितः ॥ ११५

अष्टोत्तरशतमंशा अधुना तत्सङ्ख्यपदमयो मन्त्रः ।
तत्सिद्धौ कोट्यंशादष्टाधिशतांशमीक्षेत ॥ ११६

अपि दुष्प्रसभो मेरून् पञ्चाधीति ध्रुवांशका ह्येते ।
तन्त्रैर्विना न मन्त्रो न स्फूर्तिः कालदोषात् तु ॥ ११७

यदिवा,

जिन-सूरि-यतित्रयमिह तेनैष पञ्चपरमेष्ठी ।
जिन-सूरिपदन्यासात् सिद्धोपाध्यायसङ्ग्रहः क्रमशः ॥ ११८

अनुभूय साधुलब्धीः पूर्वभवे गणधरो जिनोऽमुत्र ।
तस्मादिह यतिलब्धिन्यासः प्रागंशविधिरेषः ॥ ११९

अर्हत्त्वं मेरुपदे ध्रुवमस्मिन् षोडशांशकास्तद्वत् ।
षोडशबिन्दुभिरंशाः स्थाप्यास्तत्त्वं तु नो वेद्मि ॥ १२०

गणभृत् त्रयोदशांशस्तीर्थकृतां केवलागमे पूर्वम् ।
अस्यैव स्यात् सर्वश्रोतोलब्धिः से(स)ह मतिज्ञानी ॥ १२१

सामान्यकेवलि-भवाभवस्थकेवलजुषोऽवधेः ।
परमात् सर्वानन्तानन्तेभ्योऽवधिजिना एते ॥ १२२

एकादशांशका यद् गणभृत्पश्चाद् भवन्ति सातिशयाः ।
ऋजु-विपुलाभ्यां च मती सर्पिः-क्षीरामृताश्रविणः ॥ १२३

एते दशांशका ध्रुवमेतेऽत्र जिना महानिमित्तज्ञाः ।
विद्यासिद्ध-तपोभृत्-पूर्वभृतो वादिनोऽष्टांशाः ॥ १२४

अष्टांशाः शिव-भवगाः शेषांशा मोक्षभाज एवोक्ताः ।
मोक्षतरुबीजमर्हन् शेषाः शाखा-प्रशाखादि ॥ १२५

मेरुपदस्मरणादिह जिनप्रभा स्तुतिपदानि जैनर्द्धिः ।
इरिमुख्या देव्योऽमूर्जिना देवातिशयरूपाः ॥ १२६

(मन्त्रोक्तयः-)

महती बृहती उक्ता न्यासीति चतुर्विधेह मन्त्रोक्तिः ।
महती स्वपाठसिद्धा बृहती चाल्पजपबहुसिद्धिः ॥ १२७

(मन्त्रोक्तिलक्षणम्-)

उक्ताऽथ गौतमी सा जाप-तपोऽर्चाऽत्र पूर्वभृद् यावत् ।
न्यासीत्येकत्र पदे बहुदेवीनामविन्यासः ॥ १२८

(गुरुलक्षणम्-)

अर्हन्मेरुस्मरणात् तद्रूपो गुरुरतश्च तच्छिष्यः ।
चतुरनुयोगी गणभृत् तीर्थानुच्छेदहेतुः स्यात् ॥ १२९

(शिष्यलक्षणम्-)

कुलशुद्धो व्रतनिष्ठो बहुशः षट्त्रिंशता गुणैर्युक्तः ।
जिन-गुरुभक्तः शिष्यो योग्यस्तन्मन्त्रराजस्य ॥ १३०

(मुद्रापञ्चकम्-)

पूर्वं मुद्रापञ्चकमाह्वान-स्थापने ससंनिधिके ।
सम्यग्निरोधमवगुण्ठनमिति तल्लक्षणं वच्मि ॥ १३१

(आह्वानादिमुद्रापञ्चकलक्षणम्-)

आह्वानं प्रसृताञ्जलि संस्थाप्यमवाङ्मुखेऽञ्जलौ ध्येयम् ।
ऊर्ध्वाङ्गुष्ठे मुष्टिद्वन्द्वे ध्येयाग्रतस्तृतीयं तु ॥ १३२

अङ्गुष्ठमध्यमुष्टौ निरोधनं ध्येयदिक्षु चतसृषु च ।
ध्यातुस्तर्जन्यङ्गुलिभ्रमतः स्यात् तदवगुण्ठनम् ॥ १३३

(मुद्रापञ्चकस्य फलम्-)

आद्याऽऽह्वयति ध्येयं द्वितीयका स्थापयत्यदः पुरतः ।
सन्निधयते तृतीया निरुणद्धि तदग्रतस्त्वपरा ॥ १३४

अवगुण्ठनतो ध्येयं ध्यातुः परतो न याति कुत्रापि ।
ध्यानविसर्जनहेतोरञ्जलिबन्धो नमन्मौलिः ॥ १३५

ध्येयस्य विषयं मुद्रापञ्चकं त्विदमीरितम् ।
सम्प्रदायादिहान्येऽपि भेदास्तत्र न मूढता ॥ १३६

सौभाग्य-सुरभिमुद्रे प्रवचन-परमेष्ठिमुद्रिकाञ्जलयः ।
ध्यानविधौ गुरुदर्शितरीत्या ज्ञेयाः सबीजाद्याः ॥ १३७

आद्या वश्य-क्षोभे सुरभिः शान्ते तृतीयका ज्ञाने ।
परमेष्ठी सर्वार्था अञ्जलिमुद्राऽऽत्मसेवायै ॥ १३८

(मन्त्र-विद्या-प्रस्थानलक्षणम्-)

आप्तुमिष्टे कर्मणि मन्त्रो विद्योच्यतेऽर्चनाकाले ।
प्रस्थानं मोक्षार्थे पीठं पीठाधिपो मेरुः ॥ १३९

(ॐ ह्रीँ श्रीँ बीजानां फलम्)

सर्वत्र स्तुत्यादौ प्रणवाः स्व-परेषु शान्ति-तुष्टिकृते ।
माया वश्य-क्षोभे लक्ष्मीर्ज्ञाने धनस्त्र्याप्तौ ॥ १४०

(युगपद्बीजत्रिकं न प्रयोज्यम्-)

युगपत्त्रयं तदादौ न स्यादिति बीजसङ्गतं ध्यानम् ।
निर्बीजं मोक्षकृते एवं विद्या सदारम्भे ॥ १४१

मेरुमुखे एतत्त्रयमिच्छन्त्यपि केचिदस्तु सर्वर्द्ध्यै ।
गुरुभिः सकले मन्त्रे प्रणवत्रितयं परं कथितम् ॥ १४२

द्वादशपदकचतुष्कं मध्ये चैकं द्वि-षडरयन्त्रमिदम् ।
सप्तानां वर्गोऽभूत् पदेषु सङ्ख्याऽक्षराणां तु ॥ १४३

(प्रथमा द्वादशपदी)

"रागाइरिउजईणं जए जिणाणं नमो महं होइ ।
एवं ओहिजिणाणं परमोहीणं तहा तेसिं ॥ १४४

"एवमणंतोहीणं अणंताणंतोहिजुयजिणाण नमो ।
सामन्नकेवलीणं भवाभवात्थाण तेसि नमो ॥ १४५

"उग्गतवचरणचारीणमेवमित्तो नमो नमो होइ ।
चउदस-दसपुव्वीणं नमो तहिक्कारसंगीणं ॥" १४६

विद्याऽष्टगर्भितेऽस्मिन् सद्गुरुविज्ञाततादृगुच्चरणे ।
षष्ठीबहुवचनान्ते नमःपुरो बीजरहिते च ॥ १४७

पञ्चाद्रि–नवक–नवका रुद्राः षड्–नन्द–पङ्क्ति–भान्वङ्काः ।
सप्ताष्टौ द्व्यधिकशतं प्रथमार्कपदेऽक्षरैः संख्या ॥ १४८

(द्वितीया द्वादशपदी–)

"सव्वेसिं एएसिं एवं विहिया अहं नमोक्कारं ।
जमियं विज्जं पउंजामि सा मे विज्जा पसिज्झउ स्वाहा ।"॥१४९

त्रि–त्रि–चतुर्द्विकमेकं द्वि–द्वि–चतुश्चन्द्र–चन्द्र–युग्म–युगाः ।
एवं द्वादशपदकैरेकोनत्रिंशदक्षरकाः ॥ १५०

प्रागक्षरसंयोगादेक–त्र्येकमिहाक्षरा जिनाङ्कपदैः ।
विद्यापीठं प्रथमं प्रस्थानं सर्वकार्यकरम् ॥ १५१

स्नानाङ्गराग–वसनोज्ज्वल–पुष्पमाला
कोटीर–पुण्ड्रमथ कुण्डलयुग्मकं च ।
ग्रैवेयमङ्गदयुतं वरहारमर्क–
सङ्ख्यैः पदैर्वपुषि भावय सूरिमन्त्रे ॥ १५२

आद्यस्तुतिपदैरिति शेषः ।

(तपोविधिः–)

निरशनमेकं रूक्षान्नपञ्चकाचाम्लकं विकृतिवर्जम् ।
पञ्चदिनान्याचाम्लं निर्विकृतेः पञ्चकाचाम्लम् ॥ १५३

निर्विकृतिश्चानशनं प्रान्ते एकाधिविंशतिदिनानि ।
एवं कोट्यंशतपः प्रथमप्रस्थानसिद्ध्यै स्यात् ॥ १५४

निद्रा-प्रमाद-विकथावर्जं प्रतिदिवसमस्य जपः ।
अन्नादिलाभशान्त्यै भानुसहस्त्रैर्वचसि सिद्ध्यै ॥ १५५

(वाणीदेवीस्वरूपम्-)

परमेष्ठि-गरुडमुद्रायुगेन जापोऽस्य देवतेन्दुनिभा ।
पुस्तकमभयं मुक्तास्त्रजं वरं तन्वती भुजचतुष्के ॥ १५६

हंसेऽम्बुजे निविष्टा वाग्बीजेऽथान्तरात्महंसे वा ।
ब्राह्मीव पुण्डरीकं सरस्वती गौतमं नमति ॥ १५७

गौतमनन्ता देव्या पुत्रदृशा वीक्षितः प्रदत्तवरः ।
पञ्चमहाव्रतनिष्ठो युगप्रधानागमो भवति ॥ १५८

(ध्यानविधिः-)यदिवा

चतुरधिक(विंशति)दले नाभिसरोजे पदानि तावन्ति ।
विन्यस्यान्तः श्रीमहावीरं श्रीगौतमं देवीम् ॥ १५९

ध्यायति तस्य जिनेन्द्रः स्वीयपदं गौतमश्च गणभृत्त्वम् ।
देवी च श्रुतकेवलिभावं निर्विघ्नमुपदिशति ॥ १६०

(इति प्रथमप्रस्थान विधिः)

(तृतीया द्वादशपदी-)

"पणवो नमो भगवओ बाहुबलिस्सेह पण्हसमणस्स ।
ॐ वग्गुं वग्गुं तह निवग्गुमग्गंगयस्स तहा ॥ १६१

"सुमणे सोमणसेवि य महुमहुरे जिणवरे नमंसामि ।
इरिकाली पिरिकाली सिरिकाली तह महाकाली ॥ १६२

(चतुर्थी द्वादशपदी-)

"किरियाए हिरियाए य संगए तिविहकालियं विरिए ।
सुहमाहप्पं मुत्तिं साहिंते साहुणो वंदे ॥ १६३

"ॐ किरिकिरिकालिं पिरिपिरिकालिं च सिरिसिरिकालिं ।
हिरिहिरिकालिं दुविहं साहिंतो(हिते?)आयरियकालिं ॥ १६४

"किरिमेरुं पिरिमेरुं सिरिमेरुं तह य होइ हिरिमेरुं ।
आयरियमेरुपयमवि साहिंतो सूरिणो वंदे ।" ॥ १६५

चतुर्थं द्वादशमिति पदम् ॥
स्वाहापदं च प्रान्ते इति, पदान्येकोनपञ्चाशत् ॥

त्रि-चतुः-पञ्च-षडष्टौ त्रि-चतुर्भूतानि वारिधिचतुष्कम् ।
त्रिद्वादशकेऽक्षरसंख्या स्याच्चतुरधिकपञ्चाशत् ॥ १६६

वारिधि-युगाद्रि-षट्त्रिकदशकं वेदाब्धि-वार्धि-युगषट्कम् ।
द्वादशकेऽक्षरसङ्ख्या सर्वाग्रं पञ्चषष्टिरभूत् ॥ १६७

स्वाहेत्येकपदयुतेः सप्तकवर्गस्तदक्षरैः सर्वैः ।
श्लोकाः सप्ताष्टाधिकविंशतिवर्णा गुरोर्मन्त्रः ॥ १६८

सूर्यारचक्रयन्त्रे युगकृत्वो लिखितसूर्यसङ्ख्यपदैः ।
अन्तः स्वाहेत्येवं निजगुरुभिर्दर्शितो मन्त्रः ॥ १६९

प्रस्थानरीतिरधुना त्रि-द्वादशकेऽष्टभिः पदैराद्यैः ।
विद्या-महादिपीठं प्रस्थानमिदं द्वितीयं स्यात् ॥ १७०

(द्वितीयप्रस्थानाधिष्ठात्री देवी-)

एतस्याधिष्ठात्री शिखरगृहा मानुषोत्तरनगस्य ।
गौतमभक्तिर्दशशतकरा त्रिभुवनेश्वरी देवी ॥ १७१

(जापविधिः-)

जप्त्वाऽऽद्यप्रस्थानं पूर्वं जापोऽस्य षोडशसहस्रः ।
पीतध्याने योन्याख्यमुद्रया वश्य-सौभाग्यम् ॥ १७२

एकाधिविंशतिमसौ त्रिसन्ध्यजापेऽथ वश्यकृद् यदि वा ।
शश्वदिहाष्टाधिशतं जप्तो लाभप्रदो विशेषेण ॥ १७३

अस्यान्तःप्रथमपदैश्चतुर्भिरादेशदा सितध्याने ।
आधाय सुरभिमुद्रां विद्या जप्तेह षोडशसहस्राः ॥ १७४

निजदेशे जयहेतुर्जयेति विजयाऽन्यदेशजयदाऽसौ ।
अपराजिता च शत्रोरपराजयेत्यमूर्देव्यः ॥ १७५

(तपोविधिः-)

उपवासो रूक्षान्नम् आचाम्लत्रितयमपरसचतुष्कम् ।
आचाम्लमपरयुगम् उपवासस्त्र्यधिकदशदिवसाः ॥ १७६

(द्वितीयप्रस्थाने एव विशेषमन्त्रदर्शनं यथा-)

'ॐ ह्रीँ बाहुबलि-महाबाहुबलिपदात् तु गिरि-महागिरितः ।
वीरादि-बाहुबलये स्वाहा' मन्त्रः सिवनिपट्टे ॥ १७७

आलिख्य सुगन्धिदलैः सूर्यसहस्रैस्तु जातिकुसुमानाम् ।
जप्तः प्रश्ने दक्षिणबाहुस्फुरणे शुभं प्रष्टुः ॥ १७८

आलिख्य पादुके द्वे परतो वदने सचन्द्रचन्दनतः ।
सत्पट्टे बाहुबलेः सितपत्रकुसुमैः समभ्यर्च्य ॥ १७९

उत्सर्गे पञ्चशतीं 'ॐ किरिकिरि लम्बबाहुमत्र नमः ।'
जप्त्वा शीर्षे कृत्वा शयने च शुभाशुभादेशः ॥ १८०

इति द्वितीयप्रस्थानविधिः

## तृतीयप्रस्थानविधिः ।

त्रि-द्वादशकेऽन्त्यश्चतुःपदयुक्ताग्रेऽर्कमुख्यपदयुगतः ।
पदषट्कादुपविद्यापीठं प्रस्थानमपरं तु ॥ १८१

(तपोविधिः-)

उपवासो रूक्षान्नान्यष्टावाचाम्लपञ्चकं रूक्षम् ।
सप्ताहाद् वाऽऽचाम्लं रूक्षयुगं निरशनं प्रान्ते ॥ १८२

(ध्यानं, तत्फलं च-)

पञ्चाधिविंशतिदिनान्यत्रापि तपसि पूर्ववद् ध्यानम् ।
स्त्रैणमुखं न हि दृश्यं मौनं स्थानेषु पञ्चसु च ॥ १८३

जातीकुसुमसहस्रद्वादशजापे सरस्वती वरदा ।
उपवासेऽष्टोत्तरसहस्रजापान्निशि स्वप्नः ॥ १८४

अरुणध्यानेनारुणकुसुमैर्गिरिमुद्रया नृपसहस्राः ।
जापेऽस्य राजवश्यं त्रैलोक्यातिशयसम्पत्तिः ॥ १८५

(तृतीयप्रस्थानाधिष्ठात्री देवी-)

एतस्याधिष्ठात्री पद्महृदे वसति देवी श्रीः ।
विजया-जया-जयन्ती-नन्दा-भद्रासहोपान्ता ॥ १८६

सर्वाङ्गे भूषणधरा सकलेन्द्रविमोहिनी निधिभृत् ।
गौतमभक्तिर्गौतममन्त्रध्यातुर्दिशति लक्ष्मीम् ॥ १८७

इति तृतीयप्रस्थानविधिः

## चतुर्थप्रस्थानविधिः ।

(पञ्चदेवाद्रिरहस्यम्-)

चतुरर्कपदान्तर्या पुनरुक्ताक्षरयुगाऽत्र पञ्चपदी ।
मन्त्रादिपीठमेतत् तुर्यं प्रस्थानमाभाति ॥ १८८

(तपोविधिः-)

उपवासो रूक्षाशनपञ्चकमाचाम्लमनशनं चाष्टौ ।
दिवसास्तपसि प्राग्वद् ध्यानं गुरुगौतमे पूजा ॥ १८९

(चतुर्थप्रस्थानाधिष्ठाता देवः-)

षोडशसहस्रयक्षाधिपतिर्विंशतिभुजोऽस्य तु स्वामी ।
गणिपिटकयक्षराजोऽणपणपन्नीसुरीसहितः ॥ १९०

(जापविधिः, तत्फलं च-)

परमेष्ठिमुद्रयाऽसौ जापात् षोडशसहस्रतः सिद्धः ।
प्रातर्जलगण्डूषान् सप्त त्यक्त्वा निजपदाधः ॥ १९१

चम्पित्वा वैरिवपुर्ध्यानेऽथाङ्गुष्ठमुद्रयाऽङ्गुष्ठात् ।
व्यस्तं त्रिसन्ध्यमष्टाधिकशतजापे मुखस्तम्भः ॥ १९२

तथा,
येन धृतस्तस्याख्यां विलिख्य काष्ठेऽथ वामपादाधः ।
मुष्टिद्वयमुद्राभृत् त्रिसन्ध्यजापोऽस्य बन्दिमोक्षाय ॥ १९३

इति चतुर्थप्रस्थानविधिः

पञ्चमप्रस्थानविधिः

मेरुमयमन्त्रराजोऽधिष्ठातारोऽस्य भान्ति सर्वेन्द्राः ।
आचाम्लान्यथ षोडश निरन्तरं पूर्ववद् ध्यानम् ॥ १९४

पञ्चप्रस्थानतपः प्रत्येकं शक्तितश्च युगपद् वा ।
सुयतेरेतद्ध्यानावहितहृदो यान्ति तपसि दिनाः ॥ १९५

शुक्लध्याने जापः प्रवचन-परमेष्ठिमुद्राभ्याम् ।
लक्षं त्रिलक्षमथवा गौतम इव सर्वसिद्धिपदम् ॥ १९६

सर्वार्हज्जन्मविधि-स्नात्रे हेतुश्च मेरवः पञ्च ।
तेनेह मेरुशब्दादर्हन् सज्ज्ञानकल्याणः ॥ १९७

समति-श्रुतावधि-मनः-केवलमिति मेरुपञ्चकं क्रमतः ।
शान्तिर्वृद्धिर्वश्यं क्षोभो मुक्तिश्च बन्दिमोक्षश्च ॥ १९८

मेरुध्यानाद् बन्दिमोक्ष इत्यर्थः ।
"प्रणवोदरेऽरिमूर्ति ऐँ श्रीँ प्रैँ ह्सौँ किरिनग-पवन-नभः" ।
मन्त्रं विलिख्य वलये 'फौँ ह्सौँ प्रणवैः' क्रमोत्क्रमतः ॥१९९

जापोऽष्टाधिसहस्रैः सितपत्रैर्निरशनत्रयं यदिवा ।
आचाम्लत्रयमित्थं रुष्टमरिं शमयति नृपं वा ॥ २००

"प्रणवान्तं वश्यवपुः ऐँ श्रीँ सिरिमेरुतो मरुद्-व्योम" ।
श्रीखण्डेन लिखित्वा सितपत्रैः सहस्रपरिजापः ॥ २०१

परिजप्तपत्र-फल-कुसुमदानतो भर्तृवश्याय ।
मध्याङ्गुल्याः पर्वणि तृतीयके त्र्यक्षरो जापः ॥ (यु.) २०२

कार्तिक्यामाद्यां वा राकायां निरशनं विधायादौ ।
द्वासप्ततिराकान्ते द्व्यधिसप्ततिनिरशनैः क्रमतः ॥ २०३

सौधर्मेन्द्रासनदक्षिणपादाधः स्वातिधिष्ण्य-दृग्रात्रौ ।
वज्रासनेन जापोऽधिमेरु यदिवेत्यमावास्याः ॥ (यु.) २०४

प्रथमप्रस्थाने वा स्तुतिपदसङ्ख्यं च निरशनविधानम् ।
मुदा आनुपूर्वियुगादृष्टाधिसहस्रपरिजपात् सिद्धिः ॥ २०५

पञ्चप्रस्थानांशैः कोट्यंशः फलद एव विषमांशः ।
मध्यफलस्तु समांशो गुरुक्रमादंशगणनमन्वेष्यम् ॥ २०६

लग्नस्यार्चाकाले विद्यालग्नेऽथ मेरुमन्त्रांशाः ।
षोडश देया यस्मादेते तीर्थान्तमनुयान्ति ॥ २०७

गौतमकेवलिनोक्ता एकादश मेरवः श्रुतधरैस्तु ।
दश वज्रेण नवैते नागेन्द्राद्यैर्नवादिपञ्चान्ताः ॥ २०८

अष्ट-नवव्युच्छित्तिर्नागेन्द्राः सप्त वैद्यिकाः षडमी ।
चान्द्राः पञ्च-मुनि-नगा....मया परम् ॥ २०९

द्वि-त्र्यधिक-दश-गजैक-जिन-रदनसङ्ख्यलब्धिपदी ।
दृष्टैकोना पूर्णा चत्वारिंशद् दशसमेताः ॥ २१०

(सप्तदेवाद्रिरहस्यम्)

त्र्यधिकदशलब्धिपदैर्मुनिमेरुभिरथ दर्शयामि मन्त्रविभुम् ।
वलयाकृत्या लेख्या पञ्चप्रस्थानीह वलयपञ्चकतः ॥ २११

तथाहि,

"आइम्मि इक्कपणवो नमो जिणाणं च ओहि य जिणाणं ।
परमोहिजिणाण तहा नमो य सव्वोहि य जिणाणं ॥ २१२

"तहऽणंतोहिजिणाणं अणंताणंतोहिजुयजिणाण नमो ।
सामन्नकेवलीणं भवाभवत्थाण तेसि नमो ॥ २१३

"उग्गतवचरणचारीणमेवमित्तो नमो नमो होइ ।
चउदस-दसपुव्वीणं नो तहिक्कारसंगीणं ॥ २१४

"सव्वेसिं एसिं नमोक्कारं तहा अहं किच्चा ।
जमियं विज्जं पउंजामि सा मे विज्जा पसिज्झउ स्वाहा "॥२१५

षट्-सप्त-नवाष्ट-नवैकादश-नव-नन्द-धर्म-रवि-नवकम् ।
सप्ताष्ट-त्रि-त्रि-चतुर्द्विकैक-युग (द्विकयुगैक)-
युग्म-चतुरेकाः ॥ २१६

एक-द्वि-चतुर्युग्मं प्रथमप्रस्थानरस-युगपदानाम् ।
वर्णैर्भूतयुगभुवः सङ्ख्या देव्यादिकं प्राग्वत् ॥ २१७

स्नान-विलेपन-वासो-माला-कोटीर-तिलक-कुण्डलकम् ।
ग्रैवेयं श्रीवत्सो हारः केयूरयुग्ममाद्यपदैः ॥ २१८

"पणवो नमो भगवओ बाहुबलिस्सेह पण्णसमणस्स ।
ॐ वग्गुं वग्गुं निवग्गुं निवग्गुं च सुमण-सोमणसे ॥ २१९

"महुमहुरे ॐ इरियाए किरियाए तहेव गिरियाए ।
पिरियाए सिरियाए हरियाए आयरियाए स्वाहा ॥ २२०

शैलाक्ष-रसेन्द्रिय-षट्-त्रि-चतुः-पञ्च-व्रतानि युगषट्कम् ।
द्वे प्रस्थानेऽमुष्मिन् द्व्यधिसप्ततिवर्णपरिपाटी ॥ २२१

मधुमधुरजिनानन्तरमाये तीर्थान्तरे सुधर्माप्तौ ।
'इरि' शब्दात् तीर्थान्तरभवसल्लब्धिसूरिविन्यासः ॥ २२२

'किरि' सद्द्रव्यपदं 'गिरि' सर्वगुणाः 'पिरी'ति पर्यायाः ।
'सिरि हिरि आयरिय'पदोक्तेरुत्पत्ति-ध्रौव्य-विगमवचः ॥२२३

द्रव्यं गुण-पर्यायोत्पत्ति-ध्रुव-विगमकलितमिह वेत्ति ।
अर्हन्निव तीर्थान्तरभावी सूरिः प्रवचनाय ॥ २२४

प्राग्वद् देवीजापावत्रापि यतेस्तथैव निर्दिष्टौ ।
पण्हिसमणेति स्वप्ने समग्रमेतत् सुभग-वश्ये ॥ २२५

'पणवो इरि-किरि-गिरि-सिरि-हिरि-
पिरि-आयरियकालि-महाकालि ।
पवणं गयणं' तइए पत्थाणे देविविन्नासो ॥ २२६

भूताऽम्बुधि-पञ्चक-षड्-वेद-युगैरक्षरास्तु शैलगुणाः ।
त्रिप्रस्थाने लक्ष्मीर्देवी यदिवा महाकाली ॥ २२७

'इरि किरि' चक्रैकभुजा 'गिरी'ति रस-भूतदिक्कुमार्योऽथ ।
'सिरि हिरि' नन्दा भद्रा जया च विजयाऽपराजिया(ता) ॥२२८

शासनविद्यादेव्यः 'पिरी'ति 'आयरियकालि' जिनदेव्यः ।
'महकाली' सङ्घस्य च गत्युपदेष्ट्री विरोधिशान्तिकरी ॥२२९

'ॐ इरिइरि-किरिकिरि-गिरिगिरि-पिरिपिरि-सिरिसिरि-
हिरिहिरिकालिं ।
आयरियकालि-पवणो गयणं' तह मंतपीढम्मि ॥ २३०

शैल-रसषट्क-युग्मं पदाक्षरैः पञ्चवार्द्धिसङ्ख्याऽभूत् ।
तुर्ये मन्त्रात् पीठे जापाधिष्ठायकं प्राग्वत् ॥ २३१

देवाद्रिसमानपदैः कालिपदैर्भाव्यमत्र तत् सत्यम् ।
न्यूनाधिकैरपि तथा गुरुवशतस्तत्र न भ्रान्तिः ॥ २३२

'इरिइरि-किरिकिरि' कल्पाधिपतिपदं 'गिरिगिरी' ति भुवनेन्द्राः ।
'पिरिपिरि' च वानमन्तरनाथाः 'सिरिसिरि' च चन्द्रार्काः ॥२३३

'हिरिहिरि' वरगणिपिटकप्रमुखेन्द्रसमानदेवविन्यासः ।
'आयरि' लोकान्तिकसुरविन्यासो ध्यानदृश्यवपुषोऽमी ॥२३४

तपोऽधिष्ठायकादि प्राग्वत् ।
पणवो माया-लच्छी-इरि-किरि-गिरि-पिरि-सिरि-हिरि-
आयरिय ।
मेरुपयं' सव्वत्थवि पज्जंते मंतरायम्मि ॥ २३५

त्रिक-युगषट्क-रस-युग्मपदाक्षरैर्भूतलोकसङ्ख्याऽत्र ।
सर्वपदान्यष्टरसा वर्णा युग-लोक-जैनरत्नमिताः ॥ २३६

श्लोका दश वर्णास्तु स्वरसङ्ख्या सूरिमन्त्रराजस्य ।
सर्वेन्द्रा अधिपतयः प्राग्वज्जापस्तपश्चापि ॥ २३७

एष विशेषः प्रागुक्तसुरीपूज्या जिनाश्रया देव्यः ।
'इरि'तः श्रुतदेव्यः 'किरि'तोऽभयदा 'गिरी'ति निर्वृतिदा ॥२३८

'पिरि'तोऽत्र शान्तिदेव्यः 'सिरि-हिरि' श्री-ह्री स्वनामफला ।
धृति-कीर्ति-बुद्धि-लक्ष्म्यो जम्भा-मोहादयश्चात्र ॥ २३९

'आयरि' बलदा देव्य एता उत्सर्गसंस्मृतेः साक्षात् ।
तीर्थान्तरेषु साधूपदिष्टकार्याणि तन्वन्ति ॥ २४०

तेन गुरुर्नन्द्यादावुत्सर्गं वितनुतेऽयमेकस्याः ।
सर्वासामिह स स्यात् क्रमशः श्रुतदेवतादिफलम् ॥ २४१

सङ्घे श्रुते तपस्यपि महत्त्वमथ दुष्टदेवतो रक्षा ।
शैल-पुर-चैत्यरक्षणमष्टाङ्गनिमित्तविज्ञानम् ॥ २४२

सर्वार्तिहरा श्रीः ह्रीः क्षुद्रोपद्रवविनाशिनी सङ्घे ।
आसां तपो निरशनं 'प्रणव-ह्रीँ' जाप उत्सर्गे ॥ २४३

'इरि' शब्दाच्च्यवनमहः किरि' जन्ममहो 'गिरि' नृपपदर्द्धिः ।
'पिरि' दीक्षाकल्याणं 'सिरि' कैवल्यमथ समवसरणम् ॥२४४

'हिरि'तस्त्रिजगत्पूजा 'आयरि' सङ्घः समोक्षपदलक्ष्मीः ।
एतद्रूपो ध्येयः श्रीवीरो मन्त्रराजो वा ॥ २४५

दिग्मात्रमियं व्याख्या सम्यग् जानन्ति पूर्वविद एताम् ।
यस्मादस्य स्मरणात् त्रिभवे शुद्धिस्त्रिशुद्धस्य ॥ २४६

षष्ठे वलये चतुरधिविंशतिजिनमूर्तयः स्वलक्ष्मयुताः ।
सप्तमके तावन्त्यो विद्याः स्युर्वद्‌र्धमानाद्याः ॥ २४७

अन्तश्च वीरमूर्तिः 'सुमणे-सोमणस' नाम चमरधरौ ।
पादाधो ग्रहनवकं दक्षिणतो गौतमो भगवान् ॥ २४८

मूर्तिर्दक्षिणकोणे ऊर्ध्वं देवी सरस्वती वामे ।
लक्ष्मीरधश्च वामे गणिपिटकाख्यः स यक्षेन्द्रः ॥ २४९

दक्षिणतो मानुषनगशिखरे त्रिभुवनविभुत्वभृद् देवी ।
आत्मगुरुरात्ममूर्तिः सौधर्मेन्द्रादयो यथायुक्ति ॥ २५०

यक्षस्य च पणपन्नीनाम्नो निकटेऽथ यक्षिणीनग्ना ।
मुत्कलकेशाऽऽच्छादितपृष्ठिः सत्फलितवृक्षतले ॥ २५१

दक्षिणकटीस्थ-दक्षिणपाणिर्वामकरमोदकसपात्रा ।
'ॐ पाशाङ्कुश-माया-सयक्षिणी नमः' इति मन्त्रः ॥ २५२

करजापे प्राग्लक्षश्चैको जातीकुसुमानि सहस्राः ।
दश होमश्च दशांशः सिद्धा सत्पुष्पफलदा स्यात् ॥ (त्रिभि.) २५३

## स्तुतिपदी ( ३२-२४ )रहस्यम् ।

द्वात्रिंशतमुत चतुरधिविंशतिमादौ विधाय तल्लब्धिपदीम् ।
प्रागुक्तमेव शेषं गुरुवशतः किञ्चिदन्यदपि ॥ २५४

"जिण-ओहि-परमोहि-अणंतोहि-अणंताणंतोहिजिणे ।
केवलि-भवत्थकेवलि-अभवत्थ य केवलीणं च ॥ २५५

"उज्जुमई विउलमई वेउव्वियलद्धि-सव्वलद्धीणं ।
पण्णासमणाण तहा तह जंघाचारणमुणीणं ॥ २५६

“विद्यासिद्धाण तहा अगासगामीण तह य निच्चं पि ।
आमोसहि–विप्पोसहि–खेलोसहि–जल्लमोसहीणं च ॥ २५७

“सव्वोसहि–आसीविस–दिट्ठिविसाणं च तह य निच्चं पि ।
वयणविस–तत्तलेसाण पणमिमो सीयलेसाण ॥ २५८

“चउदस–दसपुव्वीणं इक्कारसअंगसुत्तधारीणं ।
संभिन्नस्सोयाणं दुवालसंगसव्वसिद्धाणं ॥ २५९

“उग्गतवचरणचारीण बत्तीस थुइपमाणमिणं ।
आइम्मि नमो ॐ ह्रीँ पढमपया छट्ठीबहुवयणं ॥ २६०

“सव्वेसिं एएसिं एवं किच्चा अहं नमोक्कारं ।
जमियं विज्जं पउंजामि सा मे विज्जा पसिज्झउ स्वाहा” ॥२६१

पञ्चाद्रि–नन्द–नवकं रुद्राः षण्णव–दशाद्रि–गज–नवकम् ।
सप्ताष्ट–दश–भयाष्टक–नवपञ्चक–सप्त–शैल–गजाः ॥२६२

सप्त–भय–नन्द–शैलाः सूर्याष्टार्कद्वयं प्रणव–माया ।
सर्वत्रादाविति युग–रसाश्च सर्वेऽक्ष–वह्नि–गुणाः ॥ २६३

शेषशशि–लोकवर्णैः त्रिशती–षट्–षष्टिरत्र च श्लोकाः ।
एकादश–चतुरधिदशवर्णा द्विगुणपदसङ्ख्या ॥ २६४

“खीरासव–महुआसव–अमयासवलद्धियाण पत्तेयं ।
अक्खीणमहाणसिलद्धियाण संभिन्नसोयाणं ॥” २६५

“तत्तो पयाणुसारि य लद्धीणं तह य बीयबुद्धीणं ।
कुट्ठबुद्धीण अट्ठ य सव्वपया ॐ नमो पुव्विं” ॥ २६६

“जिण–ओही आरब्भा वेउव्वियलद्धि जाव इक्कारो ।
चउदस–दसपुव्वीणं तेय–वयण–इक्कारसंगीणं” ॥ २६७

एए चउवीसपया नायव्वा परमसूरिमंतम्मि ।
मायावन्नविरहिए नूणं सुमरिज्जए निच्चं ॥ २६८

"सव्वेसिं एएसिं एवं किच्चा अहं नमोक्कारं ।
जमियं विज्जं पउंजामि सा मे विज्जा पसिज्झउ स्वाहा" ॥२६९

नव-दश-शून्यैकाऽर्का गजाङ्क-भय-शैलतः पदाष्टकजाः ।
वर्णा द्विनगा एकादशपद्यां स्युर्नवतिवर्णाः ॥ २७०

नन्दाद्रि-रवि-नगाष्टकमिति पञ्चपदेषु गुण-युगा वर्णाः ।
प्रणवा जिनमाः शेषाः पदवर्णाः शशि-गुणप्रमिताः ॥ २७१

सर्वाक्षरसंयोगाद् द्विशती षष्ट्यधिकाः ततः श्लोकाः ।
चतुरक्षराधिकाष्टा वाद्यप्रस्थानके ज्ञेयाः ॥ २७२

"पणवो नमो भगवओ बाहुबलिस्सेह पण्णसमणस्स ।
ॐ वग्गु वग्गु निवग्गु सुमण-सोमणसे महुमहुरे स्वाहा" ॥२७३

त्र्यक्ष-रस-पञ्च-पावक-गुण-युग-भूताक्षरैः पयोधि-गुणाः ।
वर्णा द्विप्रस्थाने देवी स्वप्नादिकं प्राग्वत् ॥ २७४

"इरिकाली किरिकाली पिरिकाली हिरियकालि-मरु-गयणं ।"
तइयं पत्थाणमिणं अट्ठारस अक्खरा तत्थ ॥ २७५

'इरियाए किरियाए पिरियाए सिरियाए तह य हिरियाए ।
कालि-महाकालि' तुरियं उपविज्जा अक्खराइ छव्वीसं ॥२७६

'पणवो किरिकिरिकालि पिरिपिरि सिरिसिरि हिरिहिरि
आयरियकालि ।
मरुयं गयणं' मंडलपीढे वन्ना य तेतीसं" ॥ २७७

"ॐ किरिकिरि ॐ पिरिपिरि ॐ सिरिसिरि ॐ
हिरिहिरि ॐ आयरिय।"
दुगुणमेरु इह मंते इगवीसवन्ना एवं छपत्थाणा ॥ २७८

पञ्चप्रस्थानाक्षरयुग–गुण–भूमिर्द्विगुणपदकवर्णाः ।
युक्ताः श्लोकाः पञ्चाधिकदश–हस्त्येकवर्णमिति ॥ २७९

पञ्चप्रस्थानाक्षरयुग–गुण–भूमिर्जिनाङ्कपदवर्णाः ।
युक्ताः श्लोका द्वादश वर्णा अष्टौ महामन्त्रे ॥ २८०

परमेष्ठिमुद्रयाऽसौ मन्त्रः सकलोऽपि हिमरुचिः श्वेतः ।
एकं लक्षं जप्तः शान्तिकृते व्योमतो मुक्त्यै ॥ २८१

द्विप्रस्थानं पीतध्याने षोडशसहस्रकरजप्तम् ।
सौभाग्यमुद्रया यदि स्त्रीणां श्रीणां महावश्यम् ॥ २८२

त्रिप्रस्थानं जातीकुसुमार्कसहस्रजापतः सिद्धम् ।
सारस्वतं शुभाशुभमुपदिशति निशि स्वप्नमध्ये ॥ २८३

तुर्यं प्रस्थानमिदं किंशुकशुकमुखसमानवर्णमिह ।
षोडशसहस्रजप्तं गिरिमुद्रातश्च वश्यकरम् ॥ २८४

पञ्चप्रस्थानपदी वर्णोद्भवधूमसङ्कुलं शत्रुम् ।
यो ध्यायति त्रिसन्ध्यं दूरात् तस्यारिरपयाति ॥ २८५

नगमन्त्रः कृष्णरुचिश्चक्रोद्यन्मुद्रया त्रिसन्ध्यमपि ।
अष्टाधिशतं मासं यावत् शत्रोर्ध्रुवं मृत्युः ॥ २८६

यदिवा,
दिक्–कालासन–मुद्रावर्णैरेकैकपदमपि ध्यातम् ।
तत् तत् करोति कार्यं शान्त्याद्यं शुद्धधर्मस्य ॥ २८७

रदन-जिनसमस्तुतिपदयुक्तः पञ्चामराद्रिभृन्मन्त्रः ।
वलयषट्केन दृष्टो मध्ये श्रीवीरमूर्तिधरः ॥ २८८

## षोडशस्तुतिपदीपूर्वदेवाद्रिपञ्चकरहस्यम्

प्रथमं विद्यापीठम् ।

अथ षोडशस्तुतिपदीपूर्वप्रस्थानषट्कसर्वपदैः ।
कल्याणत्रिकरूपं ध्यानं यत् तदधुना वक्ष्ये ॥ २८९

"जिण-ओहि-परमोही तहऽणंताणंतओहिजिणे ।
केवलि-भवत्थकेवलि-अभवत्थ य केवलीणं च ॥ २९०

"चउदस-दसपुव्वीणं इक्कारसअंगि-कुट्ठबुद्धीणं ।
बीयाइमबुद्धीणं तहुग्गतवचरणचारीणं ॥ २९१

"गोयमसामिस्स महादाणस्स सुहम्मसामिणो तह य ।
सोलसपयाण पुव्विं नायव्वो ॐ नमो सद्दो ॥ २९२

"एएसिं सव्वेसिं एवं काउं अहं नमोक्कारं ।
जमियं विज्जं पउंजामि सा मे विज्जा पसिज्झउ स्वाहा" ॥२९३

द्वितीयमुपविद्यापीठम् ।

"ॐ इरिइरिकालि किरिकिरिकालि पिरिपिरिकालि
गिरिगिरिकालि ।
सिरिसिरिकालि हिरिहिरिकालि आयरियकालि स्वाहा ॥२९४

समवसरणे पूजा, उच्छीर्षके स्वप्नं शुभाशुभोपदेशः ।

"पणवो नमो भयवओ बाहुबलिस्सेह पण्णसमणस्स ।
ॐ वग्गु वग्गु निवग्गु सुमणे सोमणसे महु तहा महुरे" ॥२९५

तृतीयं चतुर्थं पीठम्

"इरिकाली किरिकाली पिरिकाली हिरि य कालि इरियाए ।
किरियाए सिरियाए हिरियाए कालि महकाली ॥" ॥ २९६

पञ्चमं षष्ठं प्रस्थानम् ।

"ॐ इरिइरि किरिकिरि पिरिपिरि सिरिसिरि हिरिहिरि ।
आयरियकालि पवणो गयणं किरिमेरु पयपणगं ॥" ॥ २९७

(पञ्चप्रस्थानशब्दरहस्यम्–)

स्नान–विलेपन–माला–मुकुटस्तिलक–कुण्डलद्वन्द्वम् ।
ग्रैवेयमङ्गदयुगं हारः केयूरयुगलं च ॥ २९८

सितवस्त्रदान–दीक्षे गणचिन्ता षोडश स्तुतिक्रमतः ।
'एएसिं' गाथार्थात् त्रैलोक्यातिशयसौभाग्यम् ॥ २९९

'बादुबलि'तोऽथ केवलकल्याणं 'वग्गु वग्गु' सदशोकः ।
तद्व'न्निवग्गु' सिंहासन'मपरपदे' च चमरधरौ ॥ ३००

'महुमहुरे' प्राकारो रत्नमयः सर्वपरिषदा प्रथमः ।
'इरिकालि'पदचतुष्कात् सुवर्णशालो द्वितीयोऽथ ॥ ३०१

'इरियाए' पदषट्कात् राजतशालस्तृतीयको रम्यः ।
'इरिइरिकालि' रसपदाद् देवकृतातिशयसर्वस्वम् ॥ ३०२

'किरिमेरु'पद चतुष्काच्चतुर्मुखः 'पञ्चमात्' तु सद्धर्मम् ।
योजनगिरा दिशन्निह "सर्वं ज्ञात्वा त्रयं चान्तः ॥ ३०३

यदिवा

नगपदवाद्धेश्चतुराननोऽत्र वीरोऽथ पञ्चमगणभृत् ।
मुख्यः सुधर्मनामा स गौतमः पुण्डरीकश्च ॥ ३०४

ध्यायन्निति मन्त्रममुं महाव्रती विजितपवन-गगनमनाः ।
आत्मानं सर्वज्ञं पश्यति शिष्यं सुधर्मपदे ॥ ३०५

रस-गज-दश-दश-सूर्याः शैलाशा-रुद्र-दश-गजाः नवकम् ।
सप्ताष्ट-त्र्यधिक दश-स्वरा नव स्तुतिपदेष्वेषु ॥ ३०६

अक्षरसङ्ख्या द्वीन्द्रिय-शशिनः 'सव्वेसिं' इति मुखे वर्णाः ।
स्वाहान्ते एकगुणाः आद्यप्रस्थानके त्र्यशीतिशतम् ॥ ३०७

त्र्यक्ष-रस-भूत-लोका गुण-युग-पञ्च-युगपद-नवकवर्णाः ।
प्रणव-नमो महुमहुरे स्वाहान्तं रस-गुणमिता ह्येते ॥ ३०८

इरिकाली हिरिकाली स्वाहान्तं चन्द्र-दिग्गजप्रमिताः ।
प्रत्येकं चतुरक्षरचतुःपदैः पीठमिदमपरम् ॥ ३०९

इरियाए महकाली स्वाहान्तं हस्ति-युगमिता वर्णाः ।
षट्पदपीठे तुर्ये पीठे कुत्रापि न स्वाहा ॥ ३१०

ॐ इरिइरिकाली स्वाहान्तं षड्भिः पदैः परं पीठम् ।
शैल रस-वार्धि-दश-युगपदवर्णैर्गुण-युगाः सङ्ख्या ॥ ३११

सप्रणव-मेरुपञ्चकपदाक्षरैः पञ्चवार्द्धिभिर्नवभिः ।
नव-युगसङ्ख्या वर्णाः पीठमिदं मन्त्रराजाख्यम् ॥ ३१२

सर्वप्रस्थानाक्षरसंयोगाददि-लोक-गुणवर्णाः ।
श्लोकदशकं च वर्णाः सप्तदशेहास्य पीठे स्युः ॥ ३१३

(ॐकारनिष्पत्तिः-)

अर्हददेहाचार्योपाध्याय-मुनीन्द्रपूर्ववर्णोत्थः ।
प्रणवः सर्वत्रादौ ज्ञेयः परमेष्ठिसंस्मृत्यै ॥ ३१४

अर्हत्-सिद्धाचार्योपाध्याय-मुनित्वरूपमर्हन्तः ।
पूज्योपचार-देशक-पाठक-निर्विषयचित्तत्वात् ॥ ३१५

ज्ञात्वा त्रिशलासूनोर्जन्मस्नात्रं सदानविरतिमहः ।
केवलिमहिमेत्येवं कल्याणत्रयमत्र मन्त्रपदैः ॥ ३१६

त्रयोदशदेवाद्रिरहस्यम् ।

एक-गुणस्तुतिपूर्वं यदिवा नव-लोकलब्धिपदपूर्वम् ।
षट्कोणतस्त्र्यधिदश देवाद्रिरहोऽथ वक्ष्येहम् ॥ ३१७

"जिण-ओहि-परमोही अणंतोहि-अणंतणंतोहिजिणो ।
केवलि-भवत्थकेवलि-अभवत्थ य केवलीणं च ॥ ३१८

"ऊजुमई विपुलमई वेउव्वियलद्धि-सव्वलद्धीणं ।
पण्हासमणाण तहा जङ्घाचारणमुणीणं च ॥ ३१९

"विज्जासिद्धाण तहा आगासगामीण तह य निच्चं पि ।
आमोसहि-विप्पोसहि-खेलोसहि-जल्लओसहीणं च ॥ ३२०

"सव्वोसहि-आसीविस-दिट्ठिविसाणं च तह य निच्चं पि ।
वयणविस-तेयलेसा पणमिमो सीयलेसाणं ॥ ३२१

"चउदस-दसपुव्वीणं इक्कारसअंगसुत्तधारीणं ।
तह य दुवालसअंगीण उग्गतवचरणचारीणं" ॥ ३२२

इय इक्कतीससंखा लद्धिपयाणं तु पढमपत्थाणे ।
सिरिपुण्णचंदसूरीहिं वन्निया पणव-मायजुया ॥ ३२३

"खीरासव-महुआसव-अमयासवलद्धियाण तह चेव ।
अक्खीणमहाणसिलद्धियाण संभिन्नसोयाणं ॥ ३२४

"तत्तो पयाणुसारी सबीयबुद्धीण कुट्ठबुद्धीणं ।"
इगतीसं पुव्वुत्ता अट्ठजुया इगुणचत्ता य ॥ ३२५

पणवो मायावन्नो पढमपयाइम्मि इत्थ अन्नेसु ।
सव्वेसु आइ पणवो मंतो सूरीण पढमथुइवलये ॥ ३२६

'सव्वेसिं एएसिं' एवम् ।
सप्ताष्टौ दश-दशकं सूर्याद्रि-दशाष्टमूर्ति-गज-नवकम् ।
दश-दिग्गज-नव-रुद्राष्टाङ्क-दशत्रितय-रुद्र-दश-शैलाः ॥३२७

अद्रि-नव-हस्ति-मद-दश-गज-स्वरा-दश त्रयोदश च ।
दश रुद्रत्रय-नवयुगमष्टाष्टौ सर्वलब्धिपदवर्णाः ॥ ३२८

एषां समग्रसङ्ख्या नव-रस-लोकास्तु 'एसिं सव्वेसिं' इति ।
शशि-गुणाक्षरयुताश्चतुःशती प्रथमपीठतो वर्णाः ॥ ३२९

वलयाकृत्याऽऽलेख्या यदिवा नृपदल-नभो-युगपददलेषु ।
एकत्रिंशन्नव-गुणपदस्थितिः प्रातर्भणितयुता ॥ ३३०

"पणवो नमो भगवओ बाहुबलि पण्णासमणस्स ।
"पणवो दुवारवग्गु-निवग्गु सुमणे तहेव सोमणसे ।
महुमहुरे इरिकाली किरि पिरि सिरि हिरिजुया काली ॥३३१

"ॐ इरियाए किरियाए पिरियाए तहेव सिरियाए ।
हिरियाए कालिजुगं महकाली पवण-गयणं च ।" ॥ ३३२

गुण-वेद-पञ्च-रस-मद-जगदिन्दु-युगास्त्रि-वार्धि-युगलं च।
भूत-गुण-द्विक-वारिधि-पञ्च-चतुःपञ्चकं विषयाः ॥ ३३३

वारिधिरस-युग्ममथैकोनत्रिंशत्पदाक्षरैः प्रमितिः ।
गुण-चन्द्र-भूमिवर्णाः द्विप्रस्थानं वलयलेख्यम् ॥ ३३४

इरिइरि किरिकिरि पिरिपिरि सिरिसिरि हिरिहिरि पए पए कालि ।
आयरियकालि पवणो गयणमिणं तइयपत्थाणं ॥ ३३५

रसषट्क-युगं नगपदवर्णैर्दिग्गज-गुणप्रमाणमिदम् ।
वलयाकृत्या लेख्यं प्राग्वद् देव्यादि सर्वत्र ॥ ३३६

'ॐ ह्रौँ इरिसुरसेलो इरिमेरु तहेव किरिमेरु ।
किरिकिरिमेरु गिरिनग गिरिगिरिमेरु य पिरिमेरु ॥ ३३७

'पिरिपिरिमेरु सिरिनगो सिरिसिरिमेरु तहेव हिरिमेरु ।
हिरिहिरिमेरु ॐ ह्रौँ श्रीँ अर्हँ आयरियमेरू ॥ ३३८

'मम सर्वसिद्धिमुच्चैः कुरु कुरु पवनो नभो'ऽथ षट्कोणे ।
अन्तर्बहिश्च सृष्ट्या लेख्यं मध्ये तदन्त्यपदम् ॥ ३३९

रस-षट्-युगान्तररसाः षडेव युग्म समुद्र-देव-युग[म्] ।
अष्टादशपदवर्णैस्तुर्ये पीठे चतुरशीतिः ॥ ३४०

सर्वप्रस्थानाक्षरसंयोगात् पञ्च-गुण-रसा-वर्णाः ।
श्लोका नवेन्दवस्त्विह वर्णाः संयतगुणप्रमिताः ॥ ३४१

## ( ह्रौँकारस्वरूपम्- )

प्रणवः प्रागुक्तार्थो मायावर्णेऽर्हदादिपञ्चकताम् ।
अन्तश्चतुरधिर्विंशतिजिनस्वरूपमथो वक्ष्ये ॥ ३४२

अर्हन्तो वर्णान्तः रेफः सिद्धाः शिरश्च सूरिरिह ।
शुद्धकलोपाध्यायो दीर्घकला साधुरिति पञ्च ॥ ३४३

अर्हन् शशि-सुविधिजिनौ सिद्धाः पद्माभ-वासुपूज्यजिनौ ।
धर्माचार्याः षोडश मल्लिः पार्श्वोऽप्युपाध्यायः ॥ ३४४

सुव्रत-नेमी साधुस्तत्रार्हन् चन्द्रप्रभो रुजां शान्त्यै ।
सिद्धाः सिन्दूराभास्त्रैलोक्यवशीकृतिं कुर्युः ॥ ३४५

सिद्धाक्षररेफाकृति वाग्बीजं वश्यमूर्ध्नि वदने वा ।
आज्ञाचक्रे चारुणरोचिर्वश्यं तनोत्यथवा ॥ ३४६

आचार्याः स्वर्णनिभाः कुर्युर्जल-वह्नि-रिपुमुखस्तम्भम् ।
सूर्यक्षरशीर्षाकृतिदण्डहता न स्युरुपसर्गाः ॥ ३४७

नीलाभोपाध्यायो लाभार्थं शुक्ल-नीलकृद् यदिवा ।
अध्यापकार्द्धचान्द्री कलाऽऽत्मलाभाय परगलके ॥ ३४८

कृष्णरुचः साधुजिनाः क्रूरदृशोच्चाटमृत्युदाः शत्रोः ।
साधू स्वरदीर्घकलाकृत्यङ्कुशमुद्रया हता रिपवः ॥ ३४९

अर्हन्नम्भः सिद्धस्तेजः सूरिः क्षितिः परे वायुः ।
साधुर्व्योमेत्यन्तर्मण्डलतत्त्वानुगं सदृग् ध्यानम् ॥ ३५०

'नादो'ऽर्हन् 'व्योम' मुनिः 'कला'ऽथ सिद्धाः 'शिरो हरः' सूरिः ।
'ई'कार उपाध्यायो मायायां प्राग्वदुत शेषम् ॥ ३५१

शशि-सुविधिजिनौ नादो बिन्दुर्मुनिसुव्रतो व्रती नेमी ।
उद्यचन्द्रकलातः सिद्धौ पद्माभ-वासुपूज्यजिनौ ॥ ३५२

वर्णान्तः सशिरो रः षोडश सूरीश्वरास्तथेकारः ।
पार्श्वो मल्लिर्वाचक इदमपि न विरोधि पूर्ववद् भणितम् ॥३५३

एकैकोऽर्हत्प्रभृति शतादिवर्णानुगोऽनिशं ध्यातः ।
शान्त्यादिकर्मषट्कं करोति किन्त्वत्र दिङ्मात्रम् ॥ ३५४

परमेष्ठिपञ्चनिर्मितजिनमयमाचार्यमेरुमर्हन्तम् ।
त्रैलोक्य-श्रीबीजं सर्वं ध्यायति स सर्वज्ञः ॥ ३५५

षट्कोणाकृतिदेहे मध्ये नरमेरुसूर्यबिम्बस्थम् ।
यः सूरिमेरुमन्तः स्वं पश्यति सोऽपि सर्वज्ञः ॥ ३५६

शङ्खिन्यन्तःशुषिरितवंशाग्रविलासिमौलिमेरुमये ।
आचार्यमेरुरात्माऽर्हन्निन्दुबिम्बस्थः ॥ ३५७

चन्द्रार्कशक्रसङ्गमसमरससिक्तं स्वमौलिमेरुस्थम् ।
यः सूरिमेरुमर्हं स्वं पश्यति सोऽत्र योगीन्द्रः ॥ ३५८

**पञ्चप्रस्थानगतं त्रयोदशदेवाद्रिरहस्यम् ।**

त्र्यधिदशसुराद्रिसङ्गतपञ्चप्रस्थानमन्त्रमथ वक्ष्ये ।
मन्त्रादौ पाठे स्तुतिपदानि यावन्ति तावन्ति ॥ ३५९

पूजाऽर्हेऽथ यन्त्रे सूर्यमिताष्टाधिदशपदी वा स्यात् ।
विद्यापीठं षोडशवलकैर्लेख्यं तु 'सिज्झउ' पदान्तम् ॥ ३६०

तत्राष्टादशपद्यां त्रि-तुर्यवलकेऽथ नवम-दशमे वा ।
प्रत्येकं पदयुगलं अन्त्यालोपोऽन्तिमे वलये ॥ ३६१

बारसपयाइं 'पणवो नमो जिण नमोहि य जिणाणं ।
परमोहिजिणाणं तह नमो अणंतोहि य जिणाणं ॥ ३६२

'एवमणंताणंतोहिजिणाण नमो तहा नमो पुव्वं ।
सामन्नकेवलीणं भवाभवत्थाण तेसि नमो ॥ ३६३

'उग्गतवचरणचारीणमेवमित्तो नमो नमो होइ ।
चउदस-दसपुव्वीणं नमो तहेक्कारसंगीणं ॥ ३६४

"एएसिं सव्वेसिं एवं किच्चा अहं नमोक्कारं ।
जं इयं विज्जं पउंजे सा मे विज्जा पसिज्जेज्जा स्वाहा"॥३६५

रस-गज-दश-दश-सूर्या दश-दश-रुद्रास्त्रयैक-शून्यैकम् ।
मद-नन्दाः सर्वाग्रं सप्तदशाधिकशतं वर्णाः ॥ ३६६

'एएर्सि'इत्याद्यैर्नवद्विकैः सङ्गता रस-युगैकाः ।
'स्वाहा'न्तैरप्यथवा गज-युगेन्दवः प्रथमपीठे स्युः ॥ ३६७

"पणवो नमो भगवओ बाहुबलिस्सेह पण्हसमणस्स ।
सुमणे सोमणसेवि य सिज्झउ मे
भगवइ महई विज्जा स्वाहा"॥ ३६८

गुण-वेदाक्ष-रसेन्द्रिय-लोकैक-युगास्त्रि-वार्द्धि-युगलमिति ।
एकादशपदवर्णाः शून्य-युगा वलयतो लेख्याः ॥ ३६९

"पणवो दुवारवग्गु दुनिवग्गु सुमणे य सोमणसे ।
महुमहुरे इरिकाली किरिकाली तह य गिरिकाली ॥ ३७०

"सिरिकाली पिरिकाली हिरिकाली तह य चेव इरियाए ।
किरियाए गिरियाए पिरियाए तह य सिरियाए ॥ ३७१

"हरियाए कालीकाली महकाली पवण-गयणमह अंते ।"
इगुणीसपए सोलसवलयेहिं तइयपत्थाणं ॥ ३७२

इन्द्रिय-रस-गुण-वारिधि-पञ्चकमथ वारिधित्रयोदशकम् ।
षडमीभिर्वर्णमिति सैकाशीतिस्तृतीये स्यात् ॥ ३७३

"इरिइरिकाली किरिकिरिकाली
गिरिगिरि पिरिपिरि सिरिसिरि य ।

हिरिहिरि य जुया य काली
आयरियकाली मरु-गयणं ॥" ३७४

आद्यपदेषु षट्स्वपि प्रतिपदषट्कं परे पदे च गजाः ।
सप्रणवा युग-पञ्चकवर्णा वलयाभितो न्यस्याः ॥ ३७५

'इरिमेरु-इरिनग-किरिमेरु किरिकिरिमेरु गिरिमेरु इति ।
गिरिगिरिमेरु पिरिनग पिरिपिरिमेरु तहेव सिरिमेरु ॥ ३७६

'सिरिसिरिमेरु हिरिनग-हिरिहिरिमेरु तहेव आयरिय ।
मेरु मरु-गयणमंतो' पणवाई इत्थ न हु गणिया ॥ ३७७

चतुरन्तररसषट्कं गजास्तु वर्णा इहाष्टषष्टिरभूत् ।
पञ्चप्रस्थानाक्षरसंयोगाद् गगन-गज-लोकाः ॥ ३७८

एकादश च श्लोका वर्णा अष्टद्विकं सकलमन्त्रे ।
अष्टादशपद्यामपि विचार्य कार्याक्षरैः सङ्ख्या ॥ ३७९

**षोडशपदैः प्रथमप्रस्थानम् ।**

षट्कोणान्तर्बीजं बहिस्थमेरुपदषट्कमथ वलयैः ।
वेदमितैश्च नृपस्तुतिपदपूर्वं मन्त्रमालिखति ॥ ३८०

षोडशदलप्रतिपदं 'ॐ ह्रीँ' पूर्वपदाग्रतः प्रणवः ।
कूटः स्वाहाऽन्त्यपदद्वये तु कूटाक्षरो नास्ति ॥ ३८१

ज-ह-प-स-क-य-भ-च-श-ढाक्षरेषु
सकलवर्यऊं च संपिड्यम् ।
शेषपदेषु त्रिष्वपि क्रमेण कूटत्रयं प्रथमम् ॥ ३८२

'नमो जिनावधिजिना परमानन्तादनन्तयुगसर्वान् ।
अवधिजिना भवकेवल्यभवत्थकेवलिन इत्येव ॥ ३८३

'कोष्ठाग्रबुद्धिः पदकानुसारि-सम्भिन्नशब्दतः श्रोतः ।
उग्रतपश्चरणजुषः चतुर्दशपदाग्रतः पूर्वी ॥ ३८४

'एकादशाङ्गिपदके कूटस्थानेऽथवा वः ऐँ क्लीँ नमः ।
क्लीँ श्रीँ क्रुँ स्रुँ स्वाहा'न्ते 'श्रुतकेवलिनः पुरस्त्वकूटपदे ॥३८५

'माया-लक्ष्मी-वाणी इँ ह्रीँ ह्रीँ स्वा-नभ'श्च यदिवाऽद्ये ।
'प्रणवात् जाँ जाँ कूटः स्वाहा' यद्वा न कूटोऽत्र ॥ ३८६

'प्रणवो मायैतेभ्यः कृत्वाऽथ नमश्च यामिमां विद्याम् ।
प्रयुनज्मि च सा विद्या मम सिध्यतु वायु-शून्यम'न्त्यदले ॥३८७

प्रथमस्थानमिदं विद्याष्टकगर्भितं परं कूटैः ।
यत् फलमिहान्त्यतस्तत् किन्त्वेकं सर्वसिद्धिबीजममी ॥३८८

**षोडशपदैर्द्वितीयप्रस्थानम् ।**

द्विप्रस्थाने प्रणवो मायाबीजं च षोडशपदादौ ।
सर्वत्र स्वाहान्ते कथयतः प्राकृतेनैतत् ॥ ३८९

'ॐ ह्रीँ नमो भगवओ बाहुबलिस्सेह पण्हसमणस्स ।
महपण्हाइ समणस्स सयबलाइमवीरियस्स ॥ ३९०

'तह महबलस्स जोहापरक्कमस्स य सहस्समल्लस्स ।
अह महबाहुस्स महाबलपुरओ विक्कमस्से य ॥ ३९१

'वग्गुं वग्गुं च महावग्गु निवग्गु सुवग्गुजुयलं च ।
दुनिवग्गुं वागुरिए महावागुरिए य विन्नेया ॥ ३९२

'भागुरिए महभागुरिए मोहरिए तह महाइमोहरिए ।
ससुमणे सोमणसे महुमहुरे' दुईयपत्थाणं ॥ ३९३

बाहुबलिविशेषमिति नवकान्ते सिद्ध्यतां भगवती मम ।
महतीह महाविद्या स्वाहान्ता वग्गुमित्यादि ॥ ३९४

श्रीनाभेयपदाम्बुजमनागतस्यास्य यच्चतुर्ज्ञानम् ।
तन्नवविशेषणैरिह शेषपदैः केवलज्ञानम् ॥ ३९५

इह वा भगवानर्हन् विरतिजुषस्तस्य बाहुबल्यादि ।
पदनवकं तु विशेषणमते च जैनी चतुर्ज्ञानी ॥ ३९६

बाहुबलि-प्राज्ञमुन्योर्मतिज्ञानं तृतीयपदं श्रुतज्ञानम् ।
द्वयमवधिः शेषपदैः वेदमितैः स्यान्मनोज्ञानम् ॥ ३९७

वग्गुचतुष्कं षट्पदमहुमहुरे तं केवलज्ञानम् ।
महपण्हसमण अन्तं विद्याशेषं विशेषणकम् ॥ ३९८

विजया-जयाऽपराजितनाम्नी विद्यासुरी जिनव्रतिनः ।
स्वप्ने आदेशकरी स्वदेश-परदेशवादिजयहेतुः ॥ ३९९

वग्गुप्रभृतिकविद्या किंशुकवर्णाऽथ षोडशसहस्रैः ।
जप्ता जनमोहकरी वचनेष्वप्रतिहतत्त्वाय ॥ ४००

**षोडशपदैस्तृतीयप्रस्थानम् ।**

षोडशदलप्रतिपदं आदौ 'ॐ ह्रीँ तदन्ततः स्वाहा ।'
अष्टादिसप्तपदके मायापुरतो विशेष इति ॥ ४०१

"इँ क्लीँ क्षाँ क्षीँ ग्राँ ग्रीँ द्राँ द्रीँ श्राँ श्रीँ अतः परं ह्राँ ह्रीँ ।"
एकैकमष्ट-नवमे द्वयं द्वयं शेषपञ्चपदे ॥ ४०२

"इरियाई महइरियाई किरियाई तह महाइकिरियाई ।
गिरियाई महागिरियाई पिरियाई महाइपिरियाई ॥ ४०३

"सिरियाई महसिरियाई हिरियाइ महाइहिरियाई ।
आयरियाई एगा हरिकाली किरिजुया काली ॥ ४०४

"गिरिकाली पिरिकाली सिरिकाली तह य चेव हिरिकाली ।
आयरियकालिजुत्ता काली काली महाकाली ।" ॥ ४०५

चतुर्थप्रस्थानम् ।
"किरिकिरिकाली गिरिगिरिकाली पिरिपिरि अओ परं काली।
सिरिसिरिकाली हिरिहिरिकाली आयरियकाली य ।" ॥४०६

षट्कोणबहिर्वलये पदषट्कं प्रतिपदं च पूर्वं स्यात् ।
प्रणवः स्वाहा प्रान्ते तुर्ये पीठे इदं ज्ञेयम् ॥ ४०७

**पञ्चमप्रस्थानम् ।**
"किरिमेरुं गिरिमेरुं पिरिमेरुं सिरिनगं च हिरिमेरुं ।
आयरियमेरु पइपय आइ पणवो पज्जंत मरु-गयणं ।" ॥४०८

## ( लेखनविधिवर्णनम्- )

षट्कोण-बहिःकोणे प्रत्येकं मेरुपदमिदं लेख्यम् ।
इरिमेरुपदत्यक्तं नैतत् प्रस्थानगणनायाम् ॥ ४०९

ह्स् हौँ ह्स् हीँ ह्स् हैँ ह्स् हूँ द्रूँ फ्रूँ षट्कोणान्तर्गताः षट्बीजाः।
क्रमशो लेख्याः मेरुः कूटयुतिकार्यतो ज्ञेया ॥ ४१०

शान्त्यादिकर्मषट्कं सितादिवर्णानुगाः सकूटनगाः ।
दिक्-कालासन-मुद्रायुक्ता जप्ता वितन्वन्ति ॥ ४११

## ( ॐकाररहस्यम्- )

प्रणवो माया अर्हँ सम्पुटबीजत्रयं चतुःपीठात् ।
स्वामिन् ! इत्यथ नमो लेख्यं षट्कोणहृदयेषु ॥ ४१२

'अः' पृथिवी पीतरुचिः 'उ'व्योमतडित्प्रभाभिराक्रान्तम् ।
'मः'स्वर्गकलाचन्द्रप्रभमिन्दुनभस्तत्परं ब्रह्म ॥ ४१३

अउमो विष्णु-विधीशास्त्रिगुणाः सकलास्तु कृष्ण-पीत-सिताः ।
संसृतिरताश्च निष्कलमभ्रं नादो जिनः सिद्धः ॥ ४१४

आलोकेनोपलम्भेन मुनित्वेन च साधितः ।
रत्नत्रयमयो ध्येयः प्रणवः सर्वसिद्धये ॥ ४१५

वा 'ॐ' इत्यन्तराप्राणशब्दो यः स्यात् तदुद्भवम् ।
शब्दब्रह्मेत्यसौ युक्तं वाचकः परमेष्ठिनाम् ॥ ४१६

इत्युक्त्या हृत्कमले प्रणवं मध्यस्थसूरिमेरुजिनम् ।
स्वर-कादिवर्णयुक्तं यो ध्यायति कुम्भकेन शशिवर्णम् ॥४१७

सिन्दूर-सुवर्णाभं श्यामारुणवर्णाभं क्रमादेषः ।
शान्तिः क्षोभं स्तोभं द्वेषं वश्यं तनोति जन्तूनाम् ॥ ४१८

यस्तु द्वादशसहस्रं सामान्यात् प्रणवे जपम् ।
कुर्यात् तस्य परं ब्रह्म स्फुटं द्वादशमासतः ॥ ४१९

अर्धबिम्बद्वये सायं प्राणायामत्रयं मुनिः ।
षट्त्रिंशत्प्रणवाभ्यासात् कुर्याद् द्वादशकत्रयात् ॥ ४२०

ईडायां पूरणं सूर्ये रेचनं कुम्भकेऽन्तरा ।
हृदि द्विषट्पदाम्भोजे सन्ध्याविधिरयं स्मृतः ॥ ४२१

सूर्योपस्थानमेतत् तु तदेतदघमर्षणम् ।
एतदेव महासन्ध्या नैवान्यत् किञ्चिदस्त्यतः ॥ ४२२

षष्ट्या गुर्वक्षरैर्वारि पलं षष्ट्या पलैर्घटी ।
षष्ट्या गुर्वक्षराङ्कोऽयं त्रिसहस्री सषट्शती ॥ ४२३

अहोरात्रघटीषष्टिगुणा लक्षयुगं तथा ।
सहस्राः षोडशेत्यन्तःप्रणवादजपा मुनेः ॥ ४२४

"घट्यां गुर्वक्षरमिता उच्छ्वासाः(३६०) स तु एककः ।
दशप्रणवजा(? ज)स्तेन" प्राणायामा घटीभवाः ॥ ४२५

त्रिशती सह षष्ट्या स्याद् दशप्रणवजा मुनेः ।
सन्ध्यातो याति नोच्छ्वासः परमेष्ठिस्मृतिं विना ॥ ४२६

परमेष्ठिमयो रत्नमयः सर्वमहोमयः ।
प्रणवः सूरिमन्त्रादौ गौतमस्वामिना कृतः ॥ ४२७

**( ह्रींकाररहस्यम्- )**

वृत्ताकृतीरर्हन्तस्त्रिकोणसिद्धास्तु शीर्षकं सूरिः ।
वाचक इन्दुकलाऽभ्रं दीर्घकला साधुरिति पञ्च ॥ ४२८

शीर्ष-मुख-कण्ठ-हृदय-क्रमगतमात्मानमन्यदेहिगतम् ।
अर्हत्-सिद्धाचार्योपाध्याय-मुनिपदं तु रक्षायै ॥ ४२९

अर्हन् भूमिर्नभः सिद्धास्तेजः सूरिः परे पयः ।
वायुः साधुरतो मायाबीजान्तस्तत्त्वपञ्चकम् ॥ ४३०

पृथ्वी धर्मस्य पदं वारि नभश्चापि शुक्लबीजमिह ।
तैजसमार्तध्यानं मरुत् तथा रौद्रबीजं स्यात् ॥ ४३१

चन्द्र-कुजावर्हन्तः सिद्धाश्च बुधो बृहस्पतिः सूरिः ।
शुक्रो वाचक एवं मुनिरर्क-शनी ग्रहास्तत्र ॥ ४३२

नादोऽर्हन्नेतदधः शून्यं व्योमश्रिता ग्रहाः सप्त ।
इति नादार्हद्ध्यानात् सर्वग्रहभूतशान्तिरिह ॥ ४३३

अर्हत्-सिद्धाचार्योपाध्याय-मुनीन्द्रसंस्थितास्तिथयः ।
नन्दाद्याः पञ्चामूः क्रमतस्तिथिशान्तिकं प्राग्वत् ॥ ४३४

चन्द्राभः शशिशान्त्यै कुजस्य पद्मप्रभो गुरोः शान्तिः ।
सूर्यस्य नाभिभूरथ वीरो राहोश्च शान्तिकृते ॥ ४३५

मन्दस्य श्रीपार्श्वो बुधस्य नेमिश्च शान्तये तदिह ।
मायाबीजे तत्र स्थाने देवं ग्रहं च तत् ध्यायेत् ॥ ४३६

कुण्डलिनी भुजगाकृति(ती) रेफाञ्चित हः शिवः स तु प्राणः ।
तच्छक्तिर्दीर्घकला माया तद्वेष्टितं जगद्वश्यम् ॥ ४३७

नाभौ हृदये कण्ठे आज्ञाचक्रेऽथ योनिमध्ये वा ।
सिन्दूरारुणमायाबीजध्यानाज्जगद्वश्यम् ॥ ४३८

प्राग्वद् वर्णानुगतं मायाबीजं विशिष्टकार्यकरम् ।
प्रायः शिरस्त्रिकोणे वश्यकरं कामबीजवत् ॥ ४३९

हः शम्भुः सेन्दुकलो ब्रह्मा रस्तुर्यकः स्वरो विष्णुः ।
संसृतिरस्या बिन्दुं दत्त्वा नादो विभात्यर्हन् ॥ ४४०

वर्णान्तः पार्श्वजिनः कला फणा बिन्दुरत्ननादमहः ।
नागो र ई तु पद्मा तत्रार्हन् सूरिमेरुमयः ॥ ४४१

वारि-घट-पत्र-यन्त्रे मूर्द्धनि भाले सुपुष्प-नैवेद्यैः ।
सम्पूज्यामुं जापः करपर्वभिरब्जबीजाद्यैः ॥ ४४२

मायाबीजं लक्ष्यं परमेष्ठि-जिनालि-रत्नरूपं यः ।
ध्यायत्यन्तर्वीरं हृदि स श्रीगौतमः सुधर्माऽथ ॥ ४४३

## ( अर्हँकाररहस्यम्- )

आद्यं हान्तं शब्दब्रह्मोद्ध्वाधो 'र'तस्त्रिरन्तयुतम् ।
चन्द्रकला सिद्धपदं बिन्दुनिभोऽनाहतः सोऽर्हन् ॥ ४४४

षोडश चतुरधिविंशतिरष्टौ नाभौ दलानि हृदि मूर्ध्नि ।
आद्यं हान्तं वर्णाः शरदिन्दुकला-नभःप्रभवाः ॥ ४४५

नादस्त्वात्मोद्ध्वाधो रेफाञ्जिनरत्नयुक्त इत्यर्हम् ।
दृश्योऽन्तर्ब्रह्माब्जं नाभ्यन्तःशक्तिकुण्डलिनी ॥ ४४६

इति सर्ववर्णमूर्तिं अर्हं सर्वमेरुगतमन्तः ।
ध्यायन् सूरिः सकलागमार्थवक्ता गतभ्रान्तिः ॥ ४४७

उक्तं च-

कमलदलोदरमध्ये ध्यायेद् वर्णाननादिसंसिद्धान् ।
नष्टादिविषयबोधो ध्यातुः सम्पद्यते कालात् ॥ ४४८

अर्हँजपात् क्षयमरोचकमग्निमान्द्यं
कुष्ठोदरात्मकसन-श्वसनानि हन्ति ।
प्राप्नोति चाप्रतिमवाग् महतीं महद्भ्यः
पूजां परत्र च गतिं पुरुषोत्तमाप्ताम् ॥ ४४९

अपि च,

कनककमलगर्भे कर्णिकायां निषण्णं
विगततमसमर्हँ सान्द्रचन्द्रांशुगौरम् ।
गगनमनुसरन्तं सञ्चरन्तं हरित्सु
स्मर जिनपतिकल्पं मन्त्रराजं यतीन्द्र ! ॥ ४५०

इति सर्वत्रगं ध्यायन्नर्हँ इत्येकमानसः ।
स्वप्नेऽपि तन्मयो योगी किञ्चिदन्यन्न पश्यति ॥ ४५१

अर्हँ लक्ष्यीकृत्य ध्यायन् नादादिविच्युतौ शशिनम् ।
यद्वर्णमात्रमक्षरभावोज्झितमीरितुं शक्यम् ॥ ४५२

पश्यत्यनाहताभिधदेवोऽसौ सूक्ष्मलक्ष्यगतः ।
तस्माच्च गलितलक्ष्यो ज्योतिर्मयमीक्षते विश्वम् ॥(यु.) ४५३

मन्त्रराजसमुद्भूतानाहतस्थितचेतसः ।
सिद्ध्यन्ति सिद्धयः सर्वा अणिमाद्याः स्वयं यतेः ॥ ४५४

इति पिण्डस्थिति-पदगत-रूपाश्रित-रूपवर्जिताभ्यासात् ।
अर्हँ मेरुध्यातुस्तत्तद्भवसिद्धिसाम्राज्यम् ॥ ४५५

अकारः श्रीपतिः सान्तः सेन्दुः शम्भुर्विधिश्च रः ।
उद्ध्र्वमेतन्नभोलोकस्तदन्तेऽनाहतो जिनः ॥ ४५६

अर्हँ त्रैलोक्यपूज्यत्वादनन्तसदया जिनाः ।
सद्रत्नत्रयभाजस्तदर्हँ सर्वज्ञबीजकम् ॥ ४५७

अथवा,
वर्णान्तः श्रीवीरो रेफः सिंहासनं तु चन्द्रकला ।
रुचिदण्डच्छत्रत्रयमभ्रं कलशोऽस्य नादशिखा ॥ ४५८

वर्णान्तस्तीर्थकरस्त्रिकोणकोटीरमथ सितांशुकला ।
सर्वत्र शीतलेश्या शून्यं शुक्लं ततः परं सिद्धिः ॥ ४५९

रेफद्वयाद्यमयुतं तथोद्ध्र्वरेफमधःस्थरेफं वा ।
अत्यक्तसान्तबीजं मन्त्रतनुर्जिनपतिः साक्षात् ॥ ४६०

त्रैलोक्यवर्तिशाश्वतजिनदर्शन-पूजन-स्तुतिभवेन ।
जिनपतिबीजाष्टशतं स्मरन् फलेन स्वयं व्रियते ॥ ४६१

प्रणवे मायाबीजे जिनपतिबीजेऽथ सूरिमन्त्रमये ।
प्राणायामत्रितयान् त्रिकालसन्ध्याविधिः सूरेः ॥ ४६२

षट्कोणान्तर्हरि-विधि-शम्भूत्थितबीजमध्यगतमाया ।
अन्तःप्रणवः सूरेर्मन्त्रोऽसौ वर्धमानविद्या च ॥ ४६३

एतेन वर्धमानविद्याधिष्ठितषट्कोणयन्त्रविधिर्दर्शितः, स च वर्धमानविद्याकल्पे दर्शयिष्यते ।

एतद्बीजत्रितयं यथास्थितं वेत्ति तीर्थकृत् तदनु ।
श्रीगौतमस्ततोऽन्यो यदि वेत्ति स गौतमप्रतिमः ॥ ४६४

(पीठचतुष्कम्-)

षट्कोणमेरुवर्जितपीठचतुष्कं तु यन्त्रलिखितमिह ।
षट्कोणदेहसङ्गतपीठचतुष्कं परं वच्मि ॥ ४६५

वङ्क्षादिनालिमूलान्तरालमार्गोऽङ्गुलानि नव यावत् ।
आधारचक्रमन्तः पूर्णगिरिः पञ्चमाङ्गुलकम् ॥ ४६६

पूर्णगिरेरुत्थितमुड्डियाणमेकाङ्गुलादधो नाभेः ।
कन्दस्तस्य थुडं पृथु यावत् तदनाहतं चक्रम् ॥ ४६७

पीठमिह कामरूपं तस्मिन् पञ्चाक्षशाखिकास्तासु ।
मुख्या मनसः षष्ठी नालान्यपि ताः क्वचिच्छास्त्रे ॥ ४६८

श्रवणाद्यक्षद्वारे व्यक्ते जालन्धरं च तन्मूलान् ।
आज्ञाचक्रं यावन्मध्ये सङ्ख्याऽथ रसगुणाङ्गुलयः ॥ ४६९

(विशेषकम्)

अन्यत्रैवं पीठचतुष्कमुक्तम्-

उड्डीयाणं नाभौ हृदये जालन्धरं तथा कण्ठे ।
कामाग्ररूपपीठं मूर्धान्तः पूर्णगिरिपीठम् ॥ ४७०

जैनी परादिशक्तिः पश्यन्ती मध्यमाऽथ वैखरिका ।
द्विप्रहरीं यावत् क्रमशः पीठे दिनोदयतः ॥ ४७१

निःस्पन्दमनसि मन्त्रः प्रथमा तत्रार्थहेतुः पश्यन्ती ।
हृदये वर्णोत्पत्तिर्मध्यमिका शब्दभृत् तुर्या ॥ ४७२

शब्दाज्जापो मौनस्तस्मात् सार्थस्ततोऽपि चित्तस्थः ।
श्रेयानिह यदिवात्मध्येयैक्यं जापसर्वस्वम् ॥ ४७३

इत्युक्त्वा देहपीठस्वामी हंसः मेरुगतिरर्हन् ।
स प्रणवः स तु मायाबीजं तस्मै नमस्त्रैधम् ॥ ४७४

एतज्जापात् सूरिर्गौतमलब्धिभाभिरुत्तेजाः ।
देवासुर-दनुजेन्द्रैर्वन्द्योऽथ त्रिभवशिवगामी ॥ ४७५

एतन्मन्त्रप्रभयाऽऽक्रान्तसूरिगिराऽतिशयसिद्धः ।
ड-र-ल-क-श-ह-या-ऽहि-
रिपुप्रभृतिभयात् सङ्घरक्षाकृत् ॥ ४७६

वक्ष्येऽथ यन्त्रलेखनशेषं कोणद्वयोत्थरेखान्ते ।
ऊद्ध्वाधो रुद्रायुधचतुष्टयं प्रति तदेकैकम् ॥ ४७७

"मध्ये पार्श्वद्वितये ह-य-क्षपिण्डास्तदन्त एकैकम् ।
ॐ ह्रीँ पूर्वं तु जये जयं कुरु-कुरुयुगं स्वाहा ।" ॥ ४७८

"प्रणवो माया अपराजिते तदपराजितं कुरु प्राग्वत् ।
ऊद्ध्वं ॐ ह्रीँ विजये विजयं कुरु-कुरुयुगं स्वाहा" ॥ ४७९

"ॐ ह्रीँ आदि जयन्ती विजयं कुरु कुरु ततः परं स्वाहा।"
मायाबीजावेष्टनमम्भः क्षितिमण्डलं
तदनु (विशेषकम्) ॥ ४८०

**विशेषश्चायम्-**

प्रागुक्तद्वात्रिंशत्स्तुतिपदपर्यन्ततः क्रमात् काद्याः ।
क्षान्ता ञ्-हौ त्यक्त्वाऽमी कूटाः कार्ये महति योज्याः ॥४८१

द्वात्रिंशत्स्तुतिपद्यष्टपद्यां काद्यक्षरत्रयम् ।
यवर्गः स्यान्त इत्यष्टपिण्डाः सिद्धयष्टबीजकम् ॥ ४८२

अणिमा महिमा लघिमा गरिमेशित्वं वशित्वं मा प्रहतिः ।
प्राकाम्यमष्टसिद्धेर्बीजं हः स इति पिण्डयुगम् ॥ (यु.) ४८३

वारुणमब्धिर्मण्डललब्धिर्यन्त्रं भूमिस्तदन्तरो मेरुः ।
यमकूटे तत्रार्हन् माया प्रणवासनाऽऽसीना ॥ ४८४

पीठचतुर्वर्तिसुरप्रणतः सच्चन्द्र-सूर्यनभः ।
यः सोऽहं रत्नयुतेरित्येके सूरिरप्यर्हन् ॥ (यु.) ४८५

प्रथमपीठम्

सर्वत्राद्यन्तबीजाढ्यः प्रोक्तो मन्त्रः पुराऽधुना ।
अस्यैव स्वल्पबीजस्य वर्णैः श्लोकप्रमां ब्रुवे ॥ ४८६

'ॐ ह्रीँ जिणाणं ओहिजिणे परमोहिजिणे ।
तहणंतोहिजिणाणं अणंतणंतोहि य जिणाणं ॥ ४८७

'सामन्नकेवलीणं भवाभवत्थाइकेवलिणो ।
कुट्ठाईबुद्धीणं पयाणुसारी संभिन्नसोयाणं ॥ ४८८

'उग्गतवचरणचारी चउदसपुव्वी य दसपुव्वी ।
इक्कारस अंगीणं सुयकेवलिणो एएसिं सव्वेसिं ॥
इच्चाई पुव्विं पिव मरु नह अन्तं' पढमपीढम् ॥ ४८९

द्वितीयपीठम्

'ॐ ह्रीँ नमो भगवओ बाहुबलिस्सेह पण्हसमणस्स ।
महपण्हाइमसमणस्स सयबलाइमवीरियस्स ॥ ४९०

"तह महबलस्स जोहा परक्कमस्स य सहस्समल्लस्स ।
तह महबाहुस्स महाबलपुरओ विक्कमस्से य ।" ॥ ४९१

"वग्गुं वग्गुं च महावग्गु निवग्गु य सुवग्गुजुयलं च ।
दुनिवग्गु वागुरिए महावागुरिए य विन्नेया ॥ ४९२

"भागुरिए महाभागुरिए मोहरिए तह महाइमोहरिए ।
ससुमणसे सोमणसे महुमहुरे" दुईयपत्थाणं ॥ ४९३

तृतीयपीठम्

'ॐ ह्रीँ इरियाइ महाईरिया किरिया महाकिरियाई ।
गिरियाइ महागिरिया पिरियाइ महापिरियाई ॥ ४९४

'सिरियाइ महासिरिया हिरियाइ तह महाइहिरियाई ।
आयरियाई इरिकाली किरिकाली तह य गिरिकाली ॥ ४९५

'पिरिकाली सिरिकाली हिरिकाली आयरियजुया काली ।
कालीकाली य महाकाली' तईयं तु पीढमिणं ॥ ४९६

चतुर्थ पीठम्

'ॐ ह्रीँ इरिइरिकाली गिरिगिरि
पिरिपिरि सिरिसिरि हिरिहिरि य ।
आयरिय आयरिय पइपय काली' पीढं तुरियमेयं ॥ ४९७

पञ्चम पीठम्

'ॐ माया किरिमेरु गिरिमेरु पिरि य मेरु सिरिमेरु ।
हिरिमेरु आयरियमेरु सव्वं ति मरु-गयणं ।" ॥ ४९८

'पणवो मायाबीयं जिणबीयं चउपीढसामिस्स ।
नम एसो सव्वस्सं' भणियव्वो सक्कएणं तु ॥ ४९९

सप्ताद्रि-नन्द-नवकं रुद्राष्टौ नव-दश-सप्त-मद-करिणः ।
सूर्या नव-सप्ताष्टाष्टाविति षोडशोत्थपदैः ॥ ५००

सप्तत्रिंशदधिशतं सव्वेसिं प्रभृति मारुत-नभोऽन्तैः ।
एकत्रिंशद्वर्णैर्युक्तमिभषडिन्दवः प्रथमे ॥ (यु.) ५०१

युग-वारिधि-पञ्च-रसा अष्टाष्टौ पञ्च सप्त षट् पञ्च ।
गज-षड्-मुनि-षट्-षट्कं दशत्रय-दिग्गजाक्षयुगम् ॥ ५०२

इत्येकविंशतिपदैः षट्त्रिंशत्साधिकं शतं वर्णाः ।
यन्त्रे च षोडशपदान्येतैद्वैतं कृतं पीठम् ॥ ५०३

सूर्य-दशपञ्चकाक्षा युगषट्कं रस-पयोधि-गज (? युग)वर्णाः।
सप्ताधिशतं षोडशपदजैः पीठं तृतीयमिति ॥ ५०४

गज-रस-युगार्कवर्णैर्युगवारिधयस्तुरीयपीठमिति ।
रस-युगचतुष्कमष्टौ त्रिंशद्वर्णाः षडद्रिभवाः ॥ ५०५

प्रणवादिद्वादशकं वर्णा इति मन्त्रमूर्ध्नि सर्वज्ञः ।
षट्कोणबीजसहिताः कार्ये योज्या न ते गणिताः ॥ ५०६

सर्वाक्षरसंयोगात् सप्तनवत्या युताश्चतुःशतिकाः ।
श्लोकाः पञ्चदशास्मिन् वर्णाः सप्ताधिदशकं स्युः ॥ ५०७

संक्षिप्तविशेषः ।

अथ पञ्चाद्रिवाचनायामवशेषमाह–

विद्यापीठं प्रथमम्

प्रणवो नमो जिणाणं ओहिजिणे परमओहिजिणे ।
तहणंतोहिजिणाणं केवलिचरमसरीराणं ॥ ५०८

उग्गतवचरणचारीणं चउदसपुव्वीणं तहेव दसपुव्वी ।
इक्कारस अंगीणं एएसिं पभइ पुव्वं वा ॥ ५०९

द्वितीयपीठम्

पणवो नमो भगवओ बाहुबलिस्सेह पण्हसमणस्स ।
ॐ वग्गु वग्गु दुनिवग्गु सुमण इच्चेय सोमणसे ॥ ५१०

महुमहुरे इरिकाली किरिकाली पिरि य कालि सिरिकाली ।
हिरिकाली आयरियकाली सोलस सहस्ससोहग्गं ॥ ५११

इरियाए किरियाए पिरिया सिरियाइ तह य हिरियाए ।
उवविज्जाए बारससहस्स रत्तीइ आएसो ॥ ५१२

पणवो इरिइरि किरिकिरि पिरिपिरि
सिरिसिरि हिरिहिरि य आयरियकालि।
पइपय दससाहस्से मासे वेरिक्खओ हवई ॥ ५१३

पणवाइ पंचमेरु पुव्विं सहस्स बारस य जावो ।
इच्चेकवग्गु सुमणो जइ सूरीसो गोयम–सुहम्मो ॥ ५१४

पञ्चप्रस्थानाक्षरतः शतमेकं युगेकसप्तत्या ।
श्लोकास्तु पञ्च वर्णा एकादश सूरिमन्त्रेऽस्मिन् ॥ ५१५

मेरुक्रमपञ्चार्हत्सिद्धाद्या ज–भ–म–ह–क्षपिण्डयुताः ।
उत्सर्गे पञ्चशतीकुसुमैः पार्श्वार्चना च तत् स्वप्नम् ॥ ५१६

उपविद्या मेरूज्झितगणधरमन्त्रो नभोऽम्बुधिस्तुतिकः ।
सर्वार्थसिद्धबीजं यन्त्रान्ते वलयतः क्वचिददृष्टः ॥ ५१७

पणवो नमो जिणाणं ओहिजिणे परमोहिजिणे ।
तहणंतोहिजिणाणं सुकुट्ठबुद्धीण बीयबुद्धीणं ॥ ५१८

पयअणुसारीण नमो संभिन्नसोय तह सयंबुद्धे ।
पत्तेयबुद्ध नमिमो उज्जुमई विउलमई नमिमो ॥ ५१९

चउदस-दसपुव्वीणं इक्कारसअंगि अट्ठ (?पुव्वाई) ।
महानिमित्तकुसलाणं विउव्वणइड्ढिपत्ताणं ॥ ५२०

विज्जाहरसमणाणं चारणसमणाण पण्हसमणाणं ।
आगासगामि आसीविसाण दिट्ठिविसाणं च ॥ ५२१

उग्गतव-महतवाणं घोरगुणजुत्तबंभयारीणं ।
आमोसहि-विप्पोसहि-खेलोसहि-जल्लओसहिओ ॥ ५२२

सव्वोसहिपत्ताणं मणबलि-वयणबलि-कायबलि ।
खीर-घय-अमय-आसव-अक्खीण महाणसाइलद्धीणं ॥५२३

तह वद्धमाणबुद्धिसिरीण सिद्धायणाण सव्वेसिं ।
वग्गुए तह फग्गु फग्गुए य तह सुमिणे ॥ ५२४

सोमणसे महुमहुरे किरिया पिरियाइ चेव सिरियाए ।
आयरियाए किरिकिरिकाली पिरिपिरिजुया काली ॥ ५२५

सिरिसिरिकाली हिरिहिरिकाली तहा सिरिजुया काली ।
वग्गु निवग्गु दुफग्गु निफग्गु दुसुमणे य सोमणसे ॥ ५२६

सोममणे य जए तह विजए अजिए अपराजिए स्वाहा ।
सव्वक्खरेहिं चउदस सिलोगवण्णा य नवदुगुणा ॥ ५२७

श्रीखण्डाञ्चितकर्णः शुचिवपुरष्टोत्तरं शतं जप्त्वा ।
शून्ययुगस्तुतिमन्त्रःकार्यस्य शुभाशुभदेशः ॥ ५२८

प्राग्वत् स्तुतिफलमथवा प्रस्थानचतुष्टयोक्तमस्य तपः ।
आरभ्य विजयदशमीं यदिवा निर्विकृतिपञ्चयुगम् ॥ ५२९

इति सिद्धे जये-विजये सितपञ्चम्यां जिनं जयां विजयाम् ।
सम्पूज्याथाष्टशतं जापः स्वप्ने शुभादेशः ॥ ५३०

मृतसूनु-काकवन्ध्या वन्ध्या-वररहित-दुर्भगस्त्रीषु ।
भूतात्त-बालक-नृप-द्विष्ट-मनुष्येषु शान्तिकं वच्मि ॥ ५३१

पूजादिरहस्यम् ।
(शान्तिकविधिः-)
अपराह्ने देवगृहे शुचिदेशेऽथ त्रिवर्णचूर्णेन ।
चतुरस्रं द्वारचतुस्त्रिरेखमन्तर्दलाष्टाब्जम् ॥ ५३२

वज्रं मुद्गर-परशु-शक्तिं संलिख्य पूर्वदिक् क्रमतः ।
अष्टदलेषु सदन्नैः सर्वैः पुञ्जान् पृथक् कृत्वा ॥ ५३३

तदुपरि कलशानष्टौ जलपूर्णान् मातुलिङ्गवस्त्रवृतान् ।
अन्तर्जिनवारियुताम्भःपूर्णं घटयुगं कृत्वा ॥ ५३४

अष्टोत्तरशतमेनं मन्त्रं परिजप्य सर्वमभिमन्त्र्य ।
दीप-फल-कुसुम-धूपाक्षत-बलिभिः सम्यगभ्यर्च्य ॥ ५३५

नववस्त्रेणाच्छाद्यं रात्रौ यामेऽथ पश्चिमे विजने ।
नद्युभयतटी-घटकृत्-हस्ति-नृपद्वार-सप्तवल्मीकात् ॥ ५३६

धान्यसमृद्धक्षेत्रादानीय मृदं तु गात्रमनुलिप्य ।
तामेकदेशनग्नां नारीं मध्यैककुम्भजलैः ॥ ५३७

संस्नप्य कटीवासस्त्यक्त्वा सर्वाङ्गमन्यवस्त्रेण ।
पिहिता स्वगृहं नेया पृष्टा लोकोज्झिता सा स्त्री ॥ ५३८

प्रातः सूर्योदयतः सूरिस्तन्मण्डलं समभ्यर्च्च्य ।
मध्ये स्त्रियं निवेश्य च सप्तगृहद्वाररजस्तृणैस्ताम् ॥ ५३९

सप्तद्विकपक्षैरपि मन्त्रेणानेन वामहस्तेन ।
निर्भर्त्स्य प्रागमृत्स्नाकृतपुत्रिकयाऽपि निर्भर्त्स्य ॥ ५४०

सर्वमुद्धृत्य चतुष्पथेऽथ संस्थाप्य पूर्वमृत्तिकया ।
अनुलिप्य स्त्रीदेहं शेषघटाम्भोभिरभिमन्त्र्य ॥ ५४१

संस्नप्य सर्वरक्षां कृत्वाऽऽनयतेऽथ गृहं प्राग्वत् ।
तत्पद्मशेषमस्या दातव्यं सूरिमन्त्रेण ॥ ५४२

एवमिह सप्तदिवसान् कार्यं सप्ताह्नि देवमुनिपूजाः ।
प्रागुक्तदोषरहिताः स्त्री-बालक-नृप-मनुष्याः स्युः ॥ ५४३

देश-पुर-ग्रामालय-जनमारिषु रुग्जुडरलकसहाद्यैः ।
क्षेत्रादिपालपद्मादिदेवताद्यैः कृतास्त्वेवम् ॥ ५४४

गो-स्त्री-नर-राज-मारिषु नगरबहिर्मण्डपे शुचिभूमौ ।
चन्द्रोदयसत्तोरणपवित्रितायां ब्रुवे शान्तिम् ॥ ५४५

कुङ्कुम-गोरोचनया गोमयरस-दुग्ध-मलयजरसेन ।
दूर्वा-सुवर्णजातीलेखिन्या सूरियन्त्रमिदम् ॥ ५४६

नवभाजने विलेख्यं मध्ये ग्रहसंयुतं च शान्तिजिनम् ।
आकण्ठं त्रिमधुरतः सम्पूर्य नवीनवाससाऽऽच्छाद्यम् ॥ ५४७

त्रिःसन्ध्यं जातिकुसुमैर्दिनत्रयं सूरिमन्त्रमष्टशतम् ।
जप्त्वा प्रपूजयेत् तत् प्रपूज्य तूर्येऽह्नि यन्त्रजले ॥ ५४८

अभिमन्त्र्य पूजयित्वा कलशे कृत्वा तदम्बुधाराभिः ।
अभिषिच्य राजमार्गं पूजितरथ–हस्ति–शिबिकोद्र्ध्वम् ॥५४९

सुवसनशृङ्गारितनरमूर्द्धनि कृत्वा जिनं सितच्छत्रम् ।
चमरैश्च वीज्यमानं चन्द्रोदयहट्टशोभाभिः ॥ ५५०

आतोद्य–दीपसहितं शितायुधैः पौरुषैः परित्रातम् ।
सङ्घान्वितेन गम्यं पुरमध्ये सूरिणा सुमन्त्रेण ॥ ५५१

तस्मिन्नह्नि न हिंसा सङ्घाय सुभोजनं प्रदातव्यम् ।
दीनानाथस्वागतमिति मन्त्रस्मरणतः शान्तिः ॥ ५५२

अस्तमने गोवेशे नगरगृहद्वार–वाटकद्वारे ।
श्राद्धा गाः सिञ्चेयुः कलशजलैस्तासु शान्तिविधिः ॥ ५५३

षट्कोणसूरियन्त्रे अप्रतिचक्रादियन्त्रमध्ये च ।
देशादिनाम लेख्यं चिन्त्याः शान्त्यै शशिप्रभा वर्णाः ॥ ५५४

गर्भादिस्तम्भविधिं वच्मि शिलापट्टकेऽथ भूर्जे वा ।
क्षीरद्रुमफलके वा चन्दनवर्जं प्रागुक्तसद्द्रव्यैः ॥ ५५५

अष्टदलकमलकर्ण्यां 'ह'पिण्डमध्येऽथ गर्भवत्याख्या ।
एवं दलाष्टकान्तर्वलये च जिनस्तुतीर्दत्त्वा ॥ ५५६

क्षितिमण्डलेऽष्टदिक्षु 'ह'पिण्डमालिख्य सम्पुटीकृत्य ।
बद्ध्वा घनमेकान्ते त्रिसन्ध्यमभ्यर्च्य मन्त्रेण ॥ ५५७

यदिवाऽथ भूर्यमेतत् सिक्थकावेष्ट्यं घृतान्तरा पूज्यम् ।
गर्भस्तम्भः पयसा धौते तस्मिन् प्रसूतिः स्यात् ॥ ५५८

'पयसा' इति दुग्धेन जिनस्नपनगन्धोदकेन वा ।
पूर्ववत् पद्ममध्ये 'ग'पिण्डपिहिता च साधकस्याह्व ।
अष्टदलेषु 'ग'पिण्डान् स्तुतिवलयं क्षोणिमण्डलकम् ॥५५९

आशाष्टके 'ग'पिण्डं शिलान्तरे सम्पुटं तदेकान्ते ।
सम्पूज्य पुष्पमाला मण्डल-धूपैर्मलयजेनापि ॥ ५६०

अष्टशतमन्त्रजापो यद्वा भूर्यं तु सिक्थकावेष्ट्यम् ।
पूज्यं त्रिमधुरमध्ये वह्निस्तम्भो जिनार्चातः ॥ ५६१

पुनरष्टपत्रपद्मं 'ध'पिण्डपिहितं च साध्यनामान्तः ।
दलपिण्डेषु 'ध'पिण्डं वलये च जिनस्तुतीर्न्यस्य ॥ ५६२

क्षितिमण्डलमाशासु च 'ध'पिण्डमालिख्य पूर्ववत् पूजा ।
निस्तारयति जलापदि मन्त्रस्मृतितोऽम्बुशान्तिरियम् ॥ ५६३

अष्टदलपद्मगर्भे साधक-साध्याऽभिधे 'फ' पिण्डान्तः ।
'फौँ' वेष्ट्यमष्टदलगत'फ'पिण्डतो वलयगा जिनस्तुतयः ॥५६४

क्षितिमण्डलदिग्भागे 'फ'पिण्डमालिख्य पूर्ववत् पूजा ।
निस्तारयति तुलाग्रिमदिव्यादिह सूरिमन्त्रेण ॥ ५६५

अष्टदलपद्मगर्भे 'ह्लौँ'मध्ये साधको 'ह'पिण्डान्तः ।
अष्टदलेषु 'ह'पिण्डान् स्तुतिवलयं क्षोणिमण्डलगम् ॥ ५६६

आशाष्टके 'ह' पिण्डानालिख्य पुरे च सूरिमन्त्रेण ।
पूजा घटसर्पाभिधदिव्यान्निस्तारयत्येव ॥ ५६७

अष्टदलपद्मगर्भे 'क्लौँ'मध्ये साधकः 'क्ष'पिण्डस्थः ।
वलयं स्तुतयः पृथ्वीमण्डलमाशाष्टके 'क्ष'पिण्डांश्च ॥ ५६८

आलिख्याष्टाधिशतं जापो मन्त्रेण पूर्वरीत्याऽर्चा ।
सर्पादिविषं नश्यति विशेषतः स्थावरविषं च ॥ ५६९

पुनरष्टपत्रगर्भे 'क्ष'पिण्डमध्येऽथ साधकस्याह्वा ।
एवं दलेषु वलये स्तुतयः क्षितिमण्डलं तदनु ॥ ५७०

आशाष्टके 'क्ष'पिण्डानालिख्य पुनरेव मन्त्रजापार्चाम् ।
क्रोध-सुख-युद्ध-गमन-व्यवहारादेरपि स्तम्भः ॥ ५७१

स्तुतिवलयस्य प्रान्ते गर्भाद्यं स्तम्भयाम्यथ पूजयामि ।
लेख्यं मन्त्रस्यान्ते गर्भाद्यं स्तम्भयेः वाच्यम् ॥ ५७२

प्रणवो मायाबीजं जिनबीजमथैककं च पद्मान्तः ।
प्राग्वत् सर्वं तनुते गणभृन्मन्त्रेण किमिह कूटैस्तत् ॥ ५७३

मन्त्रस्यैकैकपदं शान्त्याद्यं कर्मषट्कमातनुते ।
दिक्-कालासन-मुद्रा-वर्णार्चाभिस्तदिह वच्मि ॥ ५७४

विजितस्मररोषमना विकथात्यक्तो जिनांह्रिगुरुभक्तिः ।
अथ भीरुर्मितभोजी जितनिद्रः सूरिरिह शस्यः ॥ ५७५

अशनादिपञ्चमौनी शुचिः प्रसन्नो दृढव्रतो दक्षः ।
गुरुपदभक्तिर्बीजावहितमनाः शस्यते मन्त्री ॥ ५७६

स्तोकजलस्नातवपुः परिहितमानवसनवरसूरिः ।
एकान्तेऽतिपवित्रे त्रिसन्ध्यमन्तः स्मरत्येवम् ॥ ५७७

'ॐ भूरसि भूताग्रे धात्रि ! भूम्यग्रशुद्धिमिह कुरु कुरु ।
स्वाहे'ति भूमिशुद्धिं विधाय करपल्लवाक्षेपात् ॥ ५७८

स्वाङ्गुष्ठादिक्रमतो भूतानि न्यस्य पञ्च शून्यानि ।
अर्हदादिपञ्चकं वा तैः कृतस्वाङ्गदिग्रक्षः ॥ ५७९

'ॐ ह्रौँ विमले तीर्थजले अशुचिः शुचिरथो भवामि स्वाहा।'
मूर्ध्नि प्रभृतिकृते गङ्गास्नाने इव विगतपापः ॥ ५८०

यदिवा,

निजमौलिमेरुमूर्ध्नि क्षीरे सरिन्नाथपाथसा देवैः।
संस्नापितो जिनेन्द्रस्तज्जलधौताङ्गकोऽथ निष्पापः ॥ ५८१

पूर्वाद्यष्टक्रमतः स्तम्भं दहनं च मृत्यु-विद्वेषौ।
वश्योच्चाटन-शान्तिकमीशित्वं सर्वकर्माणि ॥ ५८२

पूर्वाद्यष्टक्रमतः स्तम्भ-द्वेषाववाकृष्टिं पुष्टिम्।
शान्त्युच्चाटन-वश्यं मरणमिति केचिदप्याहुः ॥ ५८३

सूर्योदयादिचैत्राद्या मासाः पञ्चघटीप्रमाः।
एवं दिवानिशं वर्षं वसन्तादिऋतुः स्मृतः ॥ ५८४

आकृष्टि-रुषोच्चाटन-मारण-पुष्टिश्च शान्तिकं क्रमशः।
षड्ऋतुषु ज्ञेयमिदं यदिवैके कालविधिमाहुः ॥ ५८५

पूर्वाह्ने वश्यकर्माणि मध्याह्ने प्रीतिनाशनम्।
उच्चाटनमपराह्ने सन्ध्यायां मारणं स्मृतम् ॥ ५८६

शान्तिकमर्द्धरात्रे च प्रभाते पौष्टिकं तथा।
वश्यं मुक्त्वाऽन्यकर्माणि सव्यहस्तेन योजयेत् ॥ ५८७

शान्तौ पुष्टौ मुक्तौ श्वेतं क्षोभेऽतिपीतमत्यरुणम्।
वश्याकृष्टौ द्वेषोच्चाटे धूम्रं मृतौ महाकृष्णम् ॥ ५८८

ध्यानमिति शेषः।

पार्थिवे स्तम्भनं पुष्टिर्वश्यं शान्तिर्जलात्मके।
आग्नेये कर्षणं दाहो वायौ द्वेषं मृतिः परैः ॥ ५८९

वश्यं बालस्वरे द्वैते आकृष्टिं च युवात्मके ।
शान्तिं वश्यं च पुष्टिं च द्वेषस्तम्भौ च वृद्धके ॥ ५९०

मृत्युं मृत्युस्वरे कुर्यात् आद्यपञ्चस्वरक्रमात् ।
बालादिकस्वरो ध्याता कार्यानुमितमानसः ॥ ५९१

नमोऽर्चनकाले होमे स्वाहा शान्तौ स्वधाऽऽकृष्टौ ।
वषट् क्षोभे संवौषट् प्रद्वेषे फडिति घे मृति ॥ ५९२

स्फटिक-प्रवाल-मुक्ता-चामीकर-पुत्रजीवमालाभिः ।
बीजैः पद्मोत्थैरथ शान्त्याद्युचितं जपं कुर्यात् ॥ ५९३

पद्मासनाद्यमासनमथ मुद्राः सपरमेष्ठिमुद्राद्याः ।
सितपत्रादिभिरर्चा कुङ्कुम-गोरोचनादिलेख्यदलम् ॥ ५९४

सौवर्ण-रजत-कांस्यजपात्रं तत्रैव युज्यते साधोः ।
सङ्घस्य कार्यहेतोः सर्वं युज्येत नान्यत्र ॥ ५९५

प्रायोऽत्र सूरियन्त्रं महतां कार्ये शुभे महति योज्यम् ।
तेन विलिख्य सुपात्रे कर्पूराद्यैरिदं पूज्यम् ॥ ५९६

पूरक-रेचकयोगादाह्वान-विसर्जने करोतु बुधः ।
पूजाभिमुखकरणस्थापनकर्माणि कुम्भकतः ॥ ५९७

प्रथमं बीजत्रितयं गणभृद्विद्ये समध्यमे च 'एहि'युगम् ।
संवौषडाह्वानमथासीत् 'तिष्ठ'द्वयं स्थाप्यम् ॥ ५९८

आदौ प्राग्वन्मध्यात् 'संनिहिता मम भव'द्वयं संवषट् ।
पूजाऽथ कार्यमन्त्रात् सर्वस्माद् मेरुतोऽथ मध्याद् वा ॥ ५९९

'ॐ ह्रीँ गणभृद्विद्यायै सर्वत्र परमेष्ठिने स्वाहा' ।
वारि 'परमात्ममूर्त्यै स्वाहा' कर्पूरगन्धाद्यैः ॥ ६००

आदौ प्राग्वत् स्वाहान्तेऽनादिनिधनात्मने तदक्षतकाः ।
सर्वसुरासुरपूजायै स्वाहा कुसुममप्यग्रे ॥ ६०१

तदनन्तज्ञान-दर्शन-वीर्य-सुखादात्मने-मरुद्-व्योम्ने ।
नैवेद्य-दीप-धूपन-फलानि ढौक्यानि तत्क्रमतः ॥ ६०२

बीजत्रितयं गणभृद्विद्यायै मध्यतः 'ह्रौँ स्वकं स्थानम् ।
गच्छ'द्वयं विसर्गोचित'य'द्वन्द्वे भवेत् पूजा ॥ ६०३

मोक्षाऽभिचार-लक्ष्मी-शान्त्याकृष्टिक्रमेण जापविधौ ।
अङ्गुष्ठादिकनिष्ठां च यावद् धत्तेऽक्षसूत्रमसौ ॥ ६०४

स्तम्भेऽथ शान्ति-पुष्टौ वश्ये उच्चाटने मृतौ क्रमतः ।
भूम्यादिमण्डलगतं साध्यं ध्यायति तदर्थकृते ॥ ६०५

पूर्वाह्णे मध्याह्ने मध्यनिशायां निशान्त्यके यामे ।
वश्यं स्तम्भं शान्तिं पुष्टिं कुर्यात् क्रमेणैषा ॥ ६०६

**अथात्र मेरुगतवाचनान्तरमाह-**

'पणवो नमो' पयाइसु 'जिणाण ओहिजिणे परमोहिजिणे ।
तहाणंतोहिजिणाणं केवलितिय चउदसपुव्वी ॥ ६०७

दसपुव्वी इक्कारसंगीण उग्गतवचरणचारीणं ।
खीरासवलद्धीणं महासवलद्धि-कुट्ठबुद्धीणं ॥ ६०८

गोयमसामिस्स तहा सुहम्मसामिस्स एसि सव्वेसिं ।'
इच्चाई साहंतं सोलसपत्ताणि पढमपए ॥ ६०९

'पणवो नमो० बाहुबलि०' द्विवलयाकृत्या लेख्यम् ।
'पणवो वग्गू निवग्गू वग्गू य सुमण-सोमणसे ।
महुमहुरे इरिकाली गिरिकाली पिरिजुया काली ॥ ६१०

हिरिकाली सिरिकाली इरिया गिरियाइ तहय पिरियाए।
हिरियाए सिरियाए कालि महाकालि मरु-गयणं" ॥ ६११

**इति षोडशपत्राण्यङ्कत्त एव ज्ञेयानि ॥**

'इरि किरि गिरि पिरि हिरि सिरि पत्तेयं कालि।
इरि इरि य कालि किरि किरि गिरि गिरि पिरि पिरि
हिरि हिरि सिरिसिरि जुया काली।' ॥ ६१२

**वलयाकृत्या लेख्यम्।**

छक्कोण पणव एगो पुव्वं पिव मेरु तेरस य इत्थ।
सव्वक्खरेहिं बारस सिलोगवन्ना य पन्नरसा ॥ ६१३

पृथिवीमण्डलमध्ये यन्त्रमिदं मायया त्रिरावेष्ट्यम्।
पर्यन्ते क्रौँकारः पूज्यं स्थाने क्वचिद् दृष्टम् ॥ ६१४

समवसृतौ मुख्योऽक्षो वीरः शेषाक्षतश्चतुर्वक्त्रः।
अग्न्यादौ तु कपर्दीन्यासा द्वादशसभाश्च स्युः ॥ ६१५

तत्रैष गौतमोऽहं कर्पूराद्यैः समर्चयेद् भक्त्या।
एवं च नाभिकमले ध्यायन् सूरिः स सर्वज्ञः ॥ ६१६

मुख्योऽर्हन् पूर्वस्यां सिद्धाः सौम्येऽथ गौतमस्वामी।
याम्ये चोपाध्यायाः साधुरधः पूज्यपदाः ॥ ६१७

मध्ये कपर्दिकानां न्यासः स चतुर्गतिस्तु संसारः।
तत्र ममैते शरणं तदर्चयेत् पञ्चपूज्यपदान् ॥ ६१८

अक्षाणां मुष्टित्रयमर्पयति गुरुस्तवैष मुष्टिगतः।
त्रिजगद्व्यवहारोऽयं सङ्केतः स्याज्जनस्तमक्षम् ॥ ६१९

वासाहुतिनिक्षिपेः शङ्खोऽग्रिममुद्रयाऽन्नलाभाय।
पल्लव-मुद्रादर्शनमिह शिष्याणां समृद्ध्यै स्यात् ॥ ६२०

सौभाग्यमुद्रयाऽऽत्मनि सौभाग्यं वज्रमुद्रया रक्षाः ।
अक्षाः प्रणवाकृतयः कला कपर्दीति पञ्चपूज्यपदी ॥ ६२१

**ग्रन्थकर्तुः प्रशस्तिः ।**

इत्यवचिन्त्य बहुश्रुतमुखपद्मेभ्यो मयाऽऽत्मसंस्मृत्यै ।
गणभृन्मन्त्ररहस्यं गणितमिदं दिशतु गणलक्ष्मीम् ॥ ६२२

मतमिति गुरुमुखतो यन्मन्त्रोच्चारणे भवन्ति बहुभेदाः ।
तत्रास्मन्मतमेतत् सद्गुरुवचनं प्रमाणमिह ॥ ६२३

श्रीविबुधचन्द्रगणभृच्छिष्यः श्रीसिंहतिलकसूरिरिदम् ।
लीलावत्या वृत्त्या सहितं विदधे श्रियं दिशताम् ॥ ६२४

संयतगुण-त्रयोदश (१३२७) वर्षे दीपालिकापर्वसद्दिवसे ।
साह्लाददेवतोज्ज्वलमनसा पूर्तिं मयेदमानीतम् ॥ ६२५

पू.आ. श्रीसिंहतिलकसूरिविरचितम्

## ३. ॥ परमेष्ठिविद्यायन्त्रम् ॥

श्रीवीरजिनं नत्वा वक्ष्ये श्रीविबुधचन्द्रपूज्यपदम् ।
गणिविद्यायुगपदतो यन्त्रं परमेष्ठिविद्यायाः ॥ १

त्रिप्राकारं क्रमशश्चतुरष्ट-द्व्यष्टपत्रपद्मान्तः ।
किञ्जल्कपूज्यबीजं यन्त्रं लेख्यं सुरभिदलैः ॥ २

मध्ये 'ऽर्हँ' ऊर्ध्वादिषु सि आ उ सा रेखिकादलचतुष्के ।
ऋषभोऽथ वर्धमानश्चन्द्रानन-वारिषेणको दिक्षु ॥ ३

अष्टदलेषु क्रमशो 'युगादिनाथाय' तद् 'नमो' ऽत्रैव ।
गोमुख-चक्रेश्वर्यौ शस्यं कान्तं जिनः सुरश्च सुरी ॥ ४

द्व्यष्टदलेषु क्रमशः 'सुविधिजिनाय नमः' इत्यथ त्रिदशः ।
देवी श्रीवीरान्तं एवं तद् वच्मि नामानि ॥ ५

युगादीशोऽजितः स्वामी शम्भवोऽप्यभिनन्दनः ।
सुमतिः पद्मलक्ष्मा श्रीसुपार्श्वचन्द्रलाञ्छनम् ॥ ६

सुविधिः शीतलः श्रेयान् वासुपूज्यप्रभस्ततः ।
विमलानन्त-धर्मः श्रीशान्ति-कुन्थुररो जिनः ॥ ७

मल्लिः (च) सुव्रत-नमी नेमी श्रीपार्श्वतीर्थकृत् ।
'वीर'श्च जिननामान्ते 'नाथाय नमः' इत्यदः ॥ ८

श्रीगोमुखो महायक्षस्त्रिमुखो यक्षनायकः ।
तुम्बरुः सुमुखस्तस्मान्मातङ्गो विजयोऽजितः ॥ ९

ब्रह्मा यक्षेट् कुमारः षण्मुखः पाताल-किन्नराः ।
गरुडो गन्धर्वो यक्षेन्द्रः कुबेरो वरुणस्तथा ॥ १०

भृकुटिर्गोमेधः पार्श्वो मातङ्गोऽमी जिनाश्रिताः ।
चक्रेश्वरी अजितबला दुरितारिश्च कालिका ॥ ११

महाकाल्यच्युता श्यामा भृकुटिश्च सुतारिका ।
अशोका मानवी चण्डा विदिताऽथ प्रियाङ्कुशा ॥ १२

कन्दर्पा निर्वाणी बला धारिणी धरणप्रिया ।
नरदत्ताऽथ गान्धार्यम्बिका पद्मावती तथा ॥ १३

सिद्धायिका इमा जैन्यः क्रमात् शासनदेवताः ।
जिन-देव-सुरीनामत्रयं प्रति दलं दलम् ॥ १४

एकोऽर्हन् सिद्धाद्याः षट् तीर्थेश्वराः क्रमादथ ।
चन्द्राभ-सुविध्याद्या अर्हत्-सिद्धादयः प्राग्वत् ॥ १५

ॐ नमो अरिहो भगवओ अरिहंत-सिद्ध-आयरिय-उवज्झाय-सव्वसंघ-धम्म-तित्थपवयणस्स ।
ॐ नमो भगवईए सुयदेवयाए संतिदेवयाए सव्वदेव-पवयणदेवयाणं दसण्हं दिसापालाणं पंचण्हं लोगपालाणं ठः ठः स्वाहा ॥"

विद्येयं वलयाकृत्या लेख्या नव-गज(८९)प्रमा ।
अस्यां वर्णाः श्लोकयुग्मं पञ्चविंशतिरक्षराः ॥ १६

मघवाऽग्निर्यमो रक्षो वरुणो वायुदिक्पतिः ।
पूर्वादौ धनदेशानौ नागो विधिरूर्ध्वगः ॥ १७

अट्ठमहारिद्धीओ हिरि-सिरि-लच्छि-बुद्धि-कंतीओ ।
विजया जया जयन्ती वियरइ अपराजिया वि तहिं ॥ १८

पूर्वादिक्रमतो दिक्षु एतद्गाथांह्रिरेकतः ।
एकतः श्रुतदेवी तु पुस्तकाम्भोजशालिनी ॥ १९

एकतः शान्तिदेवी च करे स्वर्णकमण्डलुः ।
सुधारसभृतं पद्माऽक्षसूत्राद्यपि बिभ्रती ॥ २०

राजत-स्वर्ण-रत्न(त्नां)प्राकारत्रितयं दिशेत् ।
चतुर्द्वारं स्फुरद्रत्न-ध्वज-तोरणराजितम् ॥ २१

भूमण्डलं ततो दिक्षु 'क्षि' विदिक्षु 'ल'कारवान् ।
यद्वाऽप्मण्डलं सार्धं 'व'कारैः कलशाकृति ॥ २२

प्रागस्याश्चतस्रोऽस्ति निरशनं चैकम् (?) ।
आदावन्त्ये मध्ये एकादश जलयुतान्तानि ॥ २३

दुःशील–निह्नव–गुरुद्रोहक–विध्वस्तचैत्य–यतनीकान् ।
पातकपञ्चककृतमपि यो दूरात् त्यजति योग्य इह ॥ २४

जिनभक्तिर्गुरुसेवी अव्यसन–विवाद–राजभक्तकथः ।
प्रियवाग् जितेन्द्रियमना योग्यः परमेष्ठिविद्यायाः ॥ २५

पूर्वोत्तरेशदिग्वक्त्रः पद्मासन–सुखासनः ।
सौभाग्य–योगमुद्राभृत् कृताह्वानादिकक्रियः ॥ २६

'ॐ भूरि(र)सि भूतधात्री भूमिशुद्धिं कुरु कुरु ।
स्वाहा' इति कौङ्कुमाम्भोभिश्चिन्त्यं तद्भूमिसेचनम् ॥ २७

'ॐ ह्रीँ विमले तीर्थजलान्तरशुचिः शुचिः ।
भवामि स्वाहा' इति शान्तिदेवी मधुरितेक्षणा ॥ २८

कमण्डलुसुधाम्भोभिर्मां स्नापयतेऽथवा ।
षोडश विद्यादेव्यस्तीर्थाम्भोभिर्विचिन्त्यताम् ॥ २९

यद्वा चन्द्रसुधास्नातः क्षाराब्धौ योजनप्रमम् ।
पुण्डरीकं समारूढो द्रष्टुं तानर्हदादिमान् ॥ ३०

पाएहि रक्खपालो कणयमयंको हुयासणो जाणुं ।
उर–नाहि–हियय–पट्टी दो हत्था पास–मुह–सीसं ॥ ३१

धणपालो जयपालो अच्छुत्ता भयवई य वयरुट्टा ।
देवो हरिणगवेसी वज्जधरो रक्खए सव्वं ॥ ३२

"ॐ श्रीँ द्राँ णाँ आँ ह्रौँ ॐ अ सि आ उ सा क्षिप ॐ स्वाहा ॥"
विहिताष्टाङ्गदिग्रक्षश्चन्द्रादिवर्णभानिमान् ।
विद्याक्षरान् स्मरन् शान्तिप्रमुखं तनुतेऽचिरात् ॥ ३३

सम्यग्दृशां महाब्रह्मचारिणां गुरुवक्त्रतः ।
गृहीता पठिता सिद्धा विद्या सर्वकरी मता ॥ ३४

व्याख्यानादौ विवादे वा विहारे जनरञ्जने ।
सप्तकृत्वः स्मृता विद्या तत्तत्कार्यप्रसाधिका ॥ ३५

जातीपुष्पयुतैः शालितन्दुलैः सत्फलैरपि ।
जप्ता दशांशहोमेन प्रीणिता कुरुते न किम् ? ॥ ३६

एतद्विद्यान्तरोद्भूतखण्डविद्याफलान्यथ ।
वक्ष्यामि जैनसिद्धान्तरहांसि स्मरणाकृते ॥ ३७

'सत्त्व'शब्दं विना विद्या गुरुपञ्चकनामभूः ।
द्व्यष्टाक्षरात्महृत्पद्मे गर्भे देवो निरञ्जनः ॥ ३८

यद्वा-"अर्हत्-सिद्धाचार्योपाध्याय-सर्वसाधुभ्यो नमः ॥"
हृदम्बुजे इमां विद्यां संस्कृतैः षोडशाक्षरैः ।
लभते द्विशतीं ध्यायन् चतुर्थतपसः फलम् ॥ ३९

'अरिहंत-सिद्ध' शब्दाज्जपन् विद्यां षडक्षरीम् ।
शतत्रयेण लभते चतुर्थतपसः फलम् ॥ ४०

'अरिहंत'चतुर्वर्णं जपन् ध्यानी चतुःशतीम् ।
लभते दृष्टजैनात्मा चतुर्थतपसः फलम् ॥ ४१

'अ'वर्णं तु सहस्रार्धं(५००) नाभ्यब्जे कुण्डलीतनुम् ।
ध्यायन्नात्मानमाप्नोति चतुर्थतपसः फलम् ॥ ४२

गुरुपञ्चकनामाद्यमेकैकमक्षरं तथा ।
नाभौ मूर्ध्नि मुखे कण्ठे हृदि स्मर क्रमान्मुने ! ॥ ४३

'अ'वर्णं नाभिपद्मान्ते 'सि'वर्णं तु शिरोऽम्बुजे ।
'सा' मुखाम्बुजे 'आ' कण्ठे 'उ'कारं हृदये स्मर ॥ ४४

मन्त्राधीशः पूज्यैरुक्तोऽसौ किन्तु देहरक्षायै ।
शीर्ष-मुख-कण्ठ-हृत्-पदक्रमेण 'असिआउसा' स्थाप्याः ॥ ४५

प्रणवः पञ्चशून्यान्यग्रे 'असिआउसा नमः' ।
अस्याभ्यासादसौ सिद्धिं प्रयाति गतबन्धनः ॥ ४६

शाम्यन्ति जन्तवः क्षुद्रा व्यन्तरा ध्यानघातिनः ।
तद् वक्ष्येऽष्टदिक्पत्रे गर्भे सूर्यमहः स्वकम् ॥ ४७

'ॐ नमो अरिहंताणं' क्रमात् पूर्वादिपत्रगम् ।
प्रत्याशमेकमेकाहः एकादशशतीं जपेत् ॥ ४८

ध्यानान्तरायाः शाम्यन्ति मन्त्रस्यास्य प्रभावतः ।
कार्ये सप्रणवो ध्येयः सिद्धये प्रणवं विना ॥ ४९

यदिवाऽष्टदले पद्मे गर्भे स्यात् प्रथमं पदम् ।
दिक्षु(४) सिद्धादिचतुष्कं विदिक्ष्वन्यचतुष्ककम् ॥ ५०

एतां नवपदीं विद्यां प्रणवादि विना स्मरेत् ।
'नमो अरिहंताणं' यदिवाऽन्तश्चतुर्दले ॥ ५१

सिद्धादिकचतुष्कं च दिग्दलेषु मुनीन्दुभिः ।
अपराजितमन्त्रोऽयं मुक्तपापक्षयङ्करः ॥ ५२

हृदि वा 'नमो सिद्धाणं' अन्तर्दलचतुष्क्रमात् ।
पञ्चवर्णमयो मन्त्रो ध्यातः कर्मक्षयङ्करः ॥ ५३

श्रीमदृषभादि-वर्धमानान्तेभ्यो नमः'मयः ।
मन्त्रः स्मृतः सर्वसिद्धिकरोऽत्र तीर्थशब्दतः ॥ ५४

'श्रुतदेवता'शब्देन सरस्वती वाच्या ।
'ॐ अर्हन्मुखकमलवासिनि ! पापात्मक्षयङ्करि ! श्रुतज्ञानज्वालासहस्रप्रज्वलिते ! मत्पापं हन हन दह दह क्षाँ क्षीँ क्षूँ क्षौँ क्षः क्षीरधवले ! अमृतसम्भवे ! वं वं हुं हुं स्वाहा ॥"

गणभृद्भिर्जिनैरुक्तां तां विद्यां पापभक्षिणीम् ।
स्मरन्नष्टशतं नित्यं सर्वशास्त्राब्धिपारगः ॥ ५५

वाग् माया कमलाबीजं ज्वाँ क्ष्वीँ श्रीँ ततः स्फुर स्फुर ।
ॐ क्लाँ क्लीँ ऐँ वागीश्वरी भगवती मरुन्नभः ॥ ५६

एनं सारस्वतं मन्त्रं विबुधचन्द्रपूजितम् ।
स्मरेत् सरस्वती देवी साक्षाद् ध्यातुर्वरप्रदा ॥ ५७

अत्र विशेषः (कुण्डलिनीवर्णनम्)-
गुदमध्य-लिङ्गमूले नाभौ हृदि कण्ठ-घण्टिका-भाले ।
मूर्धन्यूर्ध्वं नव षट् कण्ठान्ता पञ्च भालयुताः ॥ ५८

आधाराख्यं साधिष्ठानं मणिपूर्णमनाहतम् ।
विशुद्धि(द्ध)-ललना-ऽऽज्ञा-ब्रह्म-सुषुम्णाख्यया नव ॥ ५९

अम्बुधि रस-दश-सूर्याः षोडश विंशतिः गुणास्तु षोडशकम् ।
दशशतदलमथवाऽन्त्यं षट्कोणं मनसाक्षपदम् ॥ ६०

दलसङ्ख्या इह साद्या ह-क्षान्ता मातृकाक्षराः ।
षट्सु चक्रेषु व्यस्तमिता देहमिदं भारतीयन्त्रम् ॥ ६१

आधाराद्या विशुद्ध्यन्ता पञ्चान्तस्तालुशक्तिभृत् ।
आज्ञा भ्रूमध्यतो भाले मनो ब्रह्मणि चन्द्रमाः ॥ ६२

रक्तारुणं सितं पीतं सितं रक्तत्रयं सितम् ।
चक्रं वर्णा इतः प्राग्वदादौ पत्राणि पञ्चसु ॥ ६३

चतुष्टये क्रमात् सूर्याः त्रि-षट्-द्व्यष्टदलावली ।
तदन्तर्नवबीजानि त्रिष्वादौ त्रिपुराऽथवा ॥ ६४

नवचक्रान्तः क्रमशो वाग्भवमुख्यानि मन्त्रबीजानि ।
तत्राद्ये रविरोचिषि त्रिकोणमर्केन्दुनाडिभ्याम् ॥ ६५

भगबीजमेतदूर्ध्वं कुण्डलिनीतन्तुमात्रमभ्रकलम् ।
वाग्भवबीजं श्वेतं ध्यातं सरस्वतीसिद्धिः ॥ ६६

अरुणमिदं वह्निपुरं ध्यातं मात्रां विनाऽपि वश्यकृते ।
किन्तु समात्रं यद्वा मायान्तःकामबीजमध्ये वा ॥ ६७

ध्यातं साधिष्ठाने षट्कोणे ह्रीँ स्मरस्य बीजमुत ।
ईकाराङ्कुशताणितशरो वर-स्त्रीकमिह वश्यम् ॥ ६८

मणिपूर्णे श्रीबीजं जपारुणं वर्णदशकदशदिग्भ्यः ।
ईश्वरताणितवस्तूच्छ्रयमिह वश्यं च लाभकरम् ॥ ६९

भालान्तर्भ्रूमध्ये त्रिकोण-कोदण्डखेचरीत्याख्यम् ।
अस्योर्ध्वं मध्ये वा माया-स्मरबीजयोरेकम् ॥ ७०

आधारान्तर्वाग्भवकुण्डलिनीतन्तुबद्धवश्यशिरः ।
कृत्वाऽधः स्थितमरुणं ध्यातं बीजान्तरुत वश्यम् ॥ ७१

यदिवा-

भ्रूमध्यान्तः 'इवीँ क्ष्वीँ' बीजं निर्यदमृतवर्षभरम् ।
ध्यातं विषरोगहरं त्रिकोणके मूर्ध्नि पूर्ववत् स्वरम् ॥ ७२

यदिवा-

कुण्डलिनीतन्तुद्युतिसम्भृतमूर्तीनि सर्वबीजानि ।
शान्त्यादिसम्पदे स्युरित्येष गुरुक्रमोऽस्माकम् ॥ ७३

किं बीजैरिह शक्तिः कुण्डलिनी सर्वदेववर्णजनुः ।
रवि-चन्द्रान्तर्ध्याना मुक्त्यै भुक्त्यै च गुरुसारम् ॥ ७४

भ्रूमध्य-कण्ठ-हृदये नाभौ कोणे त्रयान्तराध्यातम् ।
परमेष्ठिपञ्चकमयं मायाबीजं महासिद्ध्यै ॥ ७५

विबुधचन्द्रगणभृच्छिष्यः श्रीसिंहतिलकसूरिरिमम् ।
परमेष्ठिमन्त्रकल्पं लिलेख सह्लाददेवताभक्त्या ॥ ७६

पू.आ.श्रीसिंहतिलकसूरिरचितम्

## ४. ॥ लघुनमस्कारचक्रम् ॥

नत्वा विबुधचन्द्रार्च्यं यशोदेवमुनिं गुरुम् ।
वक्ष्ये लघुनमस्कारचक्रं साह्लाददेवता ॥ १

द्व्यष्टरेखाभिरष्टारं सप्तभिर्दशभिः परम् ।
रेखाभिरष्टवलयं चक्रं तुम्बे जिनाक्षरः(रम्) ॥ २

"ॐ नमो अरिहंताणं" आद्यं पदचतुष्टयम् ।
अरमध्ये द्विरावर्त्य लेख्यं प्रणवपूर्वकम् ॥ ३

पाशाङ्कुशाभयैः सार्द्धं वरदोऽरान्तरे क्रमात् ।
लिख्यतेऽमु (ष्यो)पान्तेऽथ "आँ क्रौँ ह्रीँ श्रीँ" चतुष्टयम् ॥४

प्राक् "प्रणवो नमो लोए सव्वसाहूणं" इत्यपि ।
प्रथमे वलये लेख्यं प्राग्वत् पञ्चपदीफलम् ॥ ५

"ॐ नमो चत्तारि मंगलं अरिहंता मंगलं सिद्धा ।"
जाव "धम्मं सरणं पवज्जामि" एवं द्वादशपदी ॥ ६

अर्हत्-सिद्धाः साधुधर्मो मङ्गलचतुष्टयं तद्वत् ।
लोकत्तरशरणावपि लेख्यं वलये द्वितीये तु ॥ ७

द्वादशान्तमनाः साधुः पञ्चदशपदीमिमाम् ।
विद्यां सप्रणवां ध्यायन् शिवं यात्यपकल्मषः ॥ ८

उक्तं च-
"मङ्गल-लोकोत्तम-शरण्यपदसमूहं सुसंयमी स्मरति ।
अविकलमेकाग्रतया लभते स स्वर्गमपवर्गम्" ॥ ९

तृतीये वलये "ॐ माया" युता वर्णसप्ततिः(७०) ।
बीजाक्षरचतुष्कं च जिनबीजपदाश्रयम् ॥ १०

"ॐ ह्रीँ श्रीँ ऽर्हँ"
"ॐ नमो भगवओ तिहुयणपुज्जस्स वद्धमाणस्स ।
जस्सेयं खलु चक्कं जलंतमागच्छए पयडं ॥ ११

"आयासं पायालं लोयाणं तह य चेव भूयाणं ।
जूए वा रयणे वा विच्चं रायंगणे वावि ॥ १२

एवं च "थंभणे मोहणे तह य सव्वजीवसत्ताणं ।
अपराजिओ भवामि स्वाहा" इय मंतविन्नासो ॥ १३

चैत्रेऽष्टाहिकायां तु त्रयोदश्यां विशेषतः ।
सहस्रैः जातिकुसुमैः सप्तभिर्वीरमर्चयेत् ॥ १४

जापैः सहस्रैरेतैः स्यादखण्डैः शालितन्दुलैः ।
दृढब्रह्मव्रतस्यैवं सिद्धाऽसौ पठतोऽथवा ॥ १५

सन्ध्याद्वयं स्मरन्नेवं व्यसनैर्ग्रह-मुद्गलैः ।
द्विपादैःश्वापदैर्दुष्टैर्न पराजीयते क्वचित् ॥ १६

वन्ध्यायां काकवन्ध्यायां निन्दू-दुर्भगयोषितोः ।
वरं न लभते कन्या या तस्या विधिरेषकः ॥ १७

चैत्ये सातिशये वेश्मैकदेशे शुचिभूतले ।
कृत्वा त्रिवर्णचूर्णेन त्रिरेखा-षट्-चतुरस्रवान् ॥ १८

चतुर्द्वारं चतुर्दिक्षु पूर्वादौ वज्र-मुद्गरौ ।
परशु-शक्तिमालिख्य मध्येऽष्टपत्रमम्बुजम् ॥ १९

प्रतिपत्रं सुरवन्निमिश्रा अष्टौ च पुञ्जकाः ।
तदूर्ध्वं कलशानष्टौ वक्त्रकुसुमसत्फलान् ॥ २०

तीर्थाम्भोभिर्जिनस्नात्रसुगन्धिजलमिश्रितैः ।
पूरयित्वा सुवस्त्रेणाच्छादितानब्जगर्भके ॥ २१

नव घटद्वयं रक्तं पूर्ववज्जलसम्भृतम् ।
पुष्पमालालसत्पत्र-फल-पुष्पं विधाय च ॥ २२

अपराह्णे तथा सायं मन्त्रेणानेन कुम्भगम् ।
अभिमन्त्र्य जलं सर्वमष्टाधिकशतं मुनिः ॥ २३

गन्ध-धूप-सुमैर्दीपैरक्षतैर्बलिभिर्नवैः ।
सम्यगभ्यर्च्य तत् सर्वं विदधीत सुवाससा ॥ २४

निशायाः पश्चिमे यामे शयितेषु द्विकेष्विमाम् ।
एकदेशेन नग्नां स्त्रीं दुर्भगाद्येकदूषणाम् ॥ २५

सन्नदी-द्वितटी-कुम्भकृद्-गजराजवेश्मनः ।
सप्तवाल्मीकफलितक्षेत्रमृत्स्नाविलेपनम् ॥ २६

कृत्वैकत्र च कुम्भाम्भोऽभिमन्त्र्य स्नपितामथ ।
तद्वासस्त्याजिता साऽन्यवस्त्रेणापिहिताङ्गिका ॥ २७

निषिद्धपृष्ठतो दृष्टिर्नेतव्याऽऽत्मगृहं ततः ।
प्रातः सूर्योदये सूरिर्मण्डलमष्टपूजया ॥ २८

अभ्यर्च्यानेन मन्त्रेण मध्ये संस्थाप्य तां स्त्रियम् ।
सप्तगृहनीव्रतृणैः सप्तभिः काकपक्षकैः ॥ २९

निर्भर्त्स्यानेन मन्त्रेण त्रिधा प्रागुक्तमुद्भुवा ।
पुत्तलिकयाऽपि निर्भर्त्स्य समुद्धृत्य चतुष्पथे ॥ ३०

सर्वमेतत् परिक्षिप्य स्त्रियं प्रागुक्तमृत्स्नया ।
विलिप्य मन्त्रपुञ्जैस्तु शेषकुम्भाम्भसां भरैः ॥ ३१

संस्नप्य स्वगृहं प्राग्वद् नयेद् वल्ल्यादिकं तदा ।
शेषे च देयमेतस्यै सप्तरात्रमयं क्रमः ॥ ३२

सप्तमेऽह्नि जिनं सङ्घं सम्पूज्य लब्धशेषिका ।
सौभाग्यादि सा स्यादेवं ग्रहग्रहे शिशोः ॥ ३३

अत्र कूटाक्षराः सर्वे सस्वरा अष्टवर्गतः ।
ते स्युर्वृद्धनमस्कारचक्रे अ(तद)ष्टारक्रमात् ॥ ३४

"ॐ नमः" पूर्वं 'थंभेइ०' इति गाथाचतुर्थके ।
वलये योजनशतं यावत् स्तम्भक्रिया भवेत् ॥ ३५

"ॐ नमो थंभेइ जलं जलणं चिंतियमित्तोवि पंचनवकारो ।
अरि–मारि–चोर–राउलघोरुवसग्गं पणासेइ" ॥ ३६

अत्र विधिः–

शिलाऽपट्टेऽथ भूर्जे वा फलके क्षीरवृक्षजे ।
कु–गो–गोमय–गोक्षीरैर्जात्यादिलेखनीकरः ॥ ३७

पद्ममष्टदलमध्ये 'ह'पिण्डं तस्य चान्तरा ।
गर्भवत्याः स्त्रियो नाम प्रतिपत्रं 'ह'पिण्डकम् ॥ ३८

पद्मस्य बहिर्वलये गाथा 'थंभेइ०' अग्रतः ।
अमुकस्याः स्त्रियो गर्भं स्तभ्नामीति लिखेदथ ॥ ३९

बहिर्भूमण्डलं दिक्षु 'ह' पिण्डाष्टकमालिखेत् ।
शिलापट्टादि सम्पुट्य घनं बद्ध्वा शुचि क्षितौ ॥ ४०

त्रिसन्ध्यमष्टधाऽभ्यर्च्य जपेत् साष्टसहस्रकम् ।
यावद् वर्षार्धवर्षं वा गर्भस्तम्भोऽथवा विधिः ॥ ४१

एतद् भूर्यादिकं सिक्त्थकेनावेष्ट्य धृताम्बरा ।
अर्च्यते पूर्ववत् स्तम्भस्तत्र कार्ये समर्थ्यते ॥ ४२

सत् समुद्धृत्य दुग्धेनाथवा गन्धाम्बुना स्मरन् ।
मन्त्रं प्रक्षालयेदेवं प्रसूते सा सुतं सुखम् ॥ ४३

अग्निस्तम्भे अष्टपत्रपद्ममध्ये दलान्तरा ।
'ग'पिण्डं बहिर्वलये गाथा सृष्ट्या विलिख्यते ॥ ४४

भूमण्डलाष्टदिग्भागे 'ग'पिण्डं पूर्ववद् विधिः ।
जापः शतं सहस्रं वाऽग्निस्तम्भो धर्मदर्शिनाम् ॥ ४५

अष्टदलेऽम्बुजान्तश्च 'ध'पिण्डं वलये बहिः ।
गाथा भूमण्डलं दिक्षु 'ध' पिण्डं पूर्ववद् विधिः ॥ ४६

पद्ममष्टदलं फों 'फ'पिण्डान्तः साधकाभिधा ।
प्रतिपत्रं 'फ'पिण्डं च गाथा स्याद् वलये बहिः ॥ ४७

भूमण्डलाष्टदिग्भागे 'फ'पिण्डं पूर्ववत् क्रिया ।
जापः शतं सहस्रं वा तुल्या(ला)-दिव्यनिषेधनम् ॥ ४८

पद्ममष्टदलं मध्ये ह्लौ स्याद् 'ह'पिण्डमध्यगम् ।
साध्यनाम दलेष्वन्तः 'ह'पिण्डं वलये बहिः ॥ ४९

गाथा भूमण्डलं दिक्षु 'ह'पिण्डं पूर्ववद् विधिः ।
जापः शतं सहस्रं वा घटसर्पनिषेधनम् ॥ ५०

पद्ममष्टदलं मध्ये क्लौँ 'क्ष'पिण्डमध्यगम् ।
साध्यनाम प्रतिपत्रं 'क्ष'पिण्डं पूर्ववद् विधिः ॥ ५१

गाथा भूमण्डलं दिक्षु 'क्ष'पिण्डं पूर्ववद् विधिः ।
जापः शतं सहस्रं वा जयेत् पक्षादिजं विषम् ॥ ५२

पद्ममष्टदलं गर्भे 'क्ष'पिण्डं साध्यनामयुक् ।
'क्ष'पिण्डं प्रतिपत्रान्त सगाथं वलयं बहिः ॥ ५३

भूमण्डलाष्टदिग्भागे 'क्ष'पिण्डं पूर्ववत् क्रिया ।
जिह्वा-रण-गति-क्रोधव्यवहारनिषेधनम् ॥ ५४

देश-ग्राम-पुरं यद्वा गृहस्यैकस्य वा गवाम् ।
शाकिन्यादिकृतां मारिं निषेद्धुमिह सुव्रती ॥ ५५

भूर्यादौ चक्रमालिख्य तद्देशाद्यभिधायुतम् ।
कृत्वा रक्षां सिक्त्थकेनावेष्ट्य मन्त्राभिमन्त्रितम् ॥ ५६

कांस्यपात्रे नवे शान्तिप्रतिमाचरणाग्रतः ।
रक्षां तां त्रिमधुरेणाकण्ठं शान्तिं तु पूरयेत् ॥ ५७

शान्तिपाठः-

मुक्त्वा स्त्री-गज-रत्न-चक्रमहतीं राज्यश्रियं श्रेयसे
प्रव्रज्या दुरिताश्रयप्रमथनी येन श्रिताऽभूत् पुरा ।
मृत्यु-व्याधि-जरा-वियोगमगमत् स्थानं च योऽत्यद्भुतं
तं वन्दे मुनिमप्रमेयमृषभं सेन्द्रामराभ्यर्चितम् ॥ ५८

एवं 'बृहन्नमस्कार' प्रोक्तं श्रीशान्तिमन्त्रकम् ।
यद्वा-
'थंभेइ जलं०' इत्यादिगाथां जपन् शताधिकाम् ॥ ५९

शुक्लवस्त्रेण संछाद्यं त्रिसन्ध्यमष्टपूजया ।
त्रिदिनं त्रिदिनस्यान्ते महापूजापुरस्सरम् ॥ ६०

अभिषेकजलं तत् तु क्षेप्यं श्रीकलशान्तरे ।
श्रीशान्तिप्रतिमां हस्ति-शिबिका-रथमूर्धनि ॥ ६१

शुक्लवस्त्रवृताङ्गस्य नरस्य ब्रह्मचारिणः ।
कुलशुद्धस्य मान्यस्य मूर्ध्नि कृत्वा सचामराम् ॥ ६२

छत्रेण सहितां चन्द्रोदये ध्वजस्त्रजाञ्चिताम् ।
तूर्यत्रिकोल्लसद्वातां प्रदीपद्युतिभासुराम् ॥ ६३

चतुर्विधेन सङ्घेन संयुतः सूरिरुद्यमी ।
मारिगृहीतग्रामाद्यष्टदिक्षु प्रददेद् बलिम् ॥ ६४

दिने तस्मिन्नमारिः स्यात् पटहोद्घोषपूर्वकम् ।
चतुर्विधाय सङ्घाय भक्त्या दानं दिशेन्मुनिः ॥ ६५

दानं दीनादिषु प्राज्यं देयमेवंकृते सति ।
मारिर्निवर्तते किन्तु तत्कुम्भजलसेचनात् ॥ ६६

गोमार्यादिषु गोवाटप्रवेशे श्रावकैः शुभैः ।
तत्कुम्भजलसिक्ता गौर्मूर्ध्नि गोमारिवारणम् ॥ ६७

पञ्चमे वलये लेख्या 'ॐ नमः' पूर्वमेषिका ।
'स्वाहा'न्ता गाथिका क्षेत्र-स्वसैन्यत्राणकारिणी ॥ ६८

"अट्ठेव य अट्ठसयं अट्ठसहस्सा य अट्ठकोडीओ ।
रक्खंतु मे सरीरं देवासुरपणमिया सिद्धा" ॥ ६९

भूर्यादावेषिका गाथा लिखिता चन्दनादिभिः ।
रक्ष्या जिनान्तिके पूज्या बद्धा दोषज्वरापहा ॥ ७०

'ॐ नमो अरिहंताणं' पूर्वं 'अट्ठविहा'दिकाम् ।
गाथां वलये षष्ठे 'स्वाहा'न्तां विलिखेन्मुनिः ॥ ७१

अट्ठविहकम्ममुक्को तिलोयपुज्जो य संथुओ भयवं ।
अमर-नर-रायमहिओ अणाइनिहणो सिवं दिसउ" ॥ ७२

सप्तमे वलये "ॐ प्राक् 'नमो सिद्धाणं' इत्यतः ।
'तव०' इत्याद्यां लिखेद् गाथां 'स्वाहा'न्तां शिवगामिनीम् ॥७३

तवनियमसंयमरहो पञ्चनमोक्कारसारहिनिउत्तो ।
नाणतुरंगमजुत्तो नेइ पुरं परमनिव्वाणं स्वाहा" ॥ ७४

'ॐ प्राग् 'धणु'द्वयं तस्मा'न्महाधणु महाधणु ।
स्वाहा' इतीमां धनुर्विद्यामष्टमे वलये लिखेत् ॥ ७५

कायोत्सर्गे उपोष्यैनां श्रीवीरप्रतिमाग्रतः ।
अष्टोत्तरं सहस्रं प्राग् जपेत् सिद्धा मुनेरसौ ॥ ७६

स्मृत्वैतां पथि धूल्यन्तरालिख्य सशरं धनुः ।
आक्रम्य वामपादेन मौनी गच्छेन्न दस्यवः ॥ ७७

युद्धकाले जिनं वीरं सम्पूज्याष्टशतः स्मृतेः ।
प्राग्वद् धनुःक्रियां कृत्वा युद्धे गच्छेन्न शस्त्रभीः ॥ ७८

परेषां सम्मुखीभूतां धनुर्विद्यां महोमयीम् ।
इन्द्रचापसदृक्कान्तिं ध्यायेन्मन्त्रं पठेदमुम् ॥ ७९

तद्ध्यानावेशतो वैरिसेना पराङ्मुखी तथा ।
सैन्यद्वयं प्रतीपं चेद् ध्यायते सैन्यसन्धिदा ॥ ८०

वलयाष्टबहिर्दिक्षु पद्मं षोडशपत्रकम् ।
प्रतिपत्रं विलिख्यन्ते 'अं'आद्याः षोडशस्वराः ॥ ८१

आदिद्व्यष्टस्वराग्रे तत् प्रत्येकं 'ह्रूँ' इहाक्षरम् ।
षोडशस्वरसम्बद्धं 'ह्रूँ ह्राँ ह्रिँ ह्रीँ'मुखं लिखेत् ॥ ८२

एतदूर्ध्वं द्व्यष्टयदलं पद्मं तु प्रतिपत्रकम् ।
षोडश विद्या लेख्या या मन्त्रबीजयुता तथा ॥ ८३

१. 'ॐ याँ रोहिण्यै अँ नमः ।'
२. ॐ राँ प्रज्ञप्त्यै आँ नमः ।'
३. 'ॐ लाँ वज्रशृङ्खलायै इँ नमः ।'
४. 'ॐ बाँ वज्राङ्कुश्यै ईँ नमः ।'
५.'ॐ शाँ अप्रतिचक्रायै उँ नमः ।'
६. 'ॐ षाँ पुरुषदत्तायै ऊँ नमः ।'
७. 'ॐ साँ काल्यै ऋँ नमः ।'
८. 'ॐ हाँ महाकाल्यै ॠँ नमः ।'

९. 'ॐ यूँ गौर्यै लृँ नमः ।'
१०. ॐ रूँ गान्धार्यै लॄँ नमः ।
११. 'ॐ लूँ सर्वास्त्रमहाज्वालायै एँ नमः ।'
१२. 'ॐ वूँ मानव्यै ऐँ नमः ।'
१३. 'ॐ शूँ वैरोट्यायै ओँ नमः ।'
१४. 'ॐ षूँ अच्छुप्तायै औँ नमः ।'
१५. 'ॐ सूँ मानस्यै अँ नमः ।'
१६. 'ॐ हूँ महामानस्यै अँः नमः ।'

इति मन्त्रबीजपूर्वा विद्यादेव्यो दलेषु स्युः ।

देवीषोडशपत्राग्रे परमेष्ठिपदाक्षराः ।
षोडशोर्ध्वं स्फुरच्चन्द्रबिन्दवो ज्योतिरञ्चिताः ॥ ८४

'अरिहंत-सिद्ध-आयरिय-उवज्झाय-साहुवन्नियं बिंदुं ।
जोयणसयप्पमाणं जालासयसहस्सदिप्पंतं ॥ ८५

'सोलससु अक्खरेहिं इक्किक्कं अक्खरं जगुज्जोयं ।
भवसयसहस्समहणं जम्मि ठिओ पंचनवकारो' ॥ ८६

उक्तं च-बिन्दुं विनाऽपीत्यादिचतुःश्लोकी ।
चतुर्षु पटकोणेषु चतुरष्ट-दश-द्विकम् ।
अष्टापदजिना ज्ञेयाः 'चत्तारि.' इत्यादिगाथया ॥ ८७

यदिवाऽष्टचत्वारिंशत्सहस्रा द्व्यधिकं शतम् ।
जातीसुमनसां जापो होमो दशांशभागथ ॥ ८८

'श्रीइन्द्रभूतये स्वाहा 'ॐ प्रभासाय' पूर्ववत् ।
पटस्यैशानकोणे द्वौ गाथैका पूर्वदिग्गता ॥ ८९

'सोमे अ वग्गु वग्गु सुमणे सोमणसे तह य महुमहुरे ।
किलि किलि अप्पडिचक्का हिलि हिलि देवीओ सव्वाओ॥ ९०

'ॐ अग्निभूतये स्वाहा' 'स्वाहा'न्ते 'वायुभूतये' ।
पटस्याग्नेयकोणे द्वौ मन्त्रावेकस्तयोरधः ॥ ९१

'ॐ असिआउसा हुलुहुलु चुलुद्वयं' ततः ।
'इच्छियं मे कुरुद्वन्द्वं स्वाहा' सर्वार्थसिद्धिदा ॥ ९२

दक्षिणस्यां दिशि 'ॐ प्राग् 'व्यक्तायाथ मरुन्नभः' ।
'ॐ प्राक् 'सुधर्मस्वामिने स्वाहा' इति च पदद्वयम् ॥ ९३

नैर्ऋते 'प्रणवः' पूर्वं 'मण्डिताय मरुन्नभः' ।
'प्रणवो मौर्यपुत्राय स्वाहा' इति गणभृद्द्वयम् ॥ ९४

पश्चिमायां 'वाय्वग्निभ्यां स्वाहा'न्ते 'प्रणवः' पुरः ।
'अकम्पिताचलभ्राता मेतार्यः' इति मध्यतः ॥ ९५

प्राच्यां गाथेश[:] काष्ठादौ चतुर्विदिक् त्रिदिक् क्रमात् ।
द्वौ द्वावेकैकश्च सूरिराजान इति मे मतिः ॥ ९६

यद्वा-
प्राच्यां गुरुरतः प्राग्वद् गौतमासनमम्बुजम् ।
गाथाबीजयुतं ध्यानं वाच्यं प्राक् सूरियन्त्रतः ॥ ९७

बहिश्चतुर्दलं पद्मं चतुर्दिक्षु लिखेदिदम् ।
'ॐ नमो सव्वसिद्धाणं' पदं सर्वार्थसाधकम् ॥ ९८

अष्टारमौलिकुम्भेषु 'जम्भे' 'मोहे' चतुष्टयम् ।
द्विरावर्त्य क्रमाल्लेख्यमयं मन्त्रश्च पश्चिमे ॥ ९९

'ॐ नमो अरिहंताणं एहि एहि नंदे महानंदे पंथे बंधे दुप्पयं बंधे चउप्पयं बंधे घोरं आसीविसं बंधे जाव गंठि न मुञ्चामि' ॥

इमामष्टशतं स्मृत्वा कृत्वा ग्रन्थिं स्ववाससि ।
पथि गम्यं न चौराद्युपद्रवः छोट्यते स्थितौ ॥ १००

'मायाबीजं' त्रिरेखाभिरुपर्यावेष्ट्यमन्ततः ।
'क्रौँ' भूमण्डलं यद्वा वारुणं स्वस्ववर्णकम् ॥ १०१

मध्ये 'ऽर्हँ'बीजमावेष्ट्यं केचिद् रत्नत्रयाक्षरैः ।
केचिच्च बीजचक्रेण गुरुरेव प्रमा मतः ॥ १०२

ध्यानम्-

अथ ध्यानविधिं वक्ष्ये जितेन्द्रियः दृढव्रतः ।
सम्यग्दृग् गुरुभक्तश्च सत्यवाग् मन्त्रसाधकः ॥ १०३

एकान्ते शुचिभूमौ स पूर्वोत्तराशादिङ्मुखः ।
तीर्थाम्भो-गोमयरसैः सिक्तां भूमिं विचिन्तयेत् ॥ १०४

सहस्रदलपद्मान्तःपर्यङ्कासनसंश्रितम् ।
प्रसन्नाभिर्जयाद्यष्टसुरीभिस्तीर्थवारिभिः ॥ १०५

भृतैः सुवर्णभृङ्गारैर्वक्त्रदत्ताम्बुजैः स्वकम् ।
स्नप्यमानं विचिन्त्यामुं मन्त्रं हृदि विचिन्तयेत् ॥ १०६

'ॐ नमो अरिहंताणं अशुचिः शुचिरित्यतः ।
भवामि स्वाहा' इति स्नातः कुर्याद् देहस्य रक्षणम् ॥ १०७

१. 'ॐ नमो अरिहंताणं ह्रौँ हृदयं रक्ष रक्ष हुं फट् स्वाहा ।'
२. 'ॐ नमो सिद्धाणं हर हर शिरो रक्ष रक्ष हुं फट् स्वाहा ।'

३. 'ॐ नमो आयरियाणं ह्रूँ शिखां रक्ष रक्ष हुं फट् स्वाहा ।'
४. 'ॐ नमो उवज्झायाणं एहि भगवति ! चक्रे ! कवचवज्रिणि ! हुं फट् स्वाहा ।'
५. 'ॐ नमो लोए सव्वसाहूणं क्षिप्रं साधय साधय दुष्टं वज्रहस्ते ! शूलिनि ! रक्ष रक्ष आत्मरक्षा सर्वरक्षा हुं फट् स्वाहा ॥'

कृत्वाऽमीभिः स्वाङ्गरक्षां दिग्बन्धं च 'इन्द्रभूतये ।
स्वाहा'द्यैः सर्वगणभृदाह्वानं क्रियते ततः ॥ १०८

त्रिप्राकारस्फुरज्ज्योतिः समवसृतिमध्यगम् ।
चतुःषष्टिसुराधीशैः पूज्यमानक्रमाम्बुजम् ॥ १०९

छत्रत्रयं पुष्पवृष्टि-मृगेन्द्रासन-चामराः ।
अशोक-दुन्दुभि-दिव्यध्वनिर्भामण्डलान्यपि ॥ ११०

इत्यष्टभिः प्रातिहार्यैर्भूषितं सिंहलाञ्छनम् ।
संसदन्तः सुवर्णाभं वर्धमानं जिनं हृदि ॥ १११

साक्षाद् विलोकयन् ध्याता तल्लीनाक्षिमना अमुम् ।
अष्टोत्तरं शतं मन्त्रं सूरिमन्त्रसमं जपेत् ॥ ११२

एतद् यन्त्रं जैनधर्मचक्रमष्टारभासुरम् ।
अष्टदिक्षु स्फुरद्भाभिः शतयोजनदीपकम् ॥ ११३

तच्छायाक्रान्तवित्रस्तदुरितं सर्वपूजितम् ।
आत्मानं च स्मरेन्नित्यं तस्य स्युरष्टसिद्धयः ॥ ११४

मोक्षाभिचार-मारेषु शान्त्याकृष्ट्यादिषु क्रमात् ।
अङ्गुष्ठादि-कनिष्ठान्तमक्षसूत्रं करे धरेत् ॥ ११५

पू.आ.श्रीसिंहतिलकसूरिरचितम्

# ५. ॥ ऋषिमण्डलस्तवयन्त्रालेखनम् ॥

श्रीवर्द्धमानमीशं ध्यात्वा विबुधचन्द्रसूरिनतम् ।
ऋषिमण्डलस्तवादिह यन्त्रस्यालेखनं वक्ष्ये ॥ १

सौवर्ण-रूप्य-कांस्ये पटात्मदेहेऽर्चनाकृते स्थाप्यम् ।
रक्षायै भूर्जदले कर्पूराद्यैः सुवर्णलेखिन्या ॥ २

बहिः क्षाराब्धिवलयं श्यामलं लग्रतोऽक्षरैः ।
सषट्पञ्चाशता(५६) व्याप्तमन्तरद्वीपभूमिभिः ॥ ३

मध्ये जम्बूद्वीपस्तदष्टकाष्ठाक्रमेण संस्थाप्यम् ।
अर्हत्-सिद्धाद्यभिधापञ्चयुग् ज्ञान-दर्शन-चारित्रम् ॥ ४

आदावंशे फणी शम्भुर्वर्णश्चन्द्रकलाभ्रयुक् ।
द्वि-चतुः-पञ्च-षट्-सप्ताष्ट-दशार्कस्वरभृत् क्रमात् ॥ ५

'परमेष्ठ्यक्षराश्चाद्याः पञ्चातो ज्ञान-दर्शन- ।
चारित्रेभ्यो नमः' मन्त्रः पदबीजाष्टकोज्ज्वलः ॥ ६

(मन्त्रोद्धारः-जाप्यमन्त्रः-)
"ॐह्राँ ह्रीँ ह्रुँ ह्रूँ ह्रेँ ह्रैँ ह्रौँ ह्रः अ सि आ उ सा ज्ञान-दर्शन-चारित्रेभ्यो नमः ॥"

आदौ 'ॐ ह्राँ' प्रभृत्येकं बीजयुगं ततो नमः ।
मध्येऽर्हद्भ्यः सिद्धेभ्य इति दिक्षु पदाष्टकम् ॥ ७

एषामधः क्रमादिन्द्राग्नि-यमा नैऋतिस्तथा ।
वरुणो वायु-कुबेरावीशानश्च यथाक्रमम् ॥ ८

एषामधो रविश्चन्द्र-मङ्गलौ बुध-वाक्पती ।
भार्गवः शनि-राहू च लिखेद् दिक्षु ग्रहाष्टकम् ॥ ९

अष्टमन्त्रपदै रक्षा स्वशिखा-मस्तकाक्षिषु ।
नासिका-मुख-घण्टीषु नाभि-पादान्तयोः क्रमात् ॥ १०

तन्मध्ये पीतवलयं सुमेरुस्तन्निरक्षरम् ।
तदन्तः द्विर्त्रिशैः कूटैः काद्यैः क्षान्तैः सुधांशुभम् ॥ ११

तदूर्ध्वं ह्रीँ स्वरान्तस्थ-सान्तर्सिहासनो जिनः ।
ह्रीँ त्रिरेखयाऽऽवेष्ट्य बहिर्वारुणमण्डलम् ॥ १२

पार्थिवीधारणायुक्त्या पिण्डस्थं मन्त्रयुक्तितः ।
पदस्थमर्हतो रूपवद् यन्त्रं रूपयुक् क्रमात् ॥ १३

तिर्यग्लोकसमः क्षीराम्बुधिस्तस्यान्तरमम्बुजम् ।
जम्बूद्वीपः सदिक्पत्रं स्वर्णाद्रिस्तत्र कर्णिका ॥ १४

सिंहासनेऽत्र चन्द्राभे आत्मानन्दं परं श्रितः ।
अर्हन्मयो हृदि ध्येयः पार्थिवीधारणेत्यसौ ॥ १५

रेफः सान्तः शिरश्चन्द्रकलाभ्रं नाद ईश्व(स्व)रः ।
सशिरो-रेफ-हः पीतः कला रक्ताऽसितं वियत् ॥ १६

नादः श्वेतः स्वरः तुर्यो नीलो वर्णानुगा जिनाः ।
चन्द्राभ-सुविधी नादः शून्यं श्रीनेमि-सुव्रतौ ॥ १७

कला षडर्कसङ्ख्यौ स्यात् पार्श्व(श्र) मल्लिरीश्व(स्व)रः ।
सशिरो-रेफ-हो द्व्यष्टौ जिना इति चतुर्युगम् ॥ १८

नादोऽर्हन्तः कला सिद्धाः सान्तः सूरिः स्वरोऽपरे ।
बिन्दुः साधुरितः पञ्चपरमेष्ठिमयस्त्वसौ ॥ १९

अन्यत्र विशेषः-

अर्हन्तो वृत्तकला त्रिकोण-सिद्धास्तु शीर्षकं सूरिः ।
चन्द्रकलोपाध्यायो दीर्घकला साधुरिह पञ्च ॥ २०

अर्हन्तः शशि-सुविधी सिद्धा पद्माभ-वासुपूज्यजिनौ ।
धर्माचार्याः षोडश मल्लिः पार्श्वोऽप्युपाध्यायः ॥ २१

सुव्रत-नेमि साधुर्जिनरूपः शक्ति-शिवमयस्त्वेषः ।
त्रिपुरुषमूर्तिर्ध्येयोऽलक्ष्यवपुः सर्वधर्मबीजमिदम् ॥ २२

जैनमिह धर्मचक्रं तच्छायागर्भगं न पश्यन्ति ।
ड र ल क स (श) ह जा (या)ऽहि-गजाः रक्षोऽग्नि-सिंह-
दुष्ट-नृपाः ॥ २३

श्रीगौतमस्य मुद्राभिर्लब्धिभिर्मा निधीश्वरम् ।
त्रैलोक्यवासिनो देवा देव्यो रक्षन्तु सर्वतः ॥ २४

ॐ ह्रीँ श्रीश्च धृतिर्लक्ष्मीर्गौरी चण्डी सरस्वती ।
जयाऽम्बा विजयेत्याद्या विद्या यच्छन्तु मे धृतिम् ॥ २५

भ्रष्टराज्यादयो यं यमर्थमिच्छन्ति तं नराः ।
लभन्तेऽस्य स्मृतेर्युद्धाद्यापदश्च तरन्त्यमी ॥ २६

भूर्जपत्रान्तरालिख्य रक्षा कण्ठ-शिरः-करे ।
मुद्गल-ग्रह-भूतार्तिहृद् वश्यादिप्रसाधनी ॥ २७

त्रैलोक्यवर्तिजैनानां बिम्बैर्दृष्टैः स्तुतैर्नतैः ।
यत् फलं तत् फलं बीजस्मृतावेतन्महद् रहः ॥ २८

अष्टाचाम्लतपःपूर्वं जिनानभ्यर्च्य सिद्धये ।
अष्टजातीसहस्रैस्तु जापो होमो दशांशतः ॥ २९

अष्टमासान् स्मरेत् प्रातर्बीजमेतच्छताधिकम् (१०८) ।
स पश्येदार्हतं बिम्बं सप्तान्तर्भवसिद्धये ॥ ३०

सम्यग्दृशे विनीताय ब्रह्मव्रतभृते इदम् ।
देयं मिथ्यादृशे नैव जै(जि)नाज्ञाभङ्गदूषणः(णम्) ॥ ३१

परमेष्ठिपदानां तु विशेषः पूर्वयन्त्रतः ।
ज्ञेयो रत्नत्रयस्याथ विशेषः कश्चिदुच्यते ॥ ३२

ज्ञान-दर्शन-चारित्र-तपांसीति स्मरन् मुनिः ।
शतमष्टोत्तरं लब्ध्वा(द्धा)चतुर्थतपसः फलम् ॥ ३३

कृत्वा पापसहस्राणि हत्वा जन्तुशतानि च ।
अमुं मन्त्रं समाराध्य तिर्यञ्चोऽपि दिवं गताः ॥ ३४

पतद् व्यसनपाताले भ्रमत् संसारसागरे ।
अनेनैव जगत् सर्वमुद्धृत्य विधृतं शिवे ॥ ३५

मूर्ध्नि रत्नत्रयं बिभ्रज्जिनबीजं नमोऽक्षरम् ।
इति रत्नत्रयं ध्येयं जिनबीजस्य बीजकम् ॥ ३६

पू.आ.श्रीसिंहतिलकसूरि-विरचितः

## ६. ॥ श्रीवर्द्धमानविद्याकल्पः ॥

(यंत्रालेखन-साधना विधिः)

श्रीवीरजिनं नत्वोपाध्याय-महत्तरादिपदयोग्यम् ।
श्रीवर्द्धमानविद्यायन्त्रं षट्कोणबीजमथ वच्मि ॥ १

परमेष्ठिपञ्चविद्याः कैश्चित् स्तुतिपदैर्युताः ।
श्रीसूरिमन्त्रसौभाग्यविद्यादेस्तु पृथक्कृतैः ॥ (अनुष्टुप्) २

ॐवीरे द्विमुखैर्बीजै र्युक्ता श्रीवज्रवाचना ।
श्रीवर्द्धमानविद्याऽभूदुपाध्यायादिहेतवे ॥ (अनुष्टुप्) ३

स्वकृते विहिकापट्टे राजतपत्रे सुगन्धिकुसुमैश्च ।
जातीसुवर्णदूर्वालेखिन्या लिखितषट्कोणे ॥ (अनुष्टुप्) ४

गर्भे जिनपतिबीजं हरि-गिरीश-ब्रह्मवर्णसंभूतम् ।
एतन्मध्ये माया तदन्तरा प्रणव एष विश्वतनुः ॥ (अनुष्टुप्) ५

जिनबीजमौलिमुकुटे ह्राद्यं वर्णत्रयं क्रमेणाद्यः ।
षष्ठे स्वरयुत ऊर्द्ध्वं सबिन्दु [हूं]
रन्यश्च सविसर्गः [ह्रः] ॥ (अनुष्टुप्) ६

अपरो युक्तः सन्ध्यक्षरेण तुर्येण सकलशून्येन ।
ह्रौँ सनमोऽथ वर्धमानस्वामिन इति,
पवन-गगनमिति परिधिः ॥ (अनुष्टुप्) ७

षट्कोणादिक्रमतः प्रणवो वीरे युगं च जयवीरे ।
समहावीरे-सेणवीरे इति वद्धमाणवीरे च ॥ (अनुष्टुप्) ८

सजये विजये जयन्ते अपरा संयुतजिए अ सव्वट्ठा ।
सिद्धे तह निव्वुए महाणसे महाबले स्वाहा ॥ (अनुष्टुप्) ९

संविभज्याक्षरा एते लेख्याः कोणेषु षट्स्वपि ।
एषा पञ्चाननी विद्या सूरिविद्यासमा मता ॥ (अनुष्टुप्) १०

उक्तं च-

उत्पत्तिं विगमं ध्रुवं गणधराः प्रोच्चैर्निशम्याननाद्-
व्याख्यान्ते जिनभर्तुरुत्तमधियश्चक्रुर्जिनेन्द्रागमम् ।

पूर्वं गौतमनामधेयगणभृत् सारस्वतप्रोल्लसद्-
विद्यामुद्यदपूर्वतत्त्वतरणिः श्रीवर्द्धमानाभिधाम् ॥(शा..वि.)११

षट्कोणान्तर्निविष्टं हरि-विधि-गिरीशैर्नाममन्त्रेण युक्तं,
यद्रूपं शान्तभावं शिवपदकलितं तत्त्वसारं विदन्ति ।
मायाबीजं यदन्तः शिवपदसुगतौ दत्तनेपथ्यभावं
तस्यान्तः साधकस्य प्रणवपदमिदं युक्तमास्ते जनस्य ॥ १२
(स्रग्धरा)

अर्हं मन्त्रस्य मौलौ मुकुटमणिमयं ह्रादिवर्णत्रयं यत्
पूर्वं शून्योपरुद्धः स्वरशरपरगश्चापरोऽग्रे विसर्गः ।
तस्मादन्त्यस्वरेणान्वितसकलवपुबिन्दुयुक्तश्च वर्णः ।
स्वाहान्तं वर्द्धमानान्वितमिति च नमः स्वामिने मन्त्ररूपम् ॥१३
(स्रग्धरा)

एतन्मन्त्रपवित्रयन्त्रमसमं वीरे द्विरुक्त्याऽन्वितं,
षट्कोणेषु जयादिवीरकलितं ध्यायेत् स योगीश्वरः ।
तस्याहर्निशमेव संपदतुला लीलाविलासोज्ज्वला,
संपद्येत मनोरमा सुरवरैः काम्येतया कौतुकात् ॥(शा.वि.) १४

॥ इति पौराणी वाणी ॥

बीज त्रितयस्यार्थः -

अकारो भुजगाकृत्या कुण्डली विश्वजन्मभूः ।
तत्परो हः शिवः स्वात्मा राजते अर्हमित्यतः ॥(अनुष्टुप्) १५

प्रायो यन्त्रे परं [परे] हूं स्यात् कुण्डलीजन्मभूज्झितः ।
अर्हमित्यादिगणनादूद्र्ध्वं रत्नत्रयाश्रयः ॥ (अनुष्टुप्) १६

यद्वा – दूर्वाधः सत्रिरत्नयुक् ॥
रपरं हं त्रिकोणरूढं ईश्वरखण्डेन्दुबिन्दुनादाढ्यम् ।
आज्ञाचक्रे पश्यति वह्निपुरेशाक्षिपरसंज्ञे ॥ १७

विशेषश्च –
लक्ष्यं त्रिकोणशब्दात् तत्र शिवं ह–प्राणरूपशक्तिवृतम् ।
चन्द्रकलाशशिनाड्यां सबिन्दु यो जपति तस्य वश्याप्तिः ॥१८

यद्वा–
षट्कोणेऽधिष्ठाने मायाबीजं स्फुलिङ्गवद् ध्यायेत् ।
षट्कोणे देहे वा स्त्रीणामिह वश्यमेवाशु ॥ १९

अउत[म्]उपाधित्यक्तश्चैतन्यकलामयो वपुः शून्यः ।
नादः शब्दोच्चार्यः प्रणवः सिद्धो जिनश्चात्म ॥ २०

बीजत्रितयस्यार्थो गणभृन्मन्त्रेऽथ चर्चितः किन्तु ।
दिग्मात्रमिदं दर्शितमत्रेतो लिखनविधिमाह ॥ २१

(लेखनविधिः)
कोणान्तरेषु आँ क्रौँ ह्रीँ ॐअग्रे हृद्वयं द्वयम् ।
रुद्रवर्णशिरः शून्यं क्रमात् सद्वादशस्वरम् ॥ (अनुष्टुप्) २२

तथा च– आं क्रौँ ह्रीँ ॐ सर्वत्र ह्रँ ह्राँ ह्रिँ ह्रीँ ह्रुँ ह्रूँ ह्रेँ ह्रैँ ह्रोँ ह्रौँ ह्रँ ह्रः कोणेषु जातम् ।
सर्वस्वराद्यजिनपतिगौतमबीजैः सगौतमो वीरः ।
द्वादशपर्षन्मध्ये ध्येयः स्वाहा–नमोऽन्त्यपदः ॥ २३

वृत्तरेखान्तरा षोढा विभज्य सृष्टितो लिखेत् ।
ॐ ह्रीँ ह्रमथ वीराय स्वाहा क्षुं त्रिपदे परे ॥ (अनुष्टुप्) २४

श्रीवीरपूजयाऽधिष्ठाधिसहस्रं जपतः पुरा ।
सिद्धौ चाष्टशतं जप्ताऽक्षतैरक्षीणकोशता ॥ (अनुष्टुप्) २५

चतुरस्रमतः कृत्वाऽग्न्यादिकोणचतुष्टये ।
जये विजये जयन्ते तत् क्रमादपराजिते ॥ (अनुष्टुप्) २६

नामादौ प्रणवो माया प्रान्तेषु हृचतुष्टयम् ।
आँ ईं ऊं अः सहैकैकं क्रमात् स्वाहाऽथ सर्वतः ॥ स्वाहा ॥२७
(अनुष्टुप्)

जयादयश्चतस्रोऽमूः सिद्धाः स्व-परदेशजम् ।
जयं विजयं वाद्युत्थमन्त्यं कुर्युर्द्वयं नृणाम् ॥ (अनुष्टुप्) २८

चतुरस्रं चतुर्द्वारमतः कृत्वाऽत्र सृष्टितः ।
लेख्या वलयतो विद्या वर्धमानाभिधा इमाः ॥ (अनुष्टुप्) २९

(वाचनाचार्य-प्रवर्तिन्योर्मन्त्रः)
ॐ ह्रीँ नमो अरिहंताणं ।
ॐ ह्रीँ नमो भगवओ अरिहंतस्स महइ महावीरवद्धमाणसामिस्स सिज्जउ मे भगवई महई महाविज्जा ।
ॐ वीरे वीरे महावीरे जयवीरे सेणवीरे वद्धमाणवीरे जये विजये जयन्ते अपराजिए अणिहए ॐ ह्रीँ स्वाहा ॥
परमेष्ठिपदैः पञ्चभिः ॐ ह्रीँ युग्भिः सपञ्चयुगवर्णाः ।
ॐ ह्रीँ नम इति विद्याप्रान्तेर्द्विवार्धयो वर्णाः ॥ ३०
पञ्च-युगत्रय-षट्कं
द्वि-गुण-त्रय-पञ्च-वार्द्धि-युग-युगलम् ।
सर्वैरथ चत्वारः श्लोका वर्णत्रयं शेषम् ॥ ३१

एषा तु वाचनाचार्य-प्रवर्त्तिन्योः शुभेऽहनि ।
देया सातिशये चैत्ये सर्वकर्मकरी तयोः ॥ (अनुष्टुप्) ३२

(उपाध्यायविद्याः)

ॐ ह्रीँ नमो अरिहंताणं ५ । ॐ ह्रीँ नमो भगवओ अरिहंतस्स महइ महावीरवद्धमाणसामिस्स सिज्झउ मे भगवई महइ महावीरवद्धमाणसामिणी महाविज्जा ॥

परमेष्ठिपदैः पञ्चभिः ॐ ह्रीँ युग्भिः सपञ्चयुगवर्णाः ।
ॐ ह्रीँ नम इति विद्याप्रान्तैर्वेदाऽक्षमितवर्णाः ॥ ३३

ॐ ह्रीँ वीरे वीरे ॐ ह्रीँ महावीरे महावीरे ॐ ह्रीँ जयवीरे जयवीरे ॐ ह्रीँ सेणवीरे सेणवीरे ॐ ह्रीँ वद्धमाणवीरे वद्धमाणवीरे ॐ ह्रीँ जये जये ॐ ह्रीँ विजये विजये ॐ ह्रीँ जयन्ते जयन्ते ॐ ह्रीँ अपराजिए अपराजिए ॐ ह्रीँ सव्वट्ठसिद्धे निव्वुए महाणसे महाबले स्वाहा ॥

बीजद्वयपुनरुक्त्या विद्या वर्णा इहैकनवतिमिताः ।
एतैः प्राग्वर्णयुतैः षट्श्लोकाः स्युर्द्विवर्णोनाः ॥ ३४

अक्षैर्निषद्यया सार्द्धमुपाध्याय महास्पदम् ।
देया योग्याय शिष्याय विद्येयं सर्वकर्मकृत् ॥ (अनुष्टुप्) ३५

विद्याविशेषश्चात्र, (आचार्यतुल्ययतियोग्यविद्या)

ॐ ह्रीँ हूँ नमो जिणाणं, ॐ ह्रीँ नमो ओहिजिणाणं, ॐ ह्रीँ नमो परमोहिजिणाणं, ॐ ह्रीँ नमो सव्वोहिजिणाणं, ॐ ह्रीँ नमो अणंतोहिजिणाणं, ॐ ह्रीँ नमो कुट्ठबुद्धीणं, ॐ ह्रीँ नमो पयाणुसारीणं, ॐ ह्रीँ नमो संभिन्नसोआणं, ॐ ह्रीँ नमो

चउदसपुव्वीणं, ॐ ह्रीँ नमो अट्ठंगनिमित्तकुसलाणं, ॐ ह्रीँ नमो विउव्वणइड्ढिपत्ताणं, ॐ ह्रीँ नमो विज्जाहराणं, ॐ ह्रीँ नमो पन्न(ण्ह)समणाणं, ॐ ह्रीँ नमो आगासगामिणीणं, ॐ ह्रीँ क्रौँ क्रौँ ग्रौं ग्रौं स्वाहा।

स्तुतिपदमनुभिर्विद्या गणभृद्बीजान्वितादिमध्यान्ता।
आचार्यतुल्ययतये देया स महानुपाध्यायः॥ ३६

अष्टनव-रुद्रदशकं प्रतिमा-नव-दश-दशेश्वरा-मनवः।
त्र्यधिदश-नव-दिग्-दश-गजपदवर्णैः त्रिपञ्चशशिसंख्या॥३७

स्तुतिपदफलम्-

अथ स्तुतिपदं वक्ष्ये यतेरुत्सर्गकारिताः (तत्)।
अष्टोत्तरशतं ध्यानभुञ्जनाद्यपि सर्वतः॥ (अनुष्टुप्) ३८

आद्ये विशूचिकानाशो ज्वरस्तम्भो द्वितीयके।
शिरोरोगहृत् तृतीयं तुर्यं नयनरोगहृत्॥ (अनुष्टुप्) ३९

परं कर्णार्त्तिनाशाय षष्ठं शूलार्त्तिशान्तये।
मुनावकथितं ज्ञानमष्टमे दूरदर्शिता॥ (अनुष्टुप्) ४०

नवमे बहुश्रुतत्वाज्जानाति स्व-परागमम्।
परे जिनमिताहोभिर्ध्यानाज्जीवितसंविदः॥ (अनुष्टुप्) ४१

रुद्राख्येऽष्टयुगाहोभिः पञ्चोपचारपूजया।
जापो रक्तकणवीरैः काम्यवस्तुसमागमः॥ (अनुष्टुप्) ४२

द्वादशेऽथ नभोगामी चन्द्रप्रभजिनालये।
श्वेतकणवीरजापादायुर्ज्ञानं त्रयोदशे॥ (अनुष्टुप्) ४३

चतुर्दशे योजनैकं व्योम्नि याति तपः क्रिया ।
विकथावर्जनं जैन-ध्यानं सर्वत्र संमतम् ॥ (अनुष्टुप्) ४४

अप्रतिचक्रायन्त्रे गणभृन्मन्त्रे च विस्तरेणोक्ते ।
दिग्मात्रमत्र दर्शितमिह यन्त्रे पूजनं महासिद्ध्यै ॥ ४५

ॐ ह्रीँ श्रीँ धृति-कीर्ति-बुद्धि-लक्ष्मी स्वाहा ॥
युगपत्रनाभिपद्मे गर्भे बीजत्रयं जिनानुकृति ।
धृत्यादिदलचतुष्के न्यस्य ध्येयं यथार्थसिद्धिरथ ॥ ४६

महोपाध्यायसूरीणामसौ त्रयोदशाक्षरी ।
अनिर्वृत्ययशो-हानि-मोहच्छेदकरी स्मृता ॥ (अनुष्टुप्) ४७

तथा -

ॐ नमो भगवओ अरिहंतस्स महइ महावीरवद्धमाणसामिस्स सिज्झउ मे भगवई महई महाविज्जा ॥ ॐ वीरे महावीरे जयवीरे सेणवीरे वद्धमाणवीरे महानंदणे सिद्धे सिद्धक्खरे सिद्धबीए अणिहए नायघोसे सारवन्ने घोससारे परमे परमसुहए जये विजये जयंते अपराजिए सव्वुत्तमे परमपयपयत्ते स्वाहा ॥

ॐ नम इति विद्यान्तैर्वर्णाः शशि-वार्द्धिसंख्यका ज्ञेयाः ।
पञ्च-चतुस्त्रय-षट्कं विषयद्वय-युगरस-त्रयं पञ्च ॥ ४८

द्वि-गुण-त्रय-पञ्च-चतुर्मुनिर्द्विकं द्व्यधिकविंशपदवर्णाः ।
अष्टाष्टौ प्रागक्षरयुक्ता नन्दद्विकेन्दुमिताः ॥ ४९

श्लोकचतुष्टयमेकाक्षराधिकं देयमिह महत्तरयोः ।
अतिशयविद्या एताः पदं विना न यतिमात्रे स्युः ॥ ५०

एतन्मध्यात् त्रितयं चतुरस्रे लेख्य मौलिवृत्ततया ।
पूर्वादिद्वारचतुः क्रमादथो वक्ष्यते विद्या ॥ ५१

जिनबीजान्तःप्रणवस्तन्मध्ये ह्रीँपुरेऽवशेषं स्यात् ।
पुस्तकसमाप्तिकार्ये साष्टशतं नित्यजापतो रम्यम् ॥ ५२

मायान्तर्जिनबीजं तन्मध्ये ॐपुरेऽविशेषं स्यात् ।
सौभाग्यार्थं नित्यं रक्तध्यानेन साष्टशतजापः ॥ ५३

प्रणवान्तर्जिनबीजं तन्मध्ये ह्रीँपुरेऽवशेषमिह ।
इत्यादिमारिशान्त्यै श्वेतध्यानेन नित्यमष्टशतम् ॥ ५४

मायान्तःप्रणवस्तन्मध्ये जिनपोऽत्र पूर्ववच्छेषम् ।
स्त्रीसीमन्तेऽरुणिते वश्यं नित्याष्टशतजापात् ॥ ५५

शेष शब्देन "हूँ ह्रः ह्रौँ नमो वर्द्धमानस्वामिने" इति सूच्यते ।
मध्याक्षराद्वाच्यं तत्राम्नायः परन्तु कार्यवशात् ।
संपुटवर्णा वाच्याः प्रमाणमेकोऽत्र गुरुरेव ॥ ५६

भूमण्डलवेष्ट्यमिदं यन्त्रविधिः पूर्ण एष वक्ष्येऽथ ।
षट्कोणान्तर्विद्याऽक्षरसंख्यापदविशेषेण ॥ ५७

(यन्त्रविधिः)
षट्कोणान्तर्विद्याक्षराणि संयम-मितानि तैर्युक्ता ।
षट्कोणलिखितवर्णा एकाधिकसप्तति र्भवति ॥ ५८

स्वाहास्थाने अणिहए मा चल मा चल वृद्धिदे ।
ॐ ह्रीँ सः स्वाहोपाध्याय-महत्तरपदाश्रया ॥ ५९

प्रागुक्तैकोनसप्तत्या युक्ता सप्तदशाक्षरी ।
षडशीत्यक्षराः श्लोकद्वयं शेषं युगद्वयम् ॥ (अनुष्टुप्) ६०

वर्द्धमानाह्वविद्यानामेतासां वीरजन्मभे ।
उपवासोऽष्टसहस्त्रं पुष्पाद्यैः सिद्धये जपः ॥ (अनुष्टुप्) ६१

सान्तः षट्कोणविद्यायां जातीसुमनसां स्मृतः ।
पञ्चदशसहस्त्राणि जापो होमो दशांशभृत् ॥ (अनुष्टुप्) ६२

दीपोत्सवेऽथ चैत्रे वा शुद्धत्रयोदशीतिथौ ।
प्रतिवर्षं जातिपुष्पैर्जापोऽष्टाधिसहस्त्रकः ॥ (अनुष्टुप्) ६३

अलाभे लाभदा किन्तु यन्त्रान्तःप्रतिमोपरि ।
जापः पटादावालिख्य श्रीवीरप्रतिमोपरि ॥ (यु.)(अनुष्टुप्)६४

दीपोत्सवेऽथ चैत्रे वा शुद्धत्रयोदशीतिथौ ।
उपवासेऽष्टसहस्त्रं करजापं विधाय तत् ॥ (अनुष्टुप्) ६५

साष्टशतं शतपत्रैस्तत्संख्यैरक्षतैरथ ।
यन्त्रे श्रीवीरमूर्त्तौ वा वासरानेक विंशतिः ॥ (अनुष्टुप्) ६६

जपेत् पुष्पाक्षताद्यं तच्चूर्णं वासयुतं गुरुः ।
यस्य मूर्ध्नि क्षिपेत् स स्याद् वश्यो मध्येऽथ गर्भदम् ॥ ६७
(अनुष्टुप्)

सूर्यसंख्यासहस्त्राणि यन्नाम्ना शालितन्दुलान् ।
शतपत्रैः समं जप्त्वा शुष्कपुष्पाक्षतादिकम् ॥ (अनुष्टुप्) ६८

सिता-घृत-मधु-क्षीरसंयुतं तद् दशांशतः ।
होमयेदेष आजन्म वश्यो राजादिको भवेत् ॥ (अनुष्टुप्) ६९

यन्त्रमालिख्य संपूज्य त्रिदिनीं पाय्यतेऽम्बुना ।
रोगदोषहरं दुग्धधौतं वन्ध्यासु गर्भदम् ॥ (अनुष्टुप्) ७०

सर्वाक्षरमध्याक्षरगर्भगतं साध्यनाम् शान्त्यादौ ।
श्वेतादिवर्णयुक्त्या ध्यातं शान्त्यादिकर्मषट्ककरम् ॥ ७१

शुक्लं शान्तौ पुष्टे वश्याकृष्टौ जपारुणं धूम्रम् ।
विद्वेषोच्चाटनयोः कृष्णं मृत्यौ नभोमयं मुक्तौ ॥ ७२

प्रणवो भूरसिभूता धात्री भूमेश्च शुद्धमिति ।
कुरु कुरु स्वाहा प्रसृति प्रसृतैर्भूमीं गोमयरसैः सिञ्चेत् ॥ ७३

ॐ ह्रीँ विमले तीर्थात् जले तदशुचिः शुचिर्भवामि ।
अस्मात् स्वाहा रोहिण्यादिमदेवीभिः कारितस्नानः ॥ ७४

विहिताष्टाङ्गरक्षो नमस्कृत्याष्टसंपदा ।
पूर्वोत्तरमुखो ध्यायेद् विद्यां लीनमना इमाम् ॥ (अनुष्टुप्) ७५

प्रतिदिनमस्या जापात् प्रयाति हत्यादिपातकं सर्वम् ।
लभते राज्यसुतादीन् भवत्रयाद् याति मुक्तिपदम् ॥ ७६

श्रीवर्द्धमानविद्यायन्त्रविधिं लिखितवानिहात्मकृते ।
विबुधचन्द्रगणभृत् शिष्यः श्रीसिंहतिलकसूरिरिमाम् ॥ ७७

पू.आ. श्रीसिंहतिलकसूरिविरचितः

(चतुर्विंशति-जिन-विद्या-समलङ्कृतः)

## ७. ॥ श्रीवर्द्धमानविद्याकल्पः ॥

(आर्या)

श्रीवीरजिनं नत्वा यशोदेवं गुरुं विबुधचन्द्रम् ।
श्रीवर्द्धमानविद्याकल्पं वक्ष्यामि जिनभक्त्या ॥ १

श्रीचन्द्रसेनपूज्या आचार्यपरम्परागतं कल्पम् ।
गणभृन्मन्त्रादेनं व्यक्तं चक्रुस्ततश्च तान् स्तौमि ॥ २

विजितेन्द्रियविषयमना जित-लोभ-क्रोध-मान-मद-मायः ।
उभयकुलशुद्धसाधुर्गृहीतसिद्धान्तसारमतिः ॥ ३

सुविहितयोगोद्वहनो शुद्धाचारो जिनांह्रिगुरुभक्तः ।
श्रीवर्धमानविद्याकल्पे योग्योऽथ सूरिमन्त्रे च ॥ ४

एतद्व्यस्तगुणाय च विद्याकल्पं ससूरिमन्त्रममुम् ।
दत्ते लिप्यते गुरुः स जिनाज्ञाभङ्गदोषेण ॥ ५

सर्वेषां तीर्थकृतां कल्याणकपञ्चधिष्णयुतधिष्ण्यम् ।
अभिषेकहेतु वक्ष्ये विद्या साध्याऽस्तु जैनजन्मर्क्षे ॥ ६

नाभेयस्योत्तराषाढाः पञ्चाभिजिच्च मुक्तये ।
अजितस्याथ रोहिण्यः पञ्च मार्गं तु सिद्धये ॥ (अनुष्टुप्) ७

संभवस्याथ मार्गाणि पञ्चार्द्रा मुक्तिहेतवे ।
पुनर्वसुनि तुर्यस्य पञ्च पुष्यं तु मुक्तये ॥ (अनुष्टुप्) ८

सुमतेः पञ्चपैत्र्याणि सिद्धये पूर्वफाल्गुनी ।
पद्मप्रभस्य चित्रा षट् क्वचिदन्यदपि स्मृतम् ॥ (अनुष्टुप्) ९

सुपार्श्वस्य विशाखा पञ्चानुराधा तु मुक्तये ।
चन्द्रप्रभेऽनुराधाः स्युः पञ्च ज्येष्ठा च मुक्तये ॥ (अनुष्टुप्) १०

सुविधौ पञ्चमूलानि पूर्वाषाढा शिवास्पदम् ।
शीतले पञ्चपूषाः स्युः उषा च मुक्तिहेतवे ॥ (अनुष्टुप्) ११

श्रेयांसे श्रवणाः पञ्च धनिष्ठा सिद्धिसंशिनी ।
वासुपूज्ये शततारा: पञ्च स्युः पूर्वभा शिवे ॥ (अनुष्टुप्) १२

विमलस्योत्तराभद्राः पञ्च सिद्ध्यै च रेवती ।
अनन्ते पञ्चरेवत्यो जाता मुक्त्यर्थमश्विनी ॥ (अनुष्टुप्) १३

धर्मस्य पुष्यषट्कं शान्तेः षट् भरणी परम् ।
श्रीकुन्थोः कृत्तिकाषट्कं रेवत्यः षडरस्य च ॥ (अनुष्टुप्) १४

पञ्च मल्लेः स्युरश्विन्यो भरणी शिवदायिनी ।
सुव्रतेः श्रवणाः षट् स्युरश्विन्यः षट् नमिप्रभोः ॥(अनुष्टुप्)१५

श्रीनेमिनोऽथ चित्राः षट् वामेये षट् विशाखिका ।
वीरस्योत्तरफाः पञ्च स्वातिर्निवृतये मता ॥ (अनुष्टुप्) १६

इति विज्ञाय धिष्ण्यानि प्राग्जिनजन्मधिष्ण्यके ।
तदभावेन कल्याणधिष्ण्ये साध्या इमा मुनेः ॥ (अनुष्टुप्) १७

साध्याऽथ यस्य विद्याऽस्ति तस्य चैत्येऽतिशायिनि ।
चतुर्थतपसाऽष्टाधिसहस्रं जातिजैः सुमैः ॥ (अनुष्टुप्) १८

तमर्चयेत् तु यद्वाऽस्य कराब्जशालितन्दुलान् ।
मुञ्चत्यष्टाधिसहस्रं विद्यालीनमना मुनिः ॥ (अनुष्टुप्) १९

सिद्धायामिति विद्यायां सम्यक् तत्त्वभृतां भृशम् ।
इमां कार्ये प्रयुञ्जीत नान्यथेता[त्ये]स्ति जैनगीः ॥(अनुष्टुप्)२०

वर्द्धमानोपदिष्टत्वाद् वर्धमानाभिधा इमा ।
इति श्रीवीरचैत्यान्तः सर्वा साध्याऽस्तु सम्मतिः ॥(अनुष्टुप्)२१

सर्वविद्यास्मृतावादौ पूर्णा पञ्चनमस्कृतिः ।
यद्वा पञ्चपदी वाच्या मुनिना प्रणवादिमा ॥ (अनुष्टुप्) २२

यदि वा -

नमो जिनावधि-जिनाः परात् सर्वाद् अनंतः ।
अवधिजिनाः केवलिजिनेभ्यो नम इत्यपि ॥ २३

यद्वा स्तुतिपदीमध्यादादौ पञ्चपदी गुरोः ।
प्राप्य वाच्या याऽपि साऽपि सम्मतं महतामिदम् ॥ २४

पणवो नमो भगवो अरहओ अमुगस्स सिज्झउ तहा मे ।
अह भगवई अ महई महविज्जा सव्वआइम्मि ॥ २५

यद्वा-

पणवो नमो भगवओ अरहओ अमुगस्स इत्थ जं विज्जं ।
तह य पउंजे सा मे विज्जाउ पसिज्झउ पयं वा ॥ २६

सव्वासिं पज्जंते साहाकारो अकज्जओ नेओ ।
इगवेलसव्वभणणे साहंते वीरविज्जाए ॥ २७

चउवीसदले पउमे मज्झे अरिहेह जस्स पयभत्ती ।
पुव्वाइजुगाइजिणप्पमुहा नियअंकवण्णजुआ ॥ २८

पणवोऽरिहस्स नामे चउत्थइगवयणमंतिमाइपयं ।
तस्संतिनमो हिट्ठा विज्जा अह भिन्नपत्तेसु ॥ २९

रिसहस्स दुण्णि विज्जा दिट्ठा मह तह वि इत्थ दंसेमि ।
एगं जेण गुरूहिं भणिअं वीरस्स विज्जदुगं ॥ ३०

ॐ श्री ऋषभाय नमः ॥

ॐ नमो अरिहंताणं इत्यादि पूर्णो यद्वा पदानि पञ्च ॥ यद्वा, ॐ नमो जिणाणं, ॐ नमो ओहिजिणाणं, ॐ नमो परमोहिजिणाणं,

ॐ नमो सव्वोहिजिणाणं, ॐ नमो अणंतोहिजिणाणं, ॐ नमो केवलिजिणाणं, ॐ नमो भगवओ अरिहओ उसभसामिस्स सिज्झउ मे भगवई महई महाविज्जा। ॐ नमो भगवओ अरिहओ उसभसामिस्स आइतित्थगरस्स जस्सेअं जलंतं गच्छइ। चक्कं सव्वत्थ अपराजिअं। आयावणी ओहावणी मोहावणी थंभणी जंभणी हिलि हिलि कालि कालि चोराणं भंडाणं भोइआणं। अहीणं दाढीणं नहीणं सिंगीमं वेरीणं जक्खाणं पिसायाणं मुहबंधणं दिट्ठिबंधणं करेमि ठं ठः स्वाहा ॥

प्राकृतसंस्कृतबन्धाद् भवन्ति विद्यापदानि भग्नानि।
ज्ञात्येत्यत्र न बन्धः कृतो मया स्वात्मसदृशबोधाय ॥ ३१

प्रागुक्तजापसिद्धौ पथि भीतौ राजकादिवैषम्ये।
वसतिकुलसंघवस्त्राद्युपकरणं त्रातुमिह सुयतिः ॥ ३२

एकयुगमितां विद्यां स्मृत्वा धूलीमुतैष कर्करकान्।
क्षिपति दिगष्टकसंमुखमथवा ग्रन्थिं निजे वस्त्रे ॥ ३३

आदिजिनधर्मचक्रच्छायावृतमत्र रक्ष्यमनुचिन्त्य।
तद्धर्मचक्रधाराऽभिहतश्चिन्त्यश्च शत्रुगणः ॥ ३४

इति प्रथमा [विद्या] ॥

ॐ अजिए अपराजिए अणिहए महाबले लोगसारे ठः ठः स्वाहा ॥

दारिद्र्य-व्याधिहरः पुत्र-यशः-पुण्य-लाभ-सौभाग्यम्।
दत्ते युगलप्रीतिं शश्वज्जापोऽष्टशतमस्याः ॥ ३५

इति द्वितीया [विद्या] ॥

ॐ संभवे महासंभवे संभूए महासंभावणे ठः ठः स्वाहा ॥
फल–कुसुमाक्षत–दलसिद्धार्थैर्दत्तैर्गजाष्टशतजप्तैः ।
बलिगन्धतैलाभ्यङ्गाद् वश्यं तु शाम्भवीविद्या ॥ ३६
इति तृतीया [विद्या] ॥

ॐ नंदणे अभिनंदणे सुनंदणे महानंदणे ठः ठः स्वाहा ॥
जलमभिन्त्र्याष्टशतं प्रक्षाल्य मुखं यदन्तिके स्वेन ।
गम्येत स वश्यः स्वादित्याभिनन्दनजिने विद्या ॥ ३७
इति चतुर्थी [विद्या] ॥

ॐ नमो सुमइए सुसुमई सुमई सुमणसे सुसुमणसे ठः ठः स्वाहा ॥
अभिमन्त्र्याष्टाधिशतं निजकं शयितस्त्रिकालभाव्यर्थम् ।
आत्मार्थं तथ्यमसौ पश्यति सा पञ्चमी विद्या ॥ ३८
इति पञ्चमी [विद्या] ॥

ॐ पउमे महापउमे पउमुत्तरे पउमुप्पले पउमसरे पउमसिरि ठः ठः स्वाहा ।
अष्टशतमभिमन्त्रितसरोजपाणिर्जनेषु सौभाग्यम् ।
पद्मं तदर्प्यते वा यस्यासौ वश्यतामेति षष्ठी ॥ ३९
इति षष्ठी [विद्या] ॥

ॐ पासे सुपासे अइपासे सुहपासे महापासे ठः ठः स्वाहा ॥
अभिमन्त्र्य वपुः शेते विजने स्वप्ने शुभाशुभं वेत्ति ।
अस्पृश्यः सर्पादेर्व्याघ्रादेः पथि च सप्तमिका ॥ ४०
इति सप्तमी [विद्या] ॥

ॐ चंदे सुचंदे चन्दप्पहे सुप्पहे अइप्पहे महाप्पहे ठः ठः स्वाहा॥
ससाभिमन्त्रितपयोधौतमुखः सुभग एक युगमानम् ।
अभिमन्त्र्य यस्य मुकुरो दृश्यो वश्यः स इति चान्द्री ॥ ४१

यदिवा,
चन्द्रप्रभबिम्बाग्रे मुकुरं संपूज्य पृच्छ्यते कन्या ।
पश्यति च यथावस्थितमेषा ब्रूतेऽथ तत्कथितम् ॥ ४२

इत्यष्टमी [विद्या] ॥

पुप्फे पुप्फे महापुप्फे पुप्फदंते ठः ठः स्वाहा ॥
सिद्धार्थकं पत्रफल-पुष्पाद्यष्टशतमथ सकलदिनम् ।
जप्तं दत्ते यस्मै वश्योऽसौ सुविधिजिन-विद्या ॥ ४३

इति नवमी [विद्या] ॥

ॐ सीयले पासे पसंते निव्वुए निव्वाणे निव्वुइ त्ति नमो भगवईए ठः ठः स्वाहा ॥
श्रवणाक्षि-कुक्षिमूर्ध्नां शूलं स्फोटीं गडुं व्रणं सिञ्चेत् ।
एकयुगजप्तपाथोधाराभिर्दशमजिनविद्या ॥ ४४

इति दशमी विद्या ॥

ॐ सिज्जंसे सिज्जंसे सुसिज्जंसे सुसिज्जंसे सेयंकरे महासेयंकरे पहंकरे सुपहंकरे ठः ठः स्वाहा ॥
भूतेष्ठायां रात्रौ सरजोबलिकर्म साष्टशतजापम् ।
कुर्यान्मोच्यं च बहिः स स्वस्थश्चन्द्रशशिविद्या ॥ ४५

इति एकादशी विद्या ॥

ॐ वासुपुज्जे वासुपुज्जे महापुज्जे अइपुज्जे पुज्जरिहे ठः ठः स्वाहा ॥
परिजप्याष्टाधिशतं शयिति स्वप्ने निरीक्षते यदसौ ।
तत् सर्वं शुभमशुभं सत्यं स्याद् द्वादशीविद्या ॥ ४६

विशेषश्च,
द्वादशारं लिखेच्चक्रं तत्र सृष्ट्या लिखेदिदम् ।
अन्तः श्रीवासुपूज्यस्य प्रतिमाऽन्यजिनस्य वा ॥(अनुष्टुप्)४७

ॐ नमोऽथ भगवते वासुपूज्याय पट्टके ।
विलिख्य चन्दनेनैव तत्पूज्यं पूर्णिमानिशि ॥ (अनुष्टुप्) ४८

तदाद्या द्वादशमासाः क्रमेणानेन सूत्रयन् ।
मासे मृतिरियं विद्या पुरोक्ता द्वादशाक्षरी ॥ (अनुष्टुप्) ४९

[इति द्वादशी विद्या] ॥

ॐ अमले विमले कमले कमलिणी निम्मले ठः ठः स्वाहा ॥
ससाभिमन्त्रितसुमैः प्रतिमां संपुज्य तिष्ठति स्वकृते ।
तत्रस्थः पश्यति यः सत्यार्थः स इति विमलजिनविद्या ॥५०

[इति त्रयोदशी विद्या] ॥

ॐ अणंते केवलनाणे अणंते पज्जवनाणे अणंतेगमे अणंते केवलनाणदंसणे ठः ठः स्वाहा ॥
शास्त्रारम्भे जप्त्वा साष्टशतं शयित एष यत्स्वप्ने ।
पश्यति तत्सर्वमिदं तथैव तदनन्तजिनविद्या ॥ ५१

[इति चतुर्दशी विद्या] ॥

ॐ धम्मे सुधम्मे धम्मचारिणि सुअधम्मे चरित्तधम्मे आगमधम्मे धम्मुद्धरणी धम्मधम्मे उवएसधम्मे ठः ठः स्वाहा ॥

शिष्याचार्याद्यर्थे कायोत्सर्गे जपन्निमां विद्याम् ।
पश्यति शृणोति यदसौ तत् सत्यं सर्वमेव पञ्चदशी ॥ ५२

यद्वा-

कार्यारम्भे शिष्यश्रवणो विद्याभिमन्त्रितोऽष्टशतम् ।
कार्यस्य पारदर्शी विशेषतोऽप्यनशनग्राही ॥ ५३

[इति पञ्चदशी विद्या] ॥

ॐसंति पसंति उवसंति सव्वं पावं उवसमेहि ठः ठः स्वाहा ॥

देश-पुर-ग्रामरुजां कुल-गो-हय-नर-नृपादि-मारीषु ।
अष्टशतमभिमन्त्रित-धूपाग्निमगन्धतः शान्तिः ॥ ५४

कर्पूर-चन्दनरसैः पात्रे विद्यामिमां विलिख्यान्तः ।
पूज्यः शतपत्रसुमैः श्रीशान्तिः सर्वशान्तिकरः ॥ ५५

[इति षोडशी विद्या] ॥

ॐ कुंथुं दुकुंथे कुंथुकुंथे कीडकुंथमई ठः ठः स्वाहा ॥

सप्ताभिमन्त्र्यपांशुर्यं प्रति विक्षिप्यते भवेत् तस्य ।
ग्रह-रोग-ज्वरदोषोपशान्तिरेषेति सप्तदशी ॥ ५६

[इति सप्तदशी विद्या] ॥

ॐ अरणी आरणी आवरणी सयाणि ठः ठः स्वाहा ॥

राजकुलं देवकुलं वादे वा गन्तुमिच्छता विद्याम् ।
परिजप्य पयःपेयं वक्त्रं वाऽभ्यज्य गन्धतैलेन ॥ ५७

बद्ध्वा शिरसि शिखां सा सिद्धार्थान् वा स्वनिवसनप्रान्ते ।
गन्तव्यं यत्रेष्टं सुभगस्तत्रेति चन्द्रगजविद्या ॥ ५८

[इत्यष्टादशी विद्या] ॥

ॐ मल्लि सुमल्लि महामल्लि जयमल्लि अप्पडिमल्लि ठः ठः स्वाहा॥
अष्टशतमन्त्रजप्तं वस्त्रालङ्कारमाल्यफलमुख्यम् ।
दीयेत यस्य वश्यः सोऽवश्यं मल्लिजिनविद्या ॥ ५९
[इत्येकोनविंशतितमी विद्या] ॥

ॐ सुव्वए महासुव्वए अणुव्वए महा(ह)व्वए वई महदिवादित्ये ठः ठः स्वाहा ॥
व्याघ्र-चित्रक-सिंहादेः कस्यचिन्मांसभक्षिणः ।
दग्ध्वा मांसं च कोशं वा तद्रक्षाम्रक्षिताङ्गुलिः ॥(अनुष्टुप्)६०
यस्य नाम्ना जपेद् विद्यामिमामष्टोत्तरं शतम् ।
सहस्रं वा स वश्यः स्यादिति सुव्रत-विद्यया ॥(अनुष्टुप्) ६१
[इति विंशतितमी विद्या] ॥

ॐ नमि नमि नामिणि नमामिणि ठः ठः स्वाहा ॥
सप्ताष्टाधिशतं वा विद्याजप्तं सुवस्त्रशृङ्गारम् ।
पुष्पादि यस्य दत्तं वश्यः स स्यान्नमेर्विद्या ॥ ६२
[इत्येकविंशतितमी विद्या] ॥

ॐ रहे रहावत्ते आवत्ते वत्ते अरिट्ठनेमि ठः ठः स्वाहा ॥
हयं गजं रथं नावं साष्टशताभिमन्त्रितम् ।
आरोहेद् वाहनं वश्यं वैरी वा वशगो भवेत् ॥ (अनुष्टुप्) ६३

नित्यजापाद् रथवासिनाविस्यात् सिद्ध यात्रिकः ।
प्लाक्षं युगाङ्गुलं कीलं स्थापयेदभिमन्त्रितम् ॥(अनुष्टुप्) ६४

नद्यास्तीरे च संपूज्य गन्धाद्यैः सुतरां नदीम् ।
निर्दोषं च शिखाबन्धे विद्या नेमिजिना-श्रया ॥(अनुष्टुप्) ६५

विशेषश्चात्र,

ॐ नमो भगवओ अरिट्ठनेमिसामिस्स अरिट्ठेणं बंधेणं बंधामि भूयाणं जक्खाणं रक्खसाणं वितराणं चा(चो)राणं चोरिआणं साइणीणं वालाणं दाढीणं नहीणं महोरगाणं अन्ने वि जक्खे वि मज्झ दुट्ठा संभवंति तेसिं सव्वेसिं मणं बंधामि दिट्ठिं बंधामि यः यः यः यः ठः ठः ठः ठः हुं फट् स्वाहा ॥

करजापोऽयुत्तमस्याः सितसुमजापोऽयुतमितः सिद्धा ।
सर्वार्थकरी विद्या श्रीनेमिजिनांह्रिभक्तस्य ॥ ६६

[इति द्वाविंशति विद्या] ॥

ॐ उग्गे महाउग्गे उग्गजसे पासे पासे सुपासे पासमालिणि ठः ठः स्वाहा ॥

देश-पुर-ग्रामादेः कोष्ठागारस्य धूप-बलिकर्म ।
कार्यं शिवं च सरुजां शान्तिर्बहुधनमपधनस्य ॥ ६७

द्विपदं चतुष्पदं वाऽभिमन्त्रणाद् वश्यमथ धनं निहितम् ।
सुप्रापं युधि विजयः स्वार्थकृतिः पार्श्वविद्येयम् ॥ ६८

विशेषश्चात्र,

ॐ उग्गे उग्गे महाउग्गे गामपासे नगरपासे पासे सुपासे पासमालिणि ठः ठः स्वाहा ॥

श्रीपार्श्वजन्मनक्षत्रे मूलधिष्ण्येऽथ पार्श्वकम् ।
जातीपुष्पसहस्रेण शालिभिस्तन्मितैरुत ॥ (अनुष्टुप्) ६९

संपूज्योपविशेत् सिद्धावस्याः कार्योदये जिनम् ।
संपूज्याष्टशतं पुष्पैः कायोत्सर्गे दृढव्रतः ॥ (अनुष्टुप्) ७०

विद्यां प्रजपन्नन्तः साक्षाद् भूताश्वसेनजः ।
कार्ये शुभाशुभादेशं शृणुते सत्यमेव तत् ॥ (अनुष्टुप्) ७१
[इति त्रयोविंशतितमी विद्या] ॥

ॐ नमो भगवओ महइ महावीर वद्धमाणसामिस्स, सिज्झउ मे भगवई महई महाविज्जा, ॐ वीरे वीरे महावीरे जयवीरे सेणवीरे वद्धमाणवीरे, जए विजये जयन्ते अपराजिए अणिहए ठः ठः स्वाहा ॥

सुवासाननया जप्तान् शिष्यमूर्ध्नि गुरुः क्षिपेत् ।
स्वकार्यपारगः स स्यादपविघ्नमिहान्तिमा ॥ (अनुष्टुप्) ७२

तथा च–

ॐ नमो भगवओ अरहओ वद्धमाणस्स सुर-असुर-तेलुक्कपूइअस्स वेगे वेगे महावेगे निद्धंतरे निरालंबि विसि विसि फुहि फुहि उयरंते पविसामि । अंतरहिओ भवामि मा मे पविसंतु पावगा ठः ठः स्वाहा ॥

पथि युद्धे द्युते वा स्मरणादपराजितोऽथ चौराणाम् ।
व्याघ्रादीनां भीतौ मुष्टेर्बन्धे भवति शान्तिः ॥ ७३

स्वाहा विना ठशब्दं ठयुग स्वाहा वदन्ति केचिदिह ।
ठयुगस्वाहास्थाने ह्रीँ नम इति केचिदप्याहुः ॥ ७४

श्रीवीरमन्त्रयुगलं विद्यैकैकाथ मुख्यतोऽन्येषाम् ।
लिखिता वक्ष्याम्यधुना वीरा श्रयकमपि मन्त्रगणम् ॥ ७५

पणवो नमो भगवओ महइ [ई] महावीर वद्धमाणस्स ।
सिज्झउ लहुं भगवई महई परओ महाविज्जा ॥ ७६

ॐ वीरे वीरे महावीरे महावीरे सुवीरे जयवीरे सेणवीरे वद्धमाणवीरे जयन्ते अपराजिए स्वाहा। यद्वा, वीरे वीरे महावीरे जयवीरे सेणवीरे जयन्ते अपराजिए स्वाहा ॥

[इति चतुर्विंशतितमी विद्या] ॥ श्रीवर्धमानविद्येयम् ॥

उफ्रायां सोपवासेन श्रीवीरः जातिकाकुसुमैः ।
अष्टोत्तरसहस्रेण तन्दुलैरुत पूज्यते ॥ ७७

अस्याः सिद्धौ शुचिभूत्वाऽभिमन्त्र्य मुखमेतया ।
यत्र गच्छति तत्र स्यादेष सर्वजनप्रियः ॥ (अनुष्टुप्) ७८

सोपवासो जिनं स्मृत्वा तन्दुलानभिमन्त्रितान् ।
कोष्ठागारे क्षिपत्येष वर्धते हीयते न सः ॥ (अनुष्टुप्) ७९

भाजनमभिमन्त्र्यैष सर्वान् भोजयते स्वयम् ।
अन्नं प्रवर्द्धते आत्मभोजनेन तु हीयते ॥ (अनुष्टुप्) ८०

अभिमन्त्र्य मुखं कर्णावेतया शयितो निशि ।
स्वप्ने शुभाशुभं कार्योपदेशं लभते व्रती ॥ (अनुष्टुप्) ८१

अभिमन्त्रितसर्वाङ्गो द्यूते वादे रणादिषु ।
अजेय इति विद्याः श्रीगौतमादिक्रमागताः ॥ (अनुष्टुप्) ८२

इति श्रीचतुर्विंशतिजिनमन्त्रकल्पः ।
श्रीवर्धमानजिनविद्यामध्ये ज्ञातव्यः ॥

तथा,

ॐ सुसिद्धेभ्यः । ॐ नमो वद्धमाणस्स सिंधुले भयवादवीरे महावीरे अजिए अपराजिए स्वाहा ॥

पूर्वफायामभुक्त्या श्रीवीरं-साष्टसहस्रतः ।
जातिपुष्पैस्तन्दुलैर्वा पूजयत्येष सिद्ध्यति ॥ (अनुष्टुप्) ८३

श्रवसी अभिमन्त्र्यैष स्वे वारानेकविंशतिम् ।
शयीत स्वप्नतो वेत्ति जीवितं मरणं नृणाम् ॥ (अनुष्टुप्) ८४

तथा,

पणवो नमो भगवओ महइ० ॥ ॐ वीरे वीरे महावीरे जयवीरे वद्धमाणवीरे अणिहए मा चल मा कर वृद्धिदे स्वाहा ॥

अ-सि-आ-उ-सेति विद्या ध्येया चिन्तामणीयमत्रोक्ता ।
चिन्तामणिरिव दत्ते यथेप्सितं प्रस्तुतं वच्मि ॥ ८५

परमेष्ठिपञ्चककृते चतुरधिविंशति-दले स्वनाभ्यब्जे ।
पूर्वादिदलक्रमतश्चन्द्राभः सुविधिरर्हन्तः ॥ ८६

पद्माभ-वासुपूज्यौ सिद्धाः षोडशसुवर्णभाः सूरिः ।
मल्लिः पार्श्वोऽधीती सुव्रत-नेमी च साधुपदे ॥ ८७

संस्थाप्य जिनानेवं गर्भे स्वात्माऽथ कुण्डलीरूपः ।
विद्यारम्भे पूर्वं पञ्चपदीं स्मरति जिनमूर्त्तिम् ॥ ८८

(आर्या)

यद्वा,

अष्टदलहृदयपद्मे पूर्वाद्यष्ट क्रमाज्जिनाः स्थाप्याः ।
अर्हत् - सिद्धाऽऽचार्योपाध्याय-यतिक्रमास्त्रिमिताः ॥ ८९

इति वर्द्धमानविद्या परमेष्ठिमयीह सूरिविद्येव ।
ध्येया देया च परं योग्याय श्रीजिनाज्ञैषा ॥ ९०

एतास्तु पाठसिद्धा दृढव्रतानां जिनाभिधादेव्यः ।
विद्याधिष्ठात्र्योऽमूर्निजनिजनामनि जिने भक्ताः ॥ ९१

एतद्विद्यावलयं जिनसहितं सूरिमन्त्रयन्त्रेऽपि ।
दृष्टमिदं सातिशयं स्मरणादिह चन्द्रसेनपूज्यानाम् ॥ ९२

अक्षरसंज्ञानकृता प्रतिदोषाद् गुरुवशाच्च येनात्र ।
हीनाधिकवर्णाः स्युः किन्तु त्रिः परीक्षितं लिखितम् ॥ ९३

श्वेतादिवर्णयुक्त्या परमेष्ठिमहांसि सर्वविद्यानाम् ।
सर्वाणि पदानि यतो वश्याद्यं कर्मषट्कमिह कुर्युः ॥ ९४

इत्यवचिन्त्य बहुश्रुतमुखाम्बुजेभ्यो मयाऽऽत्मने लिखितः ।
श्रीवर्द्धमानविद्याकल्पस्त्रि-द्वि-त्रिकेन्दु(१३२३) मिते वर्षे ॥९५

श्रीविबुधचन्द्रगणभृत्शिष्यः श्रीसिंहतिलकसूरिरिमम् ।
साह्लाददेवतोज्ज्वलविशदमना लिखितवान् कल्पम् ॥ ९६

पू.आ. श्री सिंहतिलकसूरिविरचित

## ८. ॥ श्रीवर्धमानविद्याकल्पे यन्त्र[ ले ]खनविधिः ॥

(आर्या)

वक्ष्याम्यथानुषङ्गात् प्रणवपरमेष्ठिसिद्धपदमेकम् ।
पंच इलं पंच इलं जावज्जीवं तु तह अहिणा ॥ १

न डसीअइ प्रदीपात् पर्वण्यस्याष्टयुतशतस्मृत्या ।
वर्षं यावत् सर्पैर्न हि दृश्यः सूरिमन्त्रोऽयम् ॥ २

अस्यायुतं च जातीकुसुमैर्जापो दशांशतो होमः ।
आत्माऽग्निः कुण्डगतो वृद्धाचार्यैः सुधासिक्तः ॥ ३

शैत्यं नीतो ध्यानं सिद्धः पश्चादनशनतोऽष्टशतम् ।
जापे स्वप्ने अर्थं धान्यरसे भावितं दिशति ॥ ४

करजापेऽयुताद् यद्वा सिद्धः कार्ये जनोज्झिते ।
जापे साष्टशतं स्वप्ने सूरिमन्त्रोऽर्थदेशकः ॥ (अनुष्टुप्) ५

तथा–

परमेष्ठिपञ्चपद्यामादावोमं ततो जभमहक्षाः ।
कूटाः क्रमतः प्रतिपदमेकः कूटान्नमश्च सर्वेषु ॥ ६

अम्बुधिदलहृत्पद्मे मध्येऽर्हन् शेषकेषु सिद्धाद्याः ।
तत्र जिनाश्चन्द्रप्रभ–सुविधिमुखाः पूर्ववद् वाच्याः ॥ ७

क्षित्यादितत्त्वपञ्चकमत्र क्रमशश्च पुष्टिरथ शान्तिः ।
वश्योच्चाटन–मारणमिति शशिनिभजैनवर्णादेः ॥ ८

कुर्वीत पूरके सत्याकृष्टिं कुम्भके तथा स्तम्भम् ।
उच्चाटनं च योगी रेचकतो जीवतीति मृतौ ॥ ९

शतपत्रपञ्चशत्या प्रपूज्य वामेयमूर्द्ध्वं वामभुजः ।
दक्षिणभुजपञ्चशतीमन्त्रोपदेशः स्यात् ॥ १०

उक्तं च–

जिनस्तुतिमयं महा जभमहक्षबीजाक्षरै–
र्मलादियुतिसंयुतैः सहितमन्तरं चिन्तयेत् ।
जल–ज्वलन–शाकिनी–गरलभीतिहीनं सदा
शुभोदयनिबन्धनं जगति ते लभन्ते फलम् ॥ ११

सप्तत्यधिशतयन्त्रं मन्त्रेणानेन सुरभिकुसुमशतैः ।
जप्त्वा त्रिदिनीं पयसा धौतं पीतं ज्वरादिहरम् ॥ १२

इत्यवचिन्त्य बहुश्रुतमुखाम्बुजेभ्यो मयाऽऽत्मसंस्मृत्यै ।
श्रीवर्द्धमानविद्या मन्त्रयुतं लिखितमिह किञ्चित् ॥ १३

पू.आ.श्री मुनिसुन्दरसूरिविरचिता

## ९. ॥ श्रीसूरिमन्त्रस्तुतिः ॥

जयश्रियं श्रीजिनशासनस्य कलिद्विषोत्थापितविघ्नहर्ता ।
परां य एवातनुतेऽधुनापि श्रीसूरिमन्त्रं प्रयतः स्तुवे तम् ॥ १

त्वं तीर्थकृत् त्वं परमं च तीर्थं त्वं गौतमस्त्वं गणभृत् सुधर्मा ।
त्वं विश्वनेता त्वमसीहितानां निधिः सुखानामिह मन्त्रराज ! ॥२

किं कामधेनुः सुरपादपो वा किं कामकुम्भः सुमनोमणिर्वा ।
यदि प्रसन्नः सकलेष्टदायी श्रीसूरिमन्त्रोऽसि जगत्पतिस्त्वम् ॥३

त्वयि स्थिते चेतसि के नु विघ्नाः के दुर्जनाः के प्रतिपक्षभूपाः।
के वैरिणः के दुरुपद्रवाश्च स्वामिन् ! समग्रं हि सुखाकृदेव ॥४

न लब्धयः काश्चन ते प्रभावात् त्वयि प्रभौ भक्तिभृतां दुरापाः ।
सदा सुखानन्दितचेतसो यत् खेलन्ति ते श्रीमहिमप्रभाभिः ॥५

प्रवर्तते तीर्थमिदं जिनस्य जयद् यदादुःप्रसहं कु[दृ]ष्टीः ।
यदागमो यद्विजयी च धर्मस्तदत्र हेतुर्भगवँस्त्वमेव ॥ ६

श्रीवर्धमानस्य निदेशतस्त्वं प्रतिष्ठितो गौतमगच्छनेत्रा ।
सिद्धीः समग्राः शिवसम्पदश्च सर्वोग्रपुण्यौघफलानि दत्से ॥७

इति महामुनिसुन्दरसंस्तवास्पद गणेश्वर मन्त्रपते मया ।
महिमवारिनिधे स्तुत भक्तितो वितर मेऽर्थितसर्वसुखश्रियः ॥८

पू.आ.श्री मुनिसुन्दरसूरिविरचितम्

# १०. ॥ श्रीसूरिमन्त्रस्तोत्रम् ॥

जयश्रियं शासनमार्हतं श्रीसूरीश्वरा यस्य महामहिम्ना ।
नयन्ति बाह्यान्तरवैरिनाशादाचार्यमन्त्रं तमहं स्तवीमि ॥ १

न किं सुखं तस्य वशे न का वा, सिद्धिर्न बुद्धिर्न हि वा समृद्धिः।
श्रीमन्त्रनेतर्भगवन् ! निवासं करोषि नित्यं हृदये यदीये ॥ २

गणाधिपो वा जिननायको वाऽथवासि धर्मोऽस्य महामहिम्ना ।
स्तुतिस्तवैतै(तैं?)रुचितोपमानैर्न चातिहीनैस्त्रिदशद्रुमाद्यैः ॥ ३

ध्येयस्त्वमेवाऽसि परो जगत्सु प्रभुश्च दानेऽर्थितशर्मलक्ष्म्याः ।
इमं पुनः कारणकार्ययोगं विदन्तु के नाम विनोग्रभाग्यैः ॥ ४

किमामयस्तस्य खलो रिपुर्वा दुःखं भयं पापमथाऽपि विघ्नः ।
त्रातासि मन्त्राधिप यस्य वज्रं
भिनत्ति शस्त्राण्यखिलान्यहि(पि) द्राग् ॥ ५

तीर्थस्य धर्मस्य तथार्हतस्य हेतुस्त्वमेकोऽसि कलौ प्रवृत्तेः ।
कलेर्हि नान्योऽभिभवे प्रभुत्वं धत्ते दवाग्नेरिव वारिवाहात् ॥६

भवैरनन्तैरपि दुर्लभस्त्वं शुभं च सर्वं सुलभं त्वदाप्तौ ।
तवैव मन्त्राधिपते तदेष कुर्यां समाराधनमेव यत्नात् ॥ ७

इति महामुनिसुन्दरसंस्तवास्पद गणेश्वर मन्त्रपते मया ।
महिमवारिनिधे स्तुत भक्तितो वितर मेऽर्थितसर्वसुखश्रियः ॥८

पू.आ.श्री मेरुतुङ्गसूरिविरचितः

# ११. ॥ सूरिमुख्यमन्त्रकल्पः ॥

श्रीमत्पार्श्वं जिनं नत्वा तथा श्रीगौतमं गुरुम् ।
गुरूपदिष्टश्रीसूरिमन्त्रेशं विवृणोम्यहम् ॥ १

यद्यप्याम्नायभेदोऽस्ति सर्वगच्छेषु साम्प्रतम् ।
ज्ञेयं तथापि तत्त्वैक्यं सर्वसिद्धिनिबन्धनात् ॥ २

विधत्ते यस्य सान्निध्यं देवी चक्रेश्वरी सदा ।
श्रीमदञ्चलगच्छाख्यो विधिपक्षो जयत्यसौ ॥ ३

यः सूरिमन्त्रः पूज्यश्रीआर्यरक्षितसूरिभिः ।
पूर्वं प्रकाशितस्तस्य सम्प्रदायो निशम्यताम् ॥ ४

जिण ओहिजिणाण णमो परसव्वाणंतणंतणंताओ ।
ओहिजिणाणं केवलि-भवत्थ-अभवत्थकेवलिणं ॥ ५

चउदस-दसपुव्वीणं नमोत्थु इक्कारसंगधारीणं ।
कुट्ठाओ बुद्धीणं बीयाओ बुद्धिसाहूणं ॥ ६

उग्गतवचरण करणाओ धारिणं सव्वहिं नमो पुव्वं ।
गोयमसामिस्स सुहम्मसामिणो तह नमो काउं ॥ ७

पण सत्त नवट्ठनवेगारसछन्नंददसनव य सत्त ।
दस-सत्त-सत्त-पनरस-मणु परिमियवन्नलद्धिपए ॥ ८

सर्वत्र स्तुत्यादौ प्रणवाः स्वपरेषु शान्ति-तुष्टिकृते ।
माया वश्य-क्षोभे श्रीं ज्ञान-श्रीमति-स्त्र्याप्त्यै ॥ ९

युगपत् त्रयं तदादौ न स्यादिति बीजसङ्गतं ध्यानम् ।
निर्बीजं मोक्षकृते षोडश विद्यापदारम्भे ॥ १०

एएसिं सव्वेसिं सिज्झउ पज्जंत वन्निगुणतीसं ।
एवं पढमे पीठे बावत्तरिजुयसयं वन्ना ॥ ११

'पणवो नमो भगवओ-विज्जा' पज्जंत्त वन्नतेतीसं ।
एसा सुविणनिमित्तं पकित्तिया बाहुबलिविज्जा ॥ १२

'हिलि हिलि किलि किलि' एए अट्ठक्खर रिसहविज्जमज्झत्था।
चक्केसरीए दिन्ना तो ठविया दुइयपीढं(ठं?)मि ॥ १३

अह 'वग्गुवग्गु' पमुहा 'महु महुरे' जाव वन्न बावीसा ।
सोहग्गविज्ज एसा झायव्वा जोणिमुद्दाए ॥ १४

'हिलिहिलि' पमुहा 'आयरियकालि' पज्जंत वन्न अडतीसं ।
एवं बीइए पीढे तिनवइ सव्वक्खरा हुंति ॥ १५

'इरियाए' पमुहवन्ना 'कालि महाकालि' जाव पणतीसं ।
तइयं पीढं लच्छीअहिट्ठियं लच्छिफलहेउं ॥ १६

'इरि इरिकालि'प्पमुहा 'आयरियायरियकालि'पज्जंता ।
छयालीसं वन्ना चउत्थए मंतपीढंमि ॥ १७

पंचमपीढे 'इरिमेरु'पमुह 'आयरियमेरु'पज्जंता ।
तीसं वन्ना 'स्वाहा'जुत्ता बत्तीस नायव्वा ॥ १८

सयलंमि सूरिमंते अट्ठुत्तरिजुत्ततिन्निसयवन्ना ।
इक्कारस य सिलोगा छव्वीसं अक्खरा य तहा ॥ १९

सूरीणं मंतपडे चउसयसत्तुत्तरक्खरा हुंति ।
उचियट्ठाणे पणवाण वेयस्वाहाण गहणाओ ॥ २०

अक्खीणमहाणसिलद्धि-सव्वलद्धीण दो पया एए ।
गच्छाहिवमंतपडे सुहम्मपयओ पुरो हुंति ॥ २१

तेरस अट्ठ य वन्ना एवं इगवीसवन्न इह अहिया ।
तेरस सिलोग बारस य अक्खरा सव्वसंखाए ॥ २२

जावइया तावइया बारस अट्ठारसाइलद्धिपया ।
इय वयणाओ सोलस अट्ठारस लद्धिपय इत्थ ॥ २३

एयस्स साहणे किर जो उ विही पइपयं फलं जं च ।
तं नेयं पुव्वरिसिप्पणीयसूरिमंतकप्पाओ ॥ २४

पू.आ.श्री मेरुतुङ्गसूरिसमुद्धृतः

## १२. ॥ सूरिमन्त्रसाधनविधि-फलादिव्यावर्णनपरः कल्पः ॥

शुचिर्भूत्वाऽल्पनीरेण त्रिसन्ध्यं यः स्मरेदमुम् ।
श्वेतध्यानसुगन्धाढ्यस्तस्य सिध्यति वाञ्छितम् ॥ १

रोहिणीप्रमुखा देव्यो मन्त्रराजप्रभावतः ।
प्रतिष्ठां तस्य कुर्वन्ति भूरिकल्याणसम्पदः ॥ २

सौभाग्यमापदां नाशो राजपूज्यः श्रियां पतिः ।
दीर्घायुरिह लोके स्यात् सुगतिश्च भवान्तरे ॥ ३

चतुर्दश्यामथाष्टम्यामुपवासी जपेद् गुरुः ।
अष्टोत्तरसहस्त्रं यः स भवेद् महिमास्पदम् ॥ ४

श्रीपतिर्नृपसन्मानपात्रं च यशसां पदम् ।
अजेयः शत्रुभिः स स्यान्निर्विघ्नो दोषवर्जितः ॥ ५

अष्टोत्तरसहस्त्रं वा जपित्वाष्टोत्तरं शतम् ।
गुग्गुलाज्यगुटीः शान्तिहेतवे जुहुयात् कृती ॥ ६

सौभाग्ये महिमार्थे च सर्वविश्वविमोहने ।
षट्कर्मस्वपि सन्ध्यासु जपितो वाञ्छितप्रदः ॥ ७

सकलं मूलमन्त्रं वा प्रत्यब्दं दीपपर्वणि ।
उपवासी जपेन्मन्त्रसहस्त्रमष्टभिर्युतम् ॥ ८

क्षीरान्नभोजनं प्रातः कुरुते यस्तु पारणम् ।
तद्वर्षं तस्य सन्मानलाभकामितदायकम् ॥ ९

प्रतिवर्षं सर्वमन्त्रं सहस्त्रमष्टभिर्युतम् ।
शतपत्रैः सिताब्जैर्वा जपेद्वाञ्छितहेतवे ॥ १०

तद्दिनेऽक्षस्नात्रदुग्धं निपीतं भोगपूर्वकम् ।
सनालिकेरनैवेद्यताम्बूलं पुत्रदं स्त्रियाः ॥ ११

मेरुमन्त्रं समालिख्य सुरभिद्रव्यसञ्चयैः ।
शुभेऽह्नि विधिना रक्षा कृता स्याद् विघ्नहारिणी ॥ १२

अपत्यजननी जीवद्वत्सदा शल्यभञ्जनी ।
भ्रण्ट(ष्ट?)राज्यपदोद्धर्त्री रोगमारिनिवारिणी ॥ १३

रणे जयकरी शस्त्रसार्थघातनिवारिणी ।
रुष्टप्रसादिनी बाढं स्तम्भिनी वह्निनागयोः ॥ १४

शाकिनी-डाकिनी-भूत-प्रेत-मृद्गलदोषभित् ।
वारि-वैर-विष-व्याल-भूप-तस्करभीतिहृत् ॥ १५

स्वचक्रपरचक्राब्धिकुग्रहातङ्कवारकः ।
वधबन्धनिरोधादिसर्वसाध्वसभेदकः ॥ १६

तुष्टिपुष्टिकरः प्रौढप्रसादमहिमास्पदम् ।
मेरुमन्त्रोऽस्य माहात्म्यं वक्तुं शक्रोऽपि न क्षमः ॥ १७

एकं त्रीन् पञ्च वा सप्त युक्त्या लक्षाणि यो जपेत् ।
सर्वमन्त्रममुं तस्य महासिद्धिः प्रजायते ॥ १८

षट्कर्माद्य(द्यै?)हिकार्थानां कर्तृत्वे ननु का स्तुतिः ? ।
सूरिमन्त्रः स्मृतो युक्त्या स्वर्गमोक्षप्रदोऽप्यसौ ॥ १९

भानुप्रमितसहस्रैः कुसुमैर्जपितः पुनः ।
सर्वसिद्धिविधौ सूरेर्मन्त्रराजो विजृम्भते ॥ २०

तत्त्वमिदम् -
मेरुमन्त्रकृत रक्षा विधिना शीलशालिना ।
अलुब्धेन श्रीगुरुणा सर्वकर्मसु जृम्मते ॥ २१

अनिष्टारिष्टनाशाय दुष्टकुष्टादिभित्तये ।
विश्वेप्सितकरो मेरुः षण्मासावधिजापतः ॥ २२

आदेशं सूरये दत्ते शुभं वाप्यऽशुभं पुनः ।
चिन्तारत्नप्रभः सप्तमेरुमन्त्रो जिनैः स्मृतः ॥ २३

अथ शेषपीठफलानि-
अष्टम्यां वा चतुर्दश्यां महाविद्योपवासतः ।
स्मृता सहस्रमष्टाग्रमादेशायेप्सिताप्तये ॥ २४

एवं ८।१४ दिने ।

अष्टोत्तरसहस्रं यो जातीपुष्पैः सुगन्धिभिः ।
जपेत् सौभाग्यविद्यां स्यात् सौभाग्यं तस्य सर्वदा ॥ २५

षोडशसहस्रजापादेवं युक्त्योपविद्यया ।
सिद्धिः सारस्वतस्य स्यादादेशश्च प्रजायते ॥ २६

ॐ इरिइरिकालीति सच्चक्रमुद्रयाऽनिशं ।
क्षयाय कृष्णध्यानेन, मासं यावत् प्रयुज्यते ॥ २७

आद्ये सरस्वती देवी त्रिभुवनस्वामिनी ततः ।
तृतीये कमला तुर्ये यक्षराजः स्फुरत्प्रभः ॥ २८

चत्वारो नाकिनाथास्ते धरणोऽप्यहिनायकः ।
रोहिणीप्रमुखा देव्योऽधिष्ठात्र्यः पञ्चमे पदे ॥ २९

यक्षकर्दमसंयुक्ते पाणौ कर्पूरवासिते ।
लिखिते श्रीमेरुमन्त्रे दोषी सज्जो भवेद् ध्रुवम् ॥ ३०

वारयति प्रत्यनीकं लिखितोऽक्षरपङ्क्तिभिः ।
पाणिपद्मे रूप्यकांस्यपात्रे सौख्याय जायते ॥ ३१

ब्रह्मधारी स्वल्पवारिकृतस्नानः स्थिरः शुचिः ।
पवित्रवासा गन्धाढ्यो मन्त्रराजं स्मरेद् गुरुः ॥ ३२

श्रीमतो मन्त्रराजस्य सप्तमेरुमयस्य यः ।
लक्षत्रयं जपेत् सूरिः स भवेद् गौतमः स्वयम् ॥ ३३

दिक्कालासनमुद्राद्यैः स्मृतोऽसौ सर्वकर्मकृत् ।
ललाटपाणिवाक्पिण्डसिद्धीनां कारणं परम् ॥ ३४

अष्टोत्तरसहस्रं तु जपितं दीपपर्वणि ।
पुष्पाणामक्षतानां च चूर्णं वश्याय जायते ॥ ३५

प्रणवं आं क्रमेण क्रों मायाबीजं श्रियं स्मरेत् ।
ध्यान(ना?)रम्भे सदा सूरी रक्षा(क्ष)याऽभीप्सिताप्तये ॥ ३६

त्रिसन्ध्यं यः स्मरेन्नित्यं शतमष्टोत्तरं सुधीः ।
लब्धिपात्रं स जायेत प्रभावकशिरोमणिः ॥ ३७

आद्यो मेरुः सौख्यकर्ता द्वितीयो राजवश्यकृत् ।
तृतीयो दुष्टविच्छेत्ता तुर्यो भ्रष्टस्य राज्यदः ॥ ३८

पञ्चमः षट्कर्मकारी षष्ठः सर्वार्थसिद्धिदः ।
सप्तमो व्योमगमनमुख्यलब्धिविधायकः ॥ ३९

सौभाग्यं परमेष्ठी च सुरभी प्रवचनं तथा ।
कृताञ्जलिश्च पञ्चैता मुद्राः कार्याश्च सूरिणा ॥ ४०

चक्रं कुलिशमुद्रा च शङ्ख–गरुडनामनी ।
गिरिमुद्रा तथा ज्ञेया ध्येयादिषु विशेषतः ॥ ४१

उपविद्या तथा ध्येया वश्ये कमलमुद्रया ।
सौभाग्ये मोहने वश्ये विद्या सौभाग्यलक्षणा ॥ ४२

शत्रुक्षयाय मासं त्रिसन्ध्यं चक्रमुद्रया ।
इरिकालिः सदा ध्येया ज्ञाने बाहुबलिस्तथा ॥ ४३

परमेष्ठिप्रवचनमुद्रे द्वे गदिते पुनः ।
शुक्लध्यानेन कार्याय धूम्रतोच्चाटनाय च ॥ ४४

'आयरिय मेरु मम सर्वसिद्धिं कुरु कुरु स्वाहा' ।
गद्यमेतत्, कार्यकाले नमःस्वाहे यथाविधि ॥ ४५

लक्ष्मीकीर्तिधृतिविद्या विद्यापीठाज्जयस्तथा ।
विद्या बाहुबलिः श्रेष्ठा ज्ञानादेशप्रदायिनी ॥ ४६

सौभाग्यमुद्रया पुष्पलक्षेणैकेन जप्यते ।
सौभाग्यमन्त्रराजोऽसौ वश्यमोहनकारकः ॥ ४७

उपविद्याजपात् सिद्धा वादिस्फूर्त्तिविघातिनी ।
परविद्यानिराकर्त्री किंशुकध्यानसंस्मृता ॥ ४८

चतुर्थे कृतजापश्च कृष्णध्यानसमाश्रितः ।
विपक्षोच्छेदनं तूर्णं करोति नियतं गुरुः ॥ ४९

मृत्युस्तम्भनबन्धाद्युच्चाटनं विदधात्ययम् ।
सच्चक्रमुद्रया मासेनैकेन विहितादरः ॥ ५०

मासं वा मासषट्कं वा वर्षं वा जापतत्परः ।
यं यमर्थं प्रार्थयते तं तं प्राप्नोति लीलया ॥ ५१

स्तम्भयत्यरिसैन्यानि मेघाकृष्टिं करोति च ।
कृतोपवासः सज्जापस्त्रिसप्तनवभिर्दिनैः ॥ ५२

अलोभो जितपञ्चाक्षः सच्छीलोऽनघसत्यवाक् ।
त्रिधा शुद्धोऽल्पपयसा मन्त्रराजं स्मरेद् गुरुः ॥ ५३

मौनभोजी सर्वमन्त्रं कायोत्सर्गेण यः स्मरेत् ।
तं सेवन्ते सुरा वक्तुं प्रभावं चास्य कः क्षमः ॥ ५४

नाल्पकार्ये प्रयोक्तव्यो मन्त्रराजः कदाचन ।
हीनेऽस्मिन् विधिना किन्तु स्मर्तुः प्राणेषु संशयः ॥ ५५

संघकार्ये महाविघ्ने चैत्योच्छेदादिकर्मसु ।
सूरिणा स्थिरचित्तेन मन्त्रराजः प्रयुज्यते ॥ ५६

त्रिसन्ध्यं यो जपेन्नित्यं कायोत्सर्गेण शुद्धधीः ।
आस्तिक्येन लभेत्सिद्धिं मुक्तिं सोऽस्माच्च सद्यशाः ॥ ५७

श्री मानदेवसूरीन्द्रैर्व्याख्यातः पुण्यशालिभिः ।
सूरिप्रभावसुभगः पूर्वं श्रीगौतमाभिधः ॥ ५८

इति श्री अञ्चलगच्छेश्वरश्रीमेरुतुङ्गसूरिसमुद्धृतः श्रीकल्पः ।

पू.आ.श्री कमलाकरसूरिविरचितः

## १३. ॥ श्रीसूरिमन्त्रसाधनक्रमः ॥

श्री[मद्]वीरजिनं नत्वा स्मृत्वा श्रीगौतमप्रभुम् ।
ब्रवीमि सूरिमन्त्रस्य साधनक्रममद्भुतम् ॥ १

कर्पूरप्रभृतिद्रव्यैः, पूजयन् गौतमप्रभुम् ।
कायोत्सर्गरतो नित्यं चैत्यवन्दनतत्परः ॥ २

परोपकारप्रवरः पञ्चमौन(नी)जितेन्द्रियः ।
अकुर्वन् वनितालापं विकथास्वापवर्जितः ॥ ३

शुचिः स्वल्पपयःक्लृप्तनित्यस्नानः सिताम्बरः ।
विजने व वने रम्ये स्थितः स्थाने तपश्चरेत् ॥ ४

सारस्वतमये पीठे विद्यायाः प्रथमे पुरः ।
उपोषितं भवेदेकं विकृतित्यागपञ्चकम् ॥ ५

आचाम्लं (म्लकं) निर्विकृतिपञ्चकाचाम्लके तथा ।
स्युर्निर्विकृतयः पञ्च पुनराचाम्लकं तथा ॥ ६

निर्विकृत्युपवासौ च दिनानामेकविंशतिः ।
त्रैलोक्यस्वामिनी देवी पूज्या पीठे द्वितीयके ॥ ७

महाविद्याभिधाने तु भवेदेकमुपोषितम् ।
स्यान्निर्विकृतिराचाम्लत्रिकं निर्विकृतिश्चतुः ॥ ८

आचाम्लं निर्विकृत्योश्च द्वयं तस्मादुपोषितम् ।
त्रयोदश दिनान्येवं ततः पीठे तृतीयके ॥ ९

उपविद्याद्वये नित्यं श्रीदेवीसमुपासिते ।
अभक्तमेकमत्रोक्तं विकृतित्यक्तमष्टकम् ॥ १०

पञ्चाम्लानि च सप्त स्युर्भक्तानि विकृतिं विना ।
आचाम्लं विकृतित्यागयुग्मं पुनरुपोषितम् ॥ ११

पञ्चविंशतिरित्यह्नां मन्त्रपीठे चतुर्थके ।
श्रीगणिपिटिकाभिख्ययक्षराजेन पूजिते ॥ १२

उपोषितं ततो भक्तपञ्चकं विकृतिच्युतम् ।
आचाम्लमथवा भक्तं दिनाष्टकमभूदिति ॥ १३

व्यक्तमत्रार्हतज्योतिभास्व(र्भवे) दद्भुतवैभवे ।
मन्त्रराजे चतुःषष्टिशक्रसंसेवितक्रमे ॥ १४

आचाम्लानि तपः कुर्यात् षोडशैवं समाहितः ।
स्वगुरूक्तं हृदि ध्यायन् सूरिमन्त्रमहर्निशम् ॥ १५

इति विधिना यस्तनुते कमलाकरसूरिसंस्तुतेन जपम् ।
स भवति गौतमविभुवद् बहुलब्धिपदस्य पात्रमिह ॥ १६

श्रीदेवाचार्यगच्छीयसूरिशिष्यरचितम्

## १४. ॥ श्री सूरिमन्त्रराजस्तोत्रम् ॥

गौतमस्वामिमन्त्रोऽयं सम्यगाराधितो नरैः
चिन्तामणिरिवाजस्रं चिन्तितार्थप्रसाधकः ॥ १

दारिद्र्यकन्दनाशाय विघ्नव्रातविनाशिने ।
नमोऽस्तु मन्त्रराजाय विश्वलक्ष्मीप्रदायिने ॥ २

या च लोके महासिद्धिर्या च लोकोत्तरे मता ।
सम्पद्यते स्फुटं सा सा मन्त्रराज(स्?)तव स्मृतौ ॥ ३

अतीतानागता ये च ये जिनेन्द्राश्च सम्प्रति ।
ते सर्वे वन्दिता नित्यं मन्त्रराज (स्?)तव स्मृतौ ॥ ४

गौतमेन कृतः पूर्वं तेन गौतम उच्यते ।
सुधर्मस्वामिनस्तीर्थं सुधर्मा तेन सम्प्रति ॥ ५

यावत् त्वं वर्तसे नाथ ! तावत् तीर्थकृदागमः ।
तावज्ज्ञानं सभेदं च तावत् तीर्थप्रवर्तना ॥ ६

सर्वदेवमयोऽसि त्वं पुरुषोत्तममयोऽसि च ।
तव त्रैलोक्यनाथत्वं मन्त्रराज ! ततः प्रभो ॥ ७

ध्रुवं तीर्थकरोऽसि त्वं ध्रुवं गणधरोऽसि च ।
भवेऽत्र वर्तमानोऽपि स्वर्गो मोक्षोऽसि पुण्यदः ॥ ८

पू.आ. श्री जयसिंहसूरिविरचिता

# १५. ॥ इहपरलोकफलार्थिनां सम्यग्दृशां मन्त्रतन्त्रादिविधानेन परमेश्वरध्यान-विधिः ॥

प्रणम्य तत्त्वकर्तारं महावीरं सनातनम् ।
श्रुतदेवीं गुरुं चैव परं तत्त्वं ब्रवीम्यहम् ॥ १

शान्ताय गुरुभक्ताय विनीताय मनस्विने ।
श्रद्धावते प्रदातव्यं जिन-भक्ताय दिने दिने ॥ २

अकारादि-हकारान्ता प्रसिद्धा सिद्धमातृका ।
युगादौ या स्वयं प्रोक्ता ऋषभेन महात्मना ॥ ३

एकैकमक्षरं तस्यां तत्त्वरूपं समाश्रितम् ।
तत्रापि त्रीणि तत्त्वानि येषु तिष्ठति सर्ववित् ॥ ४

अकारः प्रथमं तत्त्वं सर्वभूताभयप्रदम् ।
कण्ठदेशं समाश्रित्य वर्तते सर्वदेहिनाम् ॥ ५

सर्वात्मानं सर्वगतं सर्वव्यापि सनातनम् ।
सर्वसत्त्वाश्रितं दिव्यं चिन्तितं पापनाशनम् ॥ ६

सर्वेषामपि वर्णानां स्वराणां च धुरि स्थितम् ।
व्यञ्जनेषु च सर्वेषु ककारादिषु संस्थितम् ॥ ७

पृथिव्यादिषु भूतेषु देवेषु समयेषु च ।
लोकेषु च सर्वेषु सागरेषु सुरेषु च ॥ ८

मन्त्रतन्त्रादियोगेषु सर्वविद्याधरेषु च ।
विद्यासु च सर्वासु पर्वतेषु वनेषु च ॥ ९

शब्दादिसर्वशास्त्रेषु व्यन्तरेषु नरेषु च ।
पन्नगेषु च सर्वेषु देवदेवेषु नित्यशः ॥ १०

व्योमवद् व्यापिरूपेण सर्वेष्वेतेषु संस्थितम् ।
नातः परतरं ब्रह्म विद्यते भुवि किञ्चन ॥ ११

इदमाद्यं भवेद् यस्य कलातीतं कलाश्रितम् ।
नाम्ना परमदेवस्य ध्येयोऽसौ मोक्षकाङ्क्षिभिः ॥ १२

दीप्तपावकसंकाशं सर्वेषां शिरसि स्थितम् ।
विधिना मन्त्रिणा ध्यातं त्रिवर्गफलदं स्मृतम् ॥ १३

यस्य देवाभिधानस्य मध्ये ह्येतद् व्यवस्थितम् ।
पुण्यं पवित्रं म(मा)ङ्गल्यं पूज्योऽसौ तत्त्वदर्शिभिः ॥ १४

सर्वेषामपि भूतानां नित्यं यो हृदि संस्थितः ।
पर्यन्ते सर्ववर्णानां सकलो निष्कलस्तथा ॥ १५

हकारो हि महाप्राणः लोकशास्त्रेषु पूजितः ।
विधिना मन्त्रिणा ध्यातः सर्वकार्यप्रसाधकः ॥ १६

यस्य देवाभिधानस्य पर्यन्ते एव वर्तते ।
मुमुक्षुभिः सदा ध्येयः स देवो मुनिपुङ्गवैः ॥ १७

सर्वेषामपि सत्त्वानां नासाग्रे परिसंस्थितम् ।
बिन्दुकं सर्ववर्णानां शिरसि सुव्यवस्थितम् ॥ १८

हकारोपरि यो बिन्दुर्वर्तुलो जलबिन्दुवत् ।
योगिभिश्चिन्तितस्तस्थौ मोक्षदः सर्वदेहिनाम् ॥ १९

त्रीण्यक्षराणि बिन्दुश्च यस्य देवस्य नाम वै ।
स सर्वज्ञः समाख्यातः अर्हँत इति पण्डितैः ॥ २०

एतदेव समाश्रित्य कला ह्यर्द्धचतुर्थिका ।
नाद-बिन्दु-लयाश्चेति कीर्तिताः परवादिभिः ॥ २१

मूर्तो ह्येष अमूर्तश्च कलातीतः कलान्वितः ।
सूक्ष्मश्च बादरश्चेति व्यक्तोऽव्यक्तश्च पठ्यते ॥ २२

निर्गुणः सगुणश्चैव सर्वगो देशसंस्थितः ।
अक्षयः क्षययुक्तश्च अनित्यः शाश्वतस्तथा ॥ २३

इह-परलोकफलार्थिनां सम्यग्दृशां मन्त्रतन्त्रादिविधानेन परमेश्वरध्यानविधिः समाप्ता

पू.आ.श्रीजिनप्रभसूरिविरचितः

## १६. ॥ मायाबीज 'ह्रीँकार' कल्पः ॥

(अनुष्टुप्)

मायाबीजबृहत्कल्पात्, श्रीजिनप्रभसूरिभिः ।
लोकानामुपकाराय, पूर्वविद्या प्रचक्ष्यते ॥ १

सुप्रकाशे ताम्रमये, पट्टे मायाक्षरं गुरु ।
कारितं परमात्मत्वममलं लभते स्फुटम् ॥ २

ध्यानाश्रयो यथाम्नायं, शुभाशुभफलोदयः ।
तथाऽयं वर्णभेदेन, कार्यकाले प्रजायते ॥ ३

पूर्णायां सत्तिथौ शुक्लपक्षे चन्द्रबले तथा ।
कारयेत् सर्वनैवेद्यं, पञ्चामृतसमन्वितम् ॥ ४

पक्वान्नान् विविधान् चान्यानानयेत् सुमनांसि च ।
सर्वैः कणैः फलैः सर्वैः, सर्वैर्वस्त्रैः क्रयाणकैः ॥ ५

सुवर्ण-रत्न-रूप्यैश्च, कर्पूरादिसुगन्धिभिः ।
प्रतिष्ठादिवसे पूज्यो, मन्त्रराजः शुभाशयैः ॥ ६

आम्नायदायकं नत्वा, दानैः सत्कृत्य तं गुरुम् ।
प्रतिष्ठाप्यः परो मन्त्रेणानेनैव विपश्चिता ॥ ७

सर्वमन्त्रमयत्वाच्च, सर्वदेवमयत्वतः ।
नान्यमन्त्रस्य संन्यासमयमर्हति तीर्थराट् ॥ ८

कृतस्नानेन सद्धर्म-चारिणा चैकभोजिना ।
साधकेन सदा भाव्यं, विजने भूमिशायिना ॥ ९

षट्कर्मणां विधानार्थं, जागर्ति यस्य मानसम् ।
प्रत्येकं पूर्वसेवायां लक्षस्तेन विधीयते ॥ १०

सितश्रीखण्डलुलितः सितवस्त्रः सिताशनः ।
सितसद्ध्यानजापस्त्रक्, सितजापाङ्गसंयुतः ॥ ११

सितपक्षे सुधाश्वेत-गृहे फलमयं भवेत् ।
विपद्-रोगहर्तिं शान्तिं, लक्ष्मीं सौभाग्यमेव च ॥ १२

बन्धमोक्षं च कान्तिं च, क्रमात् काव्यं नवं तथा ।
पुरक्षोभं सभाक्षोभमाज्ञैश्वर्यमभङ्गुरम् ॥ १३

किं बहूक्तैर्निरालम्बं सितध्यानं करोत्यदः ।
सर्वपापक्षयं पुंसां नात्र कार्या विचारणा ॥ १४

मोहाकृष्टिंव(द्र)शाक्षोभमित्थं रक्तः करोत्ययम् ।
पीतः स्तम्भं रिपोर्वक्त्रबन्धं सम्यक् करोत्ययम् ॥ १५

नीलो विद्वेषणं चैवोच्चाट्टनं तु प्रयोगतः ।
कृष्णवर्णो गुरोर्वाक्यादरेर्मृत्युविधायकः ॥ १६

भ्रुवोर्मध्ये तु साध्यस्य चिन्तनीयो गुरोः क्रमात् ।
गृहीतस्य च चन्द्रस्याकृष्ट्या प्राणप्रयोगतः ॥ १७

सालम्बाच्च निरालम्बं निरालम्बात् पराश्रयम् ।
ध्यानं ध्यायन् विलोमाच्च साधकः सिद्धिमान् भवेत् ॥ १८

क्षीरपूर्णां महीं पश्येत् सितकल्लोलमालिनीम् ।
अवृक्षपर्वतामेकामर्णवात्माद्वितीयकाम् ॥ १९

बाध-संबाधरहितां, शान्तात्मानन्ददायिनीम् ।
चिन्तयेदेकमेवात्रामलं कुसुममुत्तमम् ॥ २०

पत्राष्टकैस्तु ह्रीँकारं स्फाटिकं वर्णकोपरि (कर्णिकोपरि) ।
स्मरेदात्मानमत्रैवोपविष्टं धवलत्विषम् ॥ २१

चतुर्मुखं चतुर्भेदगतिविच्छेदकारकम् ।
सर्वकर्मविनिर्मुक्तं सर्वसत्त्वाभयावहम् ॥ २२

निरञ्जनं निराबाधं सर्वव्यापारवर्जितम् ।
पद्मासनसमासीनं श्वेतवस्त्रविराजितम् ॥ २३

'ह्रीँ'कारेण शिरःस्थेन स्फाटिकेनोपशोभितम् ।
क्षरद्भिरमृतैर्माया(?) मायाबीजाक्षराङ्कैः (जैः) ॥ २४

इति ध्यानमयो ध्याता सम्यक्संसारभेदकः ।
भवैस्त्रिभिश्चतुर्भिर्वा मोक्षमार्गं च गच्छति ॥ २५

चतुर्विंशतितीर्थेशैर्जैनशक्त्या विभूषितः ।
परमेष्ठिमयश्चैष सिद्धचक्रमयो ह्ययम् ॥ २६

त्रयीमयो गुणमयः सर्वतीर्थमयो ह्ययम् ।
पञ्चभूतात्मको ह्येष लोकपालैरधिष्ठितः ॥ २७

चन्द्रसूर्यादिग्रहयुग् दशदिक्पालपालितः ।
गृहेषु पूज्यते यस्य तस्य स्युः सर्वसिद्धयः ॥ २८

इयं कला सिद्धिकला बिन्दुरूपमिदं मतम् ।
स्वरूपं सर्वसिद्धानां निराबाधपदात्मकम् ॥ २९

करजापं लक्षमितं होमं च तद्दशांशतः ।
कुर्याद् यः साधको मुख्यः स सर्वं वाञ्छितं लभेत् ॥ ३०

पू.आ. श्रीविद्याभूषणसूरिविरचितः

## १७. ॥ श्रीऋषिमण्डलमन्त्रकल्पः ॥

आद्यन्तवर्णप्रविवृद्धशोभं सर्वोत्तमव्यापकमव्ययं च ।
वरं बृहद्भानुशिखावदातं सनादबिन्दुं शुभरेखयाढ्यम् ॥ १

ऊर्जस्वलं हव्यभुगर्चिषां वाक्रान्तं नितान्तं सकलं सुकान्तम् ।
हृदम्बुजे तत्पदमाशु नौमि मनोमलोन्मूलनबद्धकक्षम् ॥ २

अर्हद्भ्य ॐ ह्राँ विधिवन्नमोस्तु सिद्धेभ्य ॐ ह्रीँ नम एव नित्यम्।
सूरिभ्य ॐ हुँ च नमोऽमलेभ्यः श्रीपाठकेभ्यो नम ॐ तथा हूँ ॥३

साधुभ्य ॐ ह्रें च नमोऽखिलेभ्य ॐ ह्रैं नमः सर्वसुतत्त्वदृग्भ्यः
।सम्यक्प्रमाणेभ्यः तथैव ॐ ह्रौं नमोपि चोंह्रः वरसंयमेभ्यः॥४

इदं जिनाद्यष्टकमष्टकोष्ठप्रतिष्ठितं निष्ठितकर्मकाष्ठम् ।
श्रिये पृथग्बीजविराजमानमानन्ददं स्ताज्जनतासमानम् ॥ ५

मूर्धानमाद्यं पदमाशु जानु परं पदं मस्तकमस्तकर्म ।
तृतीयकं त्रायतु चक्षुषी द्वे तुर्यं च घोणां सवृणामुपातु ॥ ६

तत्पञ्चमं पातु मुखाम्बुजातं सुधास्रवां षष्ठमरिष्टतापि ।
पातात् पदं सप्तममेव नाभीं पदान्तमन्त्यं च पदं पुनातु ॥ ७

लोकोत्तरे यः परमेष्ठिरूपस्त्वग्नीमयश्चाभिमतो मतेभ्यः ।
वर्णेषु वर्ण्यस्त्वपरः परार्ध्यं पूर्वं विधेयः प्रणवस्ततश्च ॥ ८

महोमयं यद्वरयोगरूपं ब्रह्मावगाढं त्वनिगाढगूढम् ।
प्रौढं विमूढाग्रिमतोधिरूढं कुर्यात्तदेवं विधमिद्धबुद्धिः ॥ ९

नेत्रोदधीश्वश्वकुलाङ्गनाङ्गदिगर्यमाङ्कैर्विहितोरुसेवम् ।
स्वरैस्ततोभ्यर्हितपूज्यपञ्चाद्यैकैकवर्णा वरसान्तकान्तम् ॥ १०

सद्दर्शनज्ञानसुसंयमेभ्यो नमोस्तु मध्ये किल ह्रीँ च सान्तम् ।
ध्यायेत् सुमन्त्रं नवबीजवर्णैः समर्चितं तद्द्विगुणैश्च शुद्धैः ॥११

ॐ ह्राँ ह्रीँ ह्रुँ ह्रूँ ह्रेँ ह्रैँ ह्रौँ ह्रः अ सि आ उ सा सम्यग्दर्शनज्ञानचारित्रेभ्यो ह्रीँ नमः ऋषिमण्डलयन्त्रस्य मूलमन्त्रं आराधकस्य शुभः

नवबीजाक्षरः अष्टादश शुद्धाक्षर एवमेकत्र ॥
जम्बूनगाङ्कः प्रथमोत्र जम्बूद्वीपस्तु दुग्धोदधिवेष्टिताङ्गः ।
क्षीणाष्टकर्मप्रमुखाष्टकोष्ठाधिष्ठायकाधिष्ठितमूर्तिरिष्टः ॥ १२

मध्यस्थितो रम्यसुराचलोऽस्य स कूटलक्षैः परिराजमानः ।
उच्चैरथोच्चैस्तर एव तारतारावलीमण्डितमध्यदेशः ॥ १३

तस्योपरिष्ठादथ सान्तबीजमध्यस्य रस्यं विभुमभ्रमं च ।
स्वायम्भुवं नौमि सुरम्यबिम्बं ललाटसंस्थं सुनिरञ्जनं च ॥१४

यदक्षरं सान्तमथामलं च सारं निरीक्षं जडताविहीनम् ।
घनं विमानं बहुलं च सारं तरं शुभं बुद्धमनुद्धतं च ॥ १५

परापरं चापि परं परापरं साकारमाकारविवर्जितं हितम् ।
स्फीतं प्रवीणं विरसं रसाविलं
पौराणिकं च त्रिगुणं गुणायनम् ॥ १६

अवर्णमध्यं च रवर्णमन्तः चिरार्चिषं चिन्मयमच्युतं हि ।
श्यामं समं चारुमधामधामैकद्वित्रिवेदेषु समानवर्णम् ॥ १७

सवर्ण्यमवर्णमथार्णवोपमं परं परातीतमनन्तमुज्ज्वलम् ।
कलङ्कमुक्तं सकलं किलाकलं
सुकोमलं नाम सुनिष्कलं कलम् ॥ १८

तुष्टं विशिष्टं चारिष्टकष्टा-पदं निराकाङ्क्षमधृक्षमाशु ।
अदत्तमालेपमलेपमुग्रं सिद्धं च शुद्धं खलु बुद्धमग्र्यम् ॥ १९

विष्णुं परब्रह्मणमीश्वरं च ज्योतिर्मयं त्वेवमर्तिं रविं च ।
गुरुं गरीयांसमथो निरीशं मान्यं महादेवमनूनकान्तिम् ॥ २०

महोमयं मोहकरं च लोकालोकप्रकाशप्रवणं प्रवीणम् ।
इत्यादिसद्भूतगुणैरुदारं विन्दारितारिं विदरं विशालम् ॥ २१

सान्तःसरेफो विमलोर्हदाक्षः सद्बिन्दुनालङ्कृतशीर्षदेशः ।
स्वरेण तुर्येण विवृद्धशोभो नादाञ्चितोऽनादिरनन्त एषः ॥ २२

सर्वत्र बीजे विमलेसिलग्ना नाभेयमुख्या जिनपा अदीनाः ।
स्वैः स्वैः सुवर्णैः सहिताश्च तत्र सुसङ्गताः सन्ततमेव चिन्त्याः॥२३

नादोर्जुनो राजिसमानरोचिररिष्टरत्नप्रतिमोऽथ बिन्दुः ।
कला कला सत्कुरुविन्दकान्तिरन्तश्च कल्याणसमानवर्णः ॥२४

हरिच्छविर्मूर्ध नलीनतूर्यस्वरो हि वर्णा इति सम्यगुक्ताः ।
वर्णानुसारेण जिनेन्द्रचन्द्रान् स्वस्वप्रदेशे विनमामि लीनान् ॥२५

शशिप्रभाभश्रीपुष्पदन्तौ नादाश्रितौ शुभ्ररुची विशालौ ।
श्रीनेमितीर्थाधिपसुव्रतौ च मध्येसि बिन्दोर्विहितस्थिती तु ॥२६

अब्जप्रभाधीश्वरवासुपूज्यौ लीनौ कलायां सुखदौ कलायाम् ।
तूर्यस्वरोपात्तपदौ च पार्श्वमल्लीकवल्लीमुदिरौ जिनेशौ ॥ २७

हरान्तरे चान्यजिनातियोज्या वद द्विसंख्या इति सर्वतोपि ।
अर्हद्रमाया रमणाश्च मायाबीजाक्षराकारमनर्घ्यमाप्ताः ॥ २८

रागद्वेषमहाविमोहरहिता जन्तुप्रताने हिताः
सर्वे पापविवर्जिता गतमदाः सर्वे हितश्रीप्रदाः ।
तीर्थे शाः सततं भवन्तु सकले संघेऽनघे मङ्गल-
श्रेणीदा गुणरत्नरोहगिरि-प्रापा विमायारयात् ॥ २९

यदेव चक्रं परमेष्ठिभाभृतां विभा च या चक्रवरस्य तस्य ।
तयावृताङ्गं विमलाशयं सदा मा मामुपद्रोतुमलं भुजङ्गमाः ॥३१

यदेव चक्रं परमेष्ठिभाभृतां विभा च या चक्रवरस्य तस्य ।
तयावृताङ्गं विमलाशयं सदा मा मामुपद्रोतुमलं च गोनसाः॥३२

यदेव चक्रं परमेष्ठिभाभृतां विभा च या चक्रवरस्य तस्य ।
तयावृताङ्गं विमलाशयं सदा मा मामुपद्रोतुमलं च शाकिनी ॥३३

यदेव चक्रं परमेष्ठिभाभृतां विभा च या चक्रवरस्य तस्य ।
तयावृताङ्गं विमलाशयं सदा मा मामुपद्रोतुमलं च डाकिनी॥३४

यदेव चक्रं परमेष्ठिभाभृतां विभा च या चक्रवरस्य तस्य ।
तयावृताङ्गं विमलाशयं सदा मा मामुपद्रोतुमलं च याकिनी॥३५

यदेव चक्रं परमेष्ठिभाभृतां विभा च या चक्रवरस्य तस्य ।
तयावृताङ्गं विमलाशयं सदा मा मामुपद्रोतुमलं च राकिनी ॥३६

यदेव चक्रं परमेष्ठिभाभृतां विभा च या चक्रवरस्य तस्य ।
तयावृताङ्गं विमलाशयं सदा मा मामुपद्रोतुमलं च लाकिनी॥३७

यदेव चक्रं परमेष्ठिभाभृतां विभा च या चक्रवरस्य तस्य ।
तयावृताङ्गं विमलाशयं सदा मा मामुपद्रोतुमलं च काकिनी॥३८

यदेव चक्रं परमेष्ठिभाभृतां विभा च या चक्रवरस्य तस्य ।
तयावृताङ्गं विमलाशयं सदा मा मामुपद्रोतुमलं च राक्षसाः॥३९

यदेव चक्रं परमेष्ठिभाभृतां विभा च या चक्रवरस्य तस्य ।
तयावृताङ्गं विमलाशयं सदा मा मामुपद्रोतुमलं च भेखसाः॥४०

यदेव चक्रं परमेष्ठिभाभृतां विभा च या चक्रवरस्य तस्य ।
तयावृताङ्गं विमलाशयं सदा मा मामुपद्रोतुमलं च व्यन्तराः॥४१

यदेव चक्रं परमेष्ठिभाभृतां विभा च या चक्रवरस्य तस्य ।
तयावृताङ्गं विमलाशयं सदा मा मामुपद्रोतुमलं च देवताः ॥४२

यदेव चक्रं परमेष्ठिभाभृतां विभा च या चक्रवरस्य तस्य ।
तयावृताङ्गं विमलाशयं सदा मा मामुपद्रोतुमलं मलिम्लुचाः॥४३

यदेव चक्रं परमेष्ठिभाभृतां विभा च या चक्रवरस्य तस्य ।
तयावृताङ्गं विमलाशयं सदा मा मामुपद्रोतुमलं हुताशनाः ॥४४

यदेव चक्रं परमेष्ठिभाभृतां विभा च या चक्रवरस्य तस्य ।
तयावृताङ्गं विमलाशयं सदा मा मामुपद्रोतुमलं विषाणिनः ॥४५

यदेव चक्रं परमेष्ठिभाभृतां विभा च या चक्रवरस्य तस्य ।
तयावृताङ्गं विमलाशयं सदा मा मामुपद्रोतुमलं च दंष्ट्रिणः॥४६

यदेव चक्रं परमेष्ठिभाभृतां विभा च या चक्रवरस्य तस्य ।
तयावृताङ्गं विमलाशयं सदा मा मामुपद्रोतुमलं च रेपलाः ॥४७

यदेव चक्रं परमेष्ठिभाभृतां विभा च या चक्रवरस्य तस्य ।
तयावृताङ्गं विमलाशयं सदा मा मामुपद्रोतुमलं विहङ्गमाः ॥४८

यदेव चक्रं परमेष्ठिभाभृतां विभा च या चक्रवरस्य तस्य ।
तयावृताङ्गं विमलाशयं सदा मा मामुपद्रोतुमलं च मुद्गलाः॥४९

यदेव चक्रं परमेष्ठिभाभृतां विभा च या चक्रवरस्य तस्य ।
तयावृताङ्गं विमलाशयं सदा मा मामुपद्रोतुमलं च जृम्भकाः॥५०

यदेव चक्रं परमेष्ठिभाभृतां विभा च या चक्रवरस्य तस्य ।
तयावृताङ्गं विमलाशयं सदा मा मामुपद्रोतुमलं च माघनाः॥५१

यदेव चक्रं परमेष्ठिभाभृतां विभा च या चक्रवरस्य तस्य ।
तयावृताङ्गं विमलाशयं सदा मा मामुपद्रोतुमलं च सिंहकाः॥५२

यदेव चक्रं परमेष्ठिभाभृतां विभा च या चक्रवरस्य तस्य ।
तयावृताङ्गं विमलाशयं सदा मा मामुपद्रोतुमलं च शूकराः ॥५३

यदेव चक्रं परमेष्ठिभाभृतां विभा च या चक्रवरस्य तस्य ।
तयावृताङ्गं विमलाशयं सदा मा मामुपद्रोतुमलं च चित्रकाः॥५४

यदेव चक्रं परमेष्ठिभाभृतां विभा च या चक्रवरस्य तस्य ।
तयावृताङ्गं विमलाशयं सदा मा मामुपद्रोतुमलं च भूधराः ॥५५

यदेव चक्रं परमेष्ठिभाभृतां विभा च या चक्रवरस्य तस्य ।
तयावृताङ्गं विमलाशयं सदा मा मामुपद्रोतुमलं च हस्तिनः॥५६
यदेव चक्रं परमेष्ठिभाभृतां विभा च या चक्रवरस्य तस्य ।
तयावृताङ्गं विमलाशयं सदा मा मामुपद्रोतुमलं च देश्यकाः॥५७
यदेव चक्रं परमेष्ठिभाभृतां विभा च या चक्रवरस्य तस्य ।
तयावृताङ्गं विमलाशयं सदा मा मामुपद्रोतुमलं च ग्रामिणः॥५८
यदेव चक्रं परमेष्ठिभाभृतां विभा च या चक्रवरस्य तस्य ।
तयावृताङ्गं विमलाशयं सदा मा मामुपद्रोतुमलं च सूचकाः॥५९
यदेव चक्रं परमेष्ठिभाभृतां विभा च या चक्रवरस्य तस्य ।
तयावृताङ्गं विमलाशयं सदा मा मामुपद्रोतुमलं महामयाः ॥६०
यदेव चक्रं परमेष्ठिभाभृतां विभा च या चक्रवरस्य तस्य ।
तयावृताङ्गं विमलाशयं सदा मा मामुपद्रोतुमलं च व्याधयः॥६१
मुद्रा च गौतमगच्छनेतुर्या लब्धयस्तस्य भुवि प्रसिद्धाः ।
ज्योतिश्च ताभ्यस्त्वधिकं ततोर्हं निरन्तरं मन्थरसेवधीशः ॥६२
पातालवासाश्रयिणः सुरेशा ये चापि भूपीठनिवासिनश्च ।
स्वस्थाश्च गोस्थाहृतसर्वदौःस्थ्याः
सर्वेपि मां पातु शुभा यतश्च ॥ ६३
मनोज्ञलब्धावधिलब्धयो ये सुमेधसोपि परमावधीद्धाः ।
सर्वेपि ते श्रीपतयश्च देवा रक्षन्तु मां सर्वत एव नित्यम् ॥६४
भावनेन्द्रव्यन्तरेन्द्रज्योतिष्केन्द्रकल्पेन्द्रेभ्यो नमः ।
श्रुतावधिदेशावधिपरमावधिसर्वावधि ऋद्धिप्राप्तसर्वौषधिऋद्धि
प्राप्तानन्तबलर्धिप्राप्ततप्तर्धिप्राप्तरसर्धिप्राप्तविक्रियर्धिप्राप्तक्षेत्रर्धि-
प्राप्ताक्षीणमहानसर्धिप्राप्तेभ्यो नमः ॥

ॐपूर्वतो ह्रीमथ श्रीस्ततो ह्री धृतिश्च लक्ष्मी सुभगा च गौरी ।
चण्डी प्रचण्डा च सरस्वती च
जया तथाम्बा विजया च क्लिन्ना ॥ ६५

तथाऽजिता सौख्यकरा च नित्या मदद्रवा चापि च कामदेहा ।
कामासुगा कामितदा च नन्दा नन्दा सुमालिन्यमला च माया॥६६

मायाविनी मान्यतमा च रौद्री कला च काली च कलिप्रिया च।
आराधके कल्पलतोपमाना देवीवराः कल्पलताभिधानाः ॥६७

एता महादेव्य उदाररूपा त्रिविष्टपे याः किल सन्ति साराः ।
मह्यं प्रयच्छन्तु रमां तथा च
कान्तिं धृतिं ताः सकलाः मतिं च ॥ ६८

वेतालभूतोरुगस्तंवका वृका व्यालाश्च दुष्टा अपि मुद्गलाः खलाः।
सर्वेपि शाम्यन्तु च ते जिनेश्वरप्रभावतः प्रौढपराक्रमा अपि ॥६९

अयं स्तवः श्रीऋषिमण्डलस्य दिव्यः सुदुष्प्राप्यतरोतिगोप्यः ।
प्ररूपितस्तीर्थकृता नितान्तं त्रिविष्टपप्राणकरोनवद्यः ॥ ७०

जलेऽनले राजकुले कराले व्याले बले चापि खलेखिलेथ ।
द्यूते विवादे पितृमन्दिरे च गिरौ हरौ त्राणकरः स्मृतोऽयं ॥७१

भ्रष्टो हि राज्याल्लभते स्वराज्यं पदाच्च्युतश्चापि स्वकं पदं च ।
प्राप्नोति लक्ष्मीरहितश्च लक्ष्मीं चेतोहरामप्रतिभोपि विद्याम् ॥७२

दारान् सुदारादरधीरुदारान् प्रजाः प्रजार्थी प्रथितः पृथिव्याम् ।
हिरण्यकामोपि हिरण्यराशिं लभेन्नरः संस्मृतिमात्रतोस्य ॥७३

इदं विलिख्यामलहैमने यः खाजूरिके चापि च कांस्यजाते ।
नित्यं सपर्यां तनुते निशान्ते क्रीडन्ति सर्वा अपि सिद्धयोऽस्य॥७४

इदं विलिख्यामलभूर्जपत्रे धृतं भुजे मूर्धनि वाथ कण्ठे ।
दरापहं सर्वसमीहितश्रीनिदानमानन्दपदप्रदं च ॥ ७५

भूतैः प्रभूतैरतिभूयते न ग्रहैरिहोग्रैर्न निगृह्यते च ।
नाकृष्यते मंक्षु च यक्षलक्षैर्न क्षोभ्यते राक्षसकोटिभिश्च ॥ ७६

संस्पृश्यते नापि पिशाचवृन्दैर्नोद्गिल्यते चाखिलमुद्गलैश्च ।
प्रेताधिनाथैः प्रविपीड्यते न कल्पैर्न चाकल्प्यत एव नूनम् ॥७७

स्वर्भूर्भुवः पीठसुमध्यवर्तिनो जिनेश्वरा निर्व्रजिनः सनातनाः ।
दृष्टैर्विशिष्टैरभिवन्दितैर्नुतैर्यः स्यादुदकः स तु तैः स्मृतैरपि ॥७८

प्रयत्नतो गोप्यतरः स्तवोऽस्त्ययं
यस्यापि कस्यापि न च प्रदीयते ।
मिथ्यात्विनं योऽथ ददाति सोप्यलं
पदे पदे भ्रूणवधेन लिप्यते ॥ ७९

आचाम्लमुख्यं सुतपो विधायार्हदावलीमर्हणया प्रपूज्य ।
तत्सिद्धयेऽष्टाग्रसहस्रसङ्ख्यो जपोऽनपायः परितन्यते च ॥८०

विष्टे विशिष्टेऽष्टयुतं सदेकशतं नितान्तं पठते प्रभाते ।
न बाधते व्याधिरथाधिरस्य शश्वच्च नूनं प्रभवन्ति पद्माः ॥८१

मासानविच्छिन्नदिनांश्च योऽर्थस्पष्टं सुविष्टे पठति प्रहृष्टः ।
इदं पवित्रं स्तवनं सुतेजोमयीं स्वयम्भूप्रतिमां स पश्येत् ॥८२

दृष्टे जगन्नायकसारबिम्बं सप्तमके जन्मनि निश्चयेन ।
मुदा महानन्दपदं सतां च ह्यमन्दमासादयति प्रसिद्धम् ॥ ८३

स्तोत्रं विगुह्यं परमं सदेतदनुत्तरं मान्यतमं मुनीनाम् ।
स्मृतेश्च जाप्यात् पठनादथास्य प्रयाति हत्याघममोघधाम्नः ॥८४

विद्याभूषणसूरीशनिर्मितं स्तोत्रमद्भुतं ।
ऋषिमण्डलयन्त्रस्य सर्वसम्पत्तिसाधनम् ॥ ८५

## १८. ॥ मन्त्रसाधनविधिः ॥

योगोपदेशदैवतसकलीकरणोपचारजपहोमान् ।
दिक्कालादीन् मण्डलमक्षरसंज्ञाश्च विज्ञेयाः ॥ १

दिक्कालमुद्रासनपल्लवानां भेदं परिज्ञाय जपेत् स मन्त्री ।
न चान्यथा सिध्यति तस्य मन्त्रः
कुर्वन् सदा तिष्ठतु जाप्यहोमम् ॥ २

साधकाख्यादिमन्त्रादिवर्णौ भतारयोरपि ।
तद्राश्योश्च तयोश्चानुकूल्यं योग इति स्मृतः ॥ ३

मन्त्रो गुरूपदिष्टः स्यात् सफलस्तदिह पुस्तके ।
प्रकटं लिखितोपि गुरोरेव ग्राह्यं न च स्वयम् ॥ ४

वृषवदनमहायक्षस्त्रिमुखो यक्षेश्वरश्च तुम्बुरुकुसुमौ ।
मातङ्गयक्षविजयावजितो ब्रह्मा तथेश्वरकुमाराख्यौ ॥ ५

चक्रेश्वरी रोहिणी च प्रज्ञप्तिर्वज्रशृङ्खला ।
तथा पुरुषदत्ता च मनोवेगा च कालिका ॥ ६

तीर्थेषु महायक्षाः क्रमाच्चतुर्विंशतिजिनानाम् ।
स्युश्चतुर्विंशतिर्यक्ष्याः सेवन्ते जिनशासनम् ॥ ७

आसां प्रसादात् सम्प्राप्तखेचरत्वादिवैभवाः ।
विद्याधरा विराजन्ते मर्त्या अपि सुरा इव ॥ ८

ध्यात्वैवं परया भक्त्या प्रोक्ता विद्याधिदेवताः ।
तत्र विद्यासु कर्तव्याः सकलीकरणादयः ॥ ९

सिसाधयिषुणा विद्यामविघ्नेनेष्टसिद्धये ।
यत्स्वस्य क्रियते रक्षा सा भवेत् सकलीक्रिया ॥ १०

शुद्धेनामृतमन्त्रेण वेष्ट्यं तच्छुद्धियन्त्रकम् ।
न्यस्यं शुद्धजले स्नायाद्येनामृतपदं स्मरेत् ॥ ११

एवं स्नानपवित्राङ्गो धौतवस्त्रपरिग्रहः ।
स्थित्वा संमार्जितैकान्तप्रदेशे देशसंयमी ॥ १२

कृतेर्या संशुद्धिः(शान्तः?)पर्यङ्कासनसंस्थितः ।
समीपस्थार्चनाद्रव्यः कुर्याद्विधिमिमं पुरा ॥ १३

परमात्मानमात्मानं प्रातिहार्यैरलङ्कृतम् ।
ध्यायेत् स्वपादयुग्भावनम्रमूर्धचराचरम् ॥ १४

इत्थं सङ्कीर्तितामेनां विधाय सकलीक्रियाम् ।
पञ्चोपचारविधिना यजेन्मन्त्राधिदेवताम् ॥ १५

पञ्चाह्वानस्थापनसाक्षात्करणार्चनाविसर्गाः स्युः ।
मन्त्राधिदेवतानामुपचाराः कीर्तितास्तज्ज्ञैः ॥ १६

आह्वानं पूरकेण स्यात् रेचकेन विसर्जनम् ।
शेषकर्माणि योज्यानि कुम्भकेन प्रयत्नतः ॥ १७

अथवैषामपि मन्त्राणामवचने जपादिषु सङ्ख्या ।
शतमष्टोत्तरसङ्ख्या सहस्रमष्टोत्तरं वदन्ति जिनाः ॥ १८

सर्वेषामपि मन्त्राणां मनसा जिह्वया शनैः ।
उच्चैरपि जपेद्भक्त्या विहितो मन्यते क्रमात् ॥ १९

जपादविकलो मन्त्रः स्वशक्तिं लभते पराम् ।
होमार्चनादिभिस्तस्य तृप्ता स्यादधिदेवता ॥ २०

एकस्तावद्वह्निः पुनरपि पवनाहतो न किं कुर्यात् ।
एको मन्त्रः पुनरपि जपहोमयुतोऽस्य किमसाध्यम् ॥ २१

जपकाले नमःशब्दं मन्त्रस्यान्ते प्रयोजयेत् ।
होमकाले पुनः स्वाहा मन्त्रस्यायं सदा क्रमः ॥ २२

होमादिषु सङ्ख्या स्यात् दशभागा मूलमन्त्रसङ्ख्यायाः ।
अङ्गादेरपि सङ्ख्या मन्त्रस्य तथैव बोद्धव्या ॥ २३

चतुरस्त्रं त्रिकोणं च वृत्तं चेति त्रिधा विदुः ।
कुण्डानि गार्हपत्याद्याः पूज्यन्ते यत्र पावकाः ॥ २४

मारणाकृष्टिवश्येषु त्र्यस्त्रं कुण्डं प्रशस्यते ।
विद्वेषोच्चाटयोर्वृत्तमन्येषु चतुरस्त्रकम् ॥ २५

तेषां हस्तोवगाढे च विस्तारे च प्रमा मता ।
पृथक् पृथक् स्मृतास्तिस्त्रो मेखलास्त्रिषु मन्त्रिभिः ॥ २६

आरभ्य तासामाद्याया विस्तृतावुच्छ्रितावपि ।
अङ्गुलानि प्रमा पञ्च चत्वारि त्रीणि च क्रमात् ॥ २७

सकलीक्रियाविशुद्धः परिधाय क्षौममक्षतं नूनम् ।
क्षौममयमुत्तरीयं बिभ्राणो ब्रह्मसूत्रधरः ॥ २८

रचयन् पल्यङ्कासनमुपान्ततरवर्तमानहोमार्थः ।
होमक्रियां विदध्यादाशंसुः कर्मसंसिद्धिम् ॥ २९

पलाशस्य समिन्मुख्या स्यादमुख्या पयस्तरोः ।
विधानमेतत्सङ्ग्राह्यं विशेषवचनादृते ॥ ३०

सृक्सृचौ चान्दनौ मुख्यौ पैस्थलौ दलसम्भवे ।
तदभावे पलाशस्य दलं वा पिप्पलस्य वा ॥ ३१

यानीन्धनानि पूतानि शुष्काणि क्षीरभूरुहाम् ।
भवन्ति तानि काष्ठानि सर्वस्मिन् होमकर्मणि ॥ ३२

प्रस्थः क्षीरस्य मानं स्याद् घृतस्य च तथा भवेत् ।
होमद्रव्यविमिश्रस्य मानं प्रस्थद्वयं मतम् ॥ ३३

वधविद्वेषोच्चाटेष्वष्टौ पुष्टौ मता नव शान्तौ ।
आकृष्टिवशीकृत्योर्द्वादश समिधः प्रमाङ्गुलयः ॥ ३४

अशुभैर्होमं कुर्यात् क्रुद्धमनाः क्षुद्रकर्म सर्वमपि ।
कर्म शुभं विदधीत प्रसन्नचित्तः शुभैर्द्रव्यैः ॥ ३५

वार्गन्धाक्षतपुष्पौघैर्दीपधूपफलैः क्रमात् ।
स्वं स्वं मन्त्रं जपेन्मन्त्री सप्तार्चिषमथार्चयेत् ॥ ३६

तस्मिन् प्रथमं त्रिमधुरयुक्तामेकां समिधं स्वहस्तेन ।
मन्त्री जुहुयादाज्यैश्चाहुतिमेकां स्तवेन ततः ॥ ३७

व्यामिश्रितशेषद्रव्याहुतिमेकां ततः स्रुचा कुर्यात् ।
प्रतिसमिधमेवं विधिः समिधस्त्वष्टोत्तरशतं तस्य ॥ ३८

क्षीरं घृतं गुडं चैतत् त्रिमधुराणीति कथ्यते इति ।
होमविधिः प्रोक्तः स कर्तव्यो मनीषिभिः ॥ ३९

अविकलया सामग्र्या येनैकः साधुः साधितो मन्त्रः ।
तस्याल्पयापि च तया परेपि मन्त्राः प्रसिध्यन्ति ॥ ४०

स्तम्भं विद्वेषमाकृष्टिं पुष्टिं शान्तिं प्रचालनम् ।
वश्यं वधं च तं कुर्यात् पूर्वाद्यभिमुखः क्रमात् ॥ ४१

वश्यविद्वेषणोच्चाटपूर्वमध्यापराह्णके ।
सन्ध्यार्धरात्रिरात्र्यन्ते वधशान्तिकपौष्टिकम् ॥ ४२

अङ्कुशसरोजबोधप्रवालमच्छङ्खवज्रमुद्राःस्यु ।
आकृष्टिवश्यशान्तिकविद्वेषणरोधवधसमये ॥ ४३

दण्डस्वस्तिकपङ्कजकुर्कुटकुलिशोद्यभद्रपीठानि ।
आसनविधौ प्रयोज्यान्युक्तेष्वाकर्षणाद्येषु ॥ ४४

वषट् वश्ये फडुच्चाटे हुं द्वेषे पौष्टिके स्वधा ।
वौषडाकर्षणे स्वाहा शान्तौ घेघेऽथ मारणे ॥ ४५

आकृष्टौ संवश्ये शान्तौ द्वेषे च रोधने वधे क्रमशः ।
उदयार्करक्तशशधरधूम्रहरिद्रासिता वर्णाः ॥ ४६

पीतारुणासितैः पुष्पैः स्तम्भनाकृष्टिमारणे ।
शान्तिपौष्टिकयोः श्वेतैर्धूम्रवर्णैः प्रचालने ॥ ४७

लोहितच्छविभिर्वश्ये विद्वेषेंऽजनसन्निभैः ।
जपहोमार्चनान्यत्र तत्र कार्याणि मन्त्रवित् ॥ ४८

कुम्भकं स्तम्भनाद्येषु रेचकं चालनादिषु ।
पूरकं चाङ्गनाकृष्टिप्रमुखे च प्रयोजयेत् ॥ ४९

स्फटिकप्रवालमुक्ताचामीकरपुत्रजीवकृतमणिभिः ।
अष्टोत्तरशतजाप्यं शान्त्याद्यर्थं करोतु बुधः ॥ ५०

कुर्याद्वा वामहस्तेन वश्याकर्षणमोहनम् ।
दक्षिणेनाखिलं होमं शिष्टाः सर्वाः क्रिया अपि ॥ ५१

अन्योन्यवज्रविद्धं पीतं चतुरस्रमवनिबीजयुतम् ।
कोणेषु रान्तयुक्तं भूमण्डलसंज्ञकं ज्ञेयम् ॥ ५२

नीरजभूषितवदनं कलशाकारं चतुर्वकारयुतम् ।
चेतं जलबीजयुतं जलमण्डलमाहुराचार्याः ॥ ५३

मुखमूलवपोपेतः पद्मपत्राङ्कितः सितः ।
पववर्णात्तदिक्कोणः कलशस्तोयमण्डलम् ॥ ५४

त्रिस्वस्तिकं त्रिकोणं यान्तं कोणेषु वह्निबीजयुतम् ।
ज्वालायुतमरुणाभं तन्मण्डलमाहुराग्नेयम् ॥ ५५

बहुबिन्दुवक्ररेखं वृत्ताकारं चतुर्यकारयुतम् ।
कृष्णं मारुतबीजं वायव्यं मण्डलं प्राहुः ॥ ५६

चत्वारि मण्डलानि च लवरयवर्णैः क्रमेण युक्तानि ।
पृथ्वीसलिलहुताशनमारुतबीजैः समेतानि ॥ ५७

आग्नेयमन्त्रः सौम्यः स्यात् प्रायशोन्ते नमोन्वितः ।
सौम्यमन्त्रस्तु विज्ञेयः फट्कारेणान्वितोन्ततः ॥ ५८

शिष्यो मन्त्रक्रियारम्भे स्नातः शुद्धाम्बरं दधत् ।
निर्जन्तुदेशके पूजाजपहोमान् करोत्विति ॥ ५९

पू. आ. श्री कमलप्रभाचार्यविरचितम्

## १९. ॥ श्री जिनपञ्जरस्तोत्रम् ॥

(अनुष्टुप्)

ॐ ह्रीँ श्रीँ अर्हं अर्हद्भ्यो नमो नमः
ॐ ह्रीँ श्रीँ अर्हं सिद्धेभ्यो नमो नमः
ॐ ह्रीँ श्रीँ अर्हं आचार्येभ्यो नमो नमः
ॐ ह्रीँ श्रीँ अर्हं उपाध्यायेभ्यो नमो नमः
ॐ ह्रीँ श्रीँ अर्हं गौतमप्रमुखसर्वसाधुभ्यो नमो नमः ॥ १

एषः पञ्चनमस्कारः सर्वपापक्षयङ्करः ।
मङ्गलानां च सर्वेषां, प्रथमं भवति मङ्गलम् ॥ २

ॐ ह्रीँ श्रीँ जये विजये, अर्हं परमात्मने नमः ।
कमलप्रभसूरेन्द्रो, भाषते जिनपञ्जरम् ॥ ३

एकभक्तोपवासेन, त्रिकालं यः पठेदिदम् ।
मनोऽभिलषितं सर्वं, फलं स लभते ध्रुवम् ॥ ४

भूशय्या ब्रह्मचर्येण, क्रोधलोभविवर्जितः ।
देवताग्रे पवित्रात्मा, षण्मासै र्लभते फलम् ॥ ५

अर्हन्तं स्थापयेन्मूर्ध्नि, सिद्धं चक्षुर्ललाटके ।
आचार्यं श्रोत्रयोर्मध्ये, उपाध्यायं तु घ्राणके ॥ ६

साधुवृन्दं मुखस्याग्रे, मनःशुद्धिं विधाय च ।
सूर्यचन्द्रनिरोधेन, सुधीः सर्वार्थसिद्धये ॥ ७

दक्षिणे मदनद्वेषी, वामपार्श्वे स्थितो जिनः ।
अङ्गसन्धिषु सर्वज्ञः, परमेष्ठी शिवङ्करः ॥ ८

पुर्वाशां च जिनो रक्षे–दाग्नेयीं विजितेन्द्रियः ।
दक्षिणाशां परं ब्रह्म, नैऋतीं च त्रिकालवित् ॥ ९

पश्चिमाशां जगन्नाथो, वायव्यां परमेश्वरः ।
उत्तरां तीर्थकृत्सर्वा–मीशानीं च निरञ्जनः ॥ १०

पातालं भगवानर्हन्नाकाशं पुरुषोत्तमः ।
रोहिणीप्रमुखा देव्यो, रक्षन्तु सकलं कुलम् ॥ ११

ऋषभो मस्तकं रक्षे–दजितोऽपि विलोचने ।
सम्भवः कर्णयुगलं, नासिकां चाभिनन्दनः ॥ १२

ओष्ठौ श्रीसुमती रक्षे–द्दन्तान्पद्मप्रभो विभुः ।
जिह्वा सुपार्श्वदेवोऽयं, तालु चन्द्रप्रभाभिधः ॥ १३

कण्ठं श्री सुविधी रक्षेद्, हृदयं श्रीसुशीतलः ।
श्रेयांसो बाहुयुगलं, वासुपूज्यः करद्वयम् ॥ १४

अङ्गुलीर्विमलो रक्षे-दनन्तोऽसौ नखावलिः ।
श्रीधर्मोऽप्युदरास्थीनि, श्रीशान्तिर्नाभिमण्डलम् ॥ १५

श्रीकुन्थुर्गुह्यकं रक्षे-दरो रोमकटीतटम् ।
मल्लिरुरूपृष्ठवंशं, जङ्घे च मुनिसुव्रतः ॥ १६

पादाङ्गुलीर्नमी रक्षे-च्छ्रीनेमिश्चरणद्वयम् ।
श्रीपार्श्वनाथः सर्वाङ्गं, वर्धमानश्चिदात्मकम् ॥ १७

पृथिवीजलतेजस्क-वाय्वाकाशमयं जगत् ।
रक्षेदशेषपापेभ्यो, वीतरागो निरञ्जनः ॥ १८

राजद्वारे श्मशाने च, सङ्ग्रामे शत्रुसङ्कटे ।
व्याघ्रचौराग्निसर्पादि, भूतप्रेतभयाऽश्रिते ॥ १९

अकाले मरणे प्राप्ते, दारिद्र्यापत्समाश्रिते ।
अपुत्रत्वे महादुःखे, मूर्खत्वे रोगपीडिते ॥ २०

डाकिनीशाकिनी ग्रस्ते, महाग्रहगणार्दिते ।
नद्युत्तारेऽध्ववैषम्ये, व्यसने चापदि स्मरेत् ॥ २१

प्रातरेव समुत्थाय, यः स्मरेज्जिनपञ्जरम् ।
तस्य किञ्चिद्भयं नास्ति, लभते सुखसम्पदः ॥ २२

जिनपञ्जरनामेदं, यः स्मरेदनुवासरम् ।
कमलप्रभसूरीन्द्रः, श्रियं स लभते नरः ॥ २३

प्रातः समुत्थाय पठेत्कृतज्ञो, यः स्तोत्रमेतज्जिनपञ्जराख्यं ।
आसादयेत्सःकमलप्रभाख्यां, लक्ष्मीं मनोवाञ्छितपूरणाय ॥२४

श्रीरुद्रपल्लीयवरेण्यगच्छे, देवप्रभाचार्यपदाब्जहंसः ।
वादीन्द्रचूडामणिरेष जैनो जीयाद् गुरुः श्रीकमलप्रभाख्यः ॥२५

पू.आ. श्री समन्तभद्रसूरिविरचितम्

## २०. ॥ ॐकारविद्यास्तवनम् ॥

प्रणवस्त्वं ! परब्रह्मन् ! लोकनाथ ! जिनेश्वर ! ।
कामदस्त्वं मोक्षदस्त्वं 'ॐ'काराय नमो नमः ॥ १

पीतवर्णः श्वेतवर्णो रक्तवर्णो हरिद्वरः ।
कृष्णवर्णो मतो देवः 'ॐ काराय नमो नमः ॥ २

नमस्त्रिभुवनेशाय रजोऽपोहाय भावतः ।
पञ्चदेवाय शुद्धाय 'ॐकाराय नमो नमः ॥ ३

मायादये नमोऽन्ताय प्रणवान्तर्मयाय च ।
बीजराजाय हे देव ! 'ॐ काराय नमो नमः ॥ ४

घनान्धकारनाशाय चरते गगनेऽपि च ।
तालुरन्ध्रसमायाते सम्प्रान्ताय नमो नमः ॥ ५

गर्जन्तं मुखरन्ध्रेण ललाटान्तरसंस्थितम् ।
पिधानं कर्णरन्ध्रेण प्रणवं तं वयं नुमः ॥ ६

श्वेते शान्तिक-पुष्ट्याख्याऽनवद्यादिकराय च ।
पीते लक्ष्मीकरायापि 'ॐकाराय नमो नमः ॥ ७

रक्ते वश्यकरायापि कृष्णे शत्रुक्षयकृते ।
धूम्रवर्णे स्तम्भनाय 'ॐकाराय नमो नमः ॥ ८

ब्रह्मा विष्णुः शिवो देवो गणेशो वासवस्तथा ।
सूर्यश्चन्द्रस्त्वमेवातः 'ॐकाराय नमो नमः ॥ ९

न जपो न तपो दानं न व्रतं संयमो न च ।
सर्वेषां मूलहेतुस्त्वं 'ॐ काराय नमो नमः ॥ १०

इति स्तोत्रं जपन् वाऽपि पठन् विद्यामिमां पराम् ।
स्वर्गं मोक्षं पदं धत्ते विद्येयं फलदायिनी ॥ ११

करोति मानवं विज्ञमज्ञं मानविवर्जितम् ।
समानं स्यात् पञ्चसुगुरोर्विद्यैका सुखदा परा ॥ १२

पू.आ. श्री चक्रेश्वरसूरिरचितः

## २१. ॥ श्रीवर्धमानविद्यास्तवः ॥

(आर्या)

विलसंत जोइबीए परमिट्ठीणं सरेमि पंचह्णं ।
सुह-पुट्ठि-तुट्ठि-संतिग-आरुग्ग एए पए पयउ ॥ १

केवलसिरितिलयाणं अट्ठमहापाडिहेरकलियाणं ।
तिहुअणपणयाण नमो अरिहंताणं सयाकालं ॥ २

सिद्धिगइमुवगयाणं अप्पडिहयनाणदंसणसिरीणं ।
सासयरुवाण नमो सिद्धाणमणंतसोक्खाणं ॥ ३

जिणपहपइट्ठियाणं पंचविहायारसारचरिआणं ।
पवयणवसहाण नमो आयरियाणं सुहनिहीणं ॥ ४

सययं नमो उवज्झायाणं अणवरयसुअपयाये(णे)णं ।
अणुगहियमुणिगणाणं अहीणवरणाणजलहीणं ॥ ५

निच्चं पि नमो लोए सव्वसाहूणमणहवित्तीणं ।
मुत्तिवहुसंगमुस्सुअमणसाण वि निरभिसंगाणं ॥ ६

तह ओहि-परमोहि-सव्वोहि-अणंतओसहीणं (ओही जिणाणं)च
सज्जोइपयाण नमो जिणाण सव्वेसिमेएसिं ॥ ७

तस्स य नमो भगवओ महइ महासिद्धिणो कुणइ विज्जा ।
वीरे अ सेणवीरे जयंते अपराजिए सव्वे ॥ ८

जाणेसो पंच नमुक्कारो निवसइ मणे महामंतो ।
ताण न पिसाय-साइणि-भूयाइभयाइं पहवंति ॥ ९

सुमरिअमित्तो वि इमो तिलोयरक्खा-विवक्खमण(य)महणो ।
रणरायगणमा(पासा)इसु विजयपडागं पयच्छेइ ॥ १०

गुणिओ अ सव्वपावप्पणासणो तह य मंगलाणं च ।
सव्वेसिं पढमं हवइ मंगलं सुमइ सूरीहिं ॥ ११

इइ वद्धमाणविज्जा चक्केसरपहुप्पसाय संपत्ता ।
पंचपरमिट्ठिणो मह हवंतु सुलहा पइ भवम्मि ॥ १२

महाकविधनञ्जयकृतम्

## २२. ॥ श्रीविषापहारस्तोत्रम् ॥

(उपजाति)

स्वात्मस्थितः सर्वगतः समस्तव्यापारवेदी विनिवृत्तसङ्गः ।
प्रवृद्धकालोप्यजरो वरेण्यः पायादपायात्पुरुषः पुराणः ॥ १

परैरचिन्त्यं युगभारमेकः स्तोतुं वहन्योगिभिरप्यशक्यः ।
स्तुत्योऽद्य मेऽसौ वृषभो न भानोः
किमप्रवेशे विशति प्रदीपः ॥ २

तत्याज शक्रः शकनाभिमानं नाहं त्यजामि स्तवनानुबन्धनम् ।
स्वल्पेन बोधेन ततोऽधिकार्थं वातायनेनेव निरूपयामि ॥ ३

त्वं विश्वदृश्वा सकलैरदृश्यो विद्वानशेषं निखिलैरवेद्यः ।
वक्तुं कियान्कीदृश इत्यशक्यः
स्तुतिस्ततोऽशक्तिकथा तवास्तु ॥ ४

व्यापीडितं बालमिवात्मदोषैरुल्लाघतां लोकमवापिपस्त्वम् ।
हिताहितान्वेषणमान्द्यभाजः सर्वस्व जन्तोरसि बालवैद्यः ॥ ५

दाता न हर्ता दिवसं विवस्वानद्यश्व इत्यच्युतदर्शिताशः ।
सव्याज्यमेवं गमयत्यशक्तः क्षणेन दत्सेऽभिमतं नताय ॥ ६

उपैति भक्त्या सुमुखः सुखानि त्वयि स्वभावाद्विमुखश्च दुःखम्।
सदावदातद्युतिरेकरूपस्तयोस्त्वमादर्श इवावभासि ॥ ७

अगाधताब्धेः स यतः पयोधिर्मेरोश्च तुङ्गा प्रकृतिः स यत्र ।
द्यावापृथिव्योः पृथुता तथैव व्याप त्वदीया भुवनान्तराणि ॥८

तवानवस्था परमार्थतत्त्वं त्वया न गीतः पुनरागमश्च ।
दृष्टं विहाय त्वमदृष्टमैषीर्विरुद्धवृत्तोऽपि समञ्जसस्त्वम् ॥ ९

स्मरःसुदग्धो भवतैव तस्मिन्नुद्धूलितात्मा यदि नाम शम्भुः ।
अशेत वृन्दोपहतोऽपि विष्णुः किं गृह्यते येन भवानजागः ॥१०

स नीरजाः स्यादपरोऽघवान्वा तद्दोषकीर्त्यैव न ते गुणित्वम् ।
स्वतोऽम्बुराशेर्महिमा न देव स्तोकापवादेन जलाशयस्य ॥११

कर्मस्थितिं जन्तुरनेकभूमिं नयत्यमुं सा च परस्परस्य ।
त्वं नेतृभावं हि तयोर्भवाब्धौ
जिनेन्द्र नौनाविकयोरिवाख्यः ॥ १२

सुखाय दुःखानि गुणाय दोषान् धर्माय पापानि समाचरन्ति ।
तैलाय बालाः सिकतासमूहं निपीडयन्ति स्फुटमत्वदीयाः ॥१३

विषापहारं मणिमौषधानि मन्त्रं समुद्दिश्य रसायनञ्च ।
भ्राम्यन्त्यहो न त्वमिति स्मरन्ति पर्यायनामानि तवैव तानि॥१४

चित्ते न किञ्चित्कृतवानसि त्वं देवः कृतश्चेतसि येन सर्वम् ।
हस्ते कृतं तेन जगद्विचित्रं सुखेन जीवत्यपि चित्तवाह्यः ॥ १५

त्रिकालतत्त्वं त्वमवैस्त्रिलोकी स्वामीति सङ्ख्यानियतेरमीषाम्।
बोधाधिपत्यं प्रति नाभविष्यं-
स्तेऽन्येऽपि चेद्व्याप्स्यदमूनपीदम् ॥ १६

नाकस्य पत्युः परिकर्म रम्यं नागम्यरूपस्य तवोपकारि ।
तस्यैव हेतुः स्वसुखस्य भानोरुद्बिभ्रतश्छत्रमिवादरेण ॥ १७

क्वोपेक्षकस्त्वं क्व सुखोपदेशः स चेत्किमिच्छाप्रतिकूलवादः ।
क्वासौ क्व सा सर्वजगत्प्रियत्वं तन्नो यथातथ्यमवेविचं ते ॥१८

तुङ्गात्फलं यत्तदकिञ्चनाच्च प्राप्यं समृद्धान्न धनेश्वरादेः ।
निरम्भसोऽप्युच्चतमादिवाद्रेर्नैकापि निर्याति धुनी पयोधेः ॥१९

त्रैलोक्यसेवानियमाय दण्डं दध्रे यदिन्द्रो विनयेन तस्य ।
तत्प्रातिहार्यं भवतः कुतस्त्यं तत्कर्मयोगाद्यदि वा तवास्तु ॥२०

श्रिया परं पश्यति साधु निःस्वः श्रीमान्न कश्चित्कृपणं त्वदन्यः।
यथा प्रकाशस्थितमन्धकार-
स्थायीक्षतेऽसौ न तथा तमःस्थम् ॥ २१

स्ववृद्धिनिःश्वासनिमेषभाजि प्रत्यक्षमात्मानुभवेऽपि मूढः ।
किं चाखिलज्ञेयविवर्तिबोधस्वरूपमध्यक्षमवैति लोकः ॥ २२

तस्यात्मजस्तस्य पितेति देव त्वां येऽवगायन्ति कुलं प्रकाश्य ।
तेऽद्यापि नन्वाश्मनमित्यवश्यं पाणौ कृतं हेम पुनस्त्यजन्ति ॥ २३

दत्तस्त्रिलोक्यां पटहोऽभिभूताः सुरासुरास्तस्य महान्स लाभः ।
मोहस्य मोहस्त्वयि को विरोद्धुर्मूलस्य नाशो बलवद्विरोधः ॥२४

मार्गस्त्वयैको ददृशे विमुक्तेश्चतुर्गतीनां गहनं परेण ।
सर्वं मया दृष्टमिति स्मयेन
त्वं मा कदाचित् भुजमालुलोक ॥ २५

स्वर्भानुरर्कस्य हविर्भुजोम्भः कल्पान्तवातोम्बुनिधेर्विघातः ।
संसारभोगस्य वियोगभावो विपक्षपूर्वाभ्युदयास्त्वदन्ये ॥ २६

अजानतस्त्वां नमतः फलं यत्तज्जानतोऽन्यं न तु देवतेति ।
हरिन्मणिं काचधिया दधानः
तं तस्य बुद्ध्या वहतो न रिक्तः ॥ २७

प्रशस्तवाचश्चतुराः कषायैर्दग्धस्य देवव्यवहारमाहुः ।
गतस्य दीपस्य हि नन्दितत्वं
दृष्टं कपालस्य च मङ्गलत्वम् ॥ २८

नानार्थमेकार्थमदस्त्वदुक्तं हितं वचस्ते निशमय्य वक्तुः ।
निर्दोषतां के न विभावयन्ति ज्वरेण मुक्तः सुगमः स्वरेण ॥२९

न क्वापि वाञ्छा ववृते च वाक्ते
काले क्वचित्कोऽपि तथा नियोगः ।
न पूरयाम्यम्बुधिमित्युदंशुः स्वयं हि शीतद्युतिरभ्युदेति ॥३०

गुणा गभीराः परमाः प्रसन्ना बहुप्रकारा बहवस्तवेति ।
दृष्टोऽयमन्तः स्तवने न तेषां
गुणो गुणानां किमतः परोऽस्ति ॥ ३१

स्तुत्या परं नाभिमतं हि भक्त्या स्मृत्या प्रणत्या च ततो भजामि।
स्मरामि देवं प्रणमामि नित्यं
केनाप्युपायेन फलं हि, साध्यम् ॥ ३२

ततस्त्रिलोकी नगराधिदेवं नित्यं परं ज्योतिरनन्तशक्तिम् ।
अपुण्यपापं परपुण्यहेतुं नमाम्यहं वन्द्यमवन्दितारम् ॥ ३३

अशब्दमस्पर्शमरूपगन्धं त्वां नीरसं तद्विषयावबोधम् ।
सर्वस्य मातारममेयमन्यैर्जिनेन्द्रमस्मार्यमनुस्मरामि ॥ ३४

अगाधमन्यैर्मनसाप्यलङ्घ्यं निष्किञ्चनं प्रार्थितमर्थवद्भिः ।
विश्वस्यपारं तमदृष्टपारं पतिं जनानां शरणं व्रजामि ॥ ३५

त्रैलोक्यदीक्षागुरवे नमस्ते यो वर्धमानोऽपि निजोन्नतोऽभूत् ।
प्राग्गण्डशैलः पुनरद्रिकल्पः पश्चान्नमेरुः कुलपर्वतोऽभूत् ॥३६

स्वयं प्रकाशस्य दिवा निशा वा न बाध्यता यस्य न बाधकत्वम्।
न लाघवं गौरवमेकरूपं वन्दे विभुं कालकलामतीतम् ॥ ३७

इति स्तुतिं देव विधाय दैन्याद्वरं न याचे त्वमुपेक्षकोऽपि ।
छायातरुं संश्रयतः स्वतः स्यात्-
कश्छायया याचितयात्मलाभः ॥ ३८

अथास्ति दित्सा यदि वोपरोध-
स्त्वय्येव सक्तां दिश भक्तिबुद्धिम् ।
करिष्यते देव तथा कृपां मे
को वात्मपोष्ये सुमुखो न सूरिः ॥ ३९

वितरति विहिता यथा कथञ्चित् -
जिन विनताय मनीषितानि भक्तिः ।
त्वयि नुतिविषया पुनर्विशेषाद् -
दिशति सुखानि यशो धनं जयं च ॥ (पुष्पिताग्रा) ४०

पू.आ.श्री सागरचन्द्रसूरिविरचितः

## २३. ॥ श्रीमन्त्राधिराज-यन्त्रोद्धारः कल्पः ॥

### प्रथमः पटलः

कल्याणाङ्कुरवारिदः शमसुधावार्धौ सुधादीधितिः
कारुण्याम्बुजतिग्मरोचिरखिलक्ष्मापीठकल्पद्रुमः ।
मोहध्वान्ततितिप्रदीपकलिका संसारनिस्तारकृत्
भव्यानां शिवतातिरस्तु भगवान् वामासुतोऽयं जिनः ॥ १

भ्रूभङ्गमङ्ग न दधे नयने न ताम्रे
दध्रे न शस्त्रमपि नो परुषं बभाषे ।
कामं जिगाय गतकायममाय एव-
मेव प्रणम्रकमठः स शिवाय देवः ॥ २

श्वभ्रप्रदाऽशुचिरियं प्रथितेति दोषाद्
योषां हि संयमवधूवशगो हि हित्वा ।
बभ्राम मुक्तिललनागमने सरागो,
नीरागतायुगपि यच्छतु शं स पार्श्वः ॥ ३

अन्तःस्फुरद्रुचिरसञ्चितसप्ततत्त्व-
कोटीपतिर्जिनपतिः प्रकटध्वजोऽस्तु ।
वामासुतः फणमिषात्फणिपस्य विश्व-
विश्वार्तिसंहतिहरो व्यवहारिवद् यः ॥ ४

अज्ञोऽपि विज्ञजनविस्मयकारि काव्यं,
यस्याः प्रसादलवमाप्य जनस्तनोति ।
मोहान्धकारनिकरार्ककरप्रभावा,
सा भारती भवतु जाड्यतमश्छिदे वः ॥ ५

शून्यात्मकोऽहमपरं स्वकसंगतोऽपि,
कुर्वन्नगण्यमिह पूर्वपदाऽधिकां तु ।
सङ्ख्यां यदेकपुरतः स्थितिमाप्य लेभे,
वन्देऽतिगीष्पतिगुरून् सुगुरून् मुदा तान् ॥ ६

दुष्कर्मकण्टककटुद्रुममूलभेद-
नेमिप्रभं सुललितं प्रभयाभिरामम् ।

सद्भावदेवविनतं गतकोपमानं,
सानन्दमूर्जितमर्तिं स्वगुरून् नमामि ॥ ७

वाचालयत्यनुकलं सकलं जिनेन्द्र-
भक्तिस्ततोऽहममतिः स्तवने प्रवृत्तः ।
सद्भिः प्रशान्तमतिमद्भिरतो विमृश्य,
सेर्ष्यं मनो नहि विधेयमिहाञ्जलिस्तत् ॥ ८

काव्ये मुधाकृतसुधालहरीसमूहे,
दोषेक्षिणः खलु खलाः सततं भवन्ति ।
स्वादून्मृदून्नपि तरून् करभा विहाया-
ऽपीच्छन्ति हा ! कटुककण्टकिनः करीरान् ॥ ९

काव्याध्वनि प्रवसतामिह सत्कवीनां,
वामस्वरः खर इवार्थकरोऽनुकूलः ।
कर्णेजपः प्रकृततः कलुषाशयोऽपि,
चित्रं तु दक्षिणरवः प्रतिकूलताहृत् ॥ १०

निर्यातमब्धितलतो हरकण्ठमाप्य
पीयूषदीधितियुतं तु विहाय मन्ये ।
सर्प्पालिदुर्ज्जनकुलेषु विषं सुखेन,
तस्थौ मुखांकटमनःसु मुदाऽऽस नन्दि ॥ ११

पक्षद्वयेऽपि मलिनः खलकौशिकोऽयं,
दोषाकरेऽपि हि कलङ्किनि बद्धरागः ।
वित्रासहेतुरपि वामरवोऽपि बाढं,
काव्याध्वनि प्रवसतामिह हर्षकारी ॥ १२

साधौ सुधारसलसद्वचनप्रताने-
क्व? कालकूटनिलयस्य खलस्य चिन्ता ।
प्रद्योतने द्युतिमतीव वितन्वतीह
जागर्ति किं जगति कस्तमसोऽवकाशः? ॥ १३

अब्धौ विधौ मखविधौ फण-भृन्निवासे,
मोहात्सुधामिह मुधा विबुधा वदन्ति ।
क्षारे क्षयिण्यथ शिखिप्रहते विषार्ते,
सास्त्येव सत्यपकृताऽखिललोकशोके ॥ १४

शक्तस्तव स्तवनमस्तगुणौघसंख्य !
वाचस्पतेरपि समानमतिर्न कर्तुम् ।
मीनाति वीतमतिकः सिकताकणान्कः,
कूलङ्कषाविपुलकूलतले सुराणाम् ॥ १५

निर्दोषतो बत नरोऽतिबलो विदन्तो,
दन्तीव शूकर इवातिवपुर्विदंष्ट्रः ।
चक्रीव दैवतवपुर्जितशत्रुजातः,
सञ्जातवित्तविभवः पुरुषश्चकास्ति ॥ १६

केचित्सुरा इह भवे हितमाचरन्ति,
नामुत्र केचिदिह नो परलोक एव ।
वामासुतः पुनरसाविह विघ्नहर्ता,
दाता श्रियां परभवे शिवसौख्यकर्ता ॥ १७

बालोऽपि देवततिसंस्तुतपादपद्म-
युग्मस्य संस्तवनमस्य ततः करिष्ये ।

मन्त्राधिराजजिनभर्तुरमर्त्यनागे
किं माद्यतीह न गजाः प्रमदा भवन्ति ? ॥इति प्रस्तावना १८

दाता जितेन्द्रियचयोऽथ निरामयश्चा-
ऽमायो दयार्द्रहृदयो विनयावनम्रः ।
स्नातः प्रशस्तदिवसे धृतधौतवस्त्रः,
शिष्यो गृहीतफलपुष्पसमृद्धगन्धः ॥ १९

सम्पूज्य पार्श्वजिनबिम्बमुपोष्य कृत्वा,
वाचाम्लमुत्तमतपः प्रवरोऽब्जवारे ।
सज्ज्ञानचन्द्रधवलीकृतविश्वविश्वं,
ब्रह्मव्रतस्थिततरं गुरुमित्थमाह ॥ (युग्मम्) २०

कृत्वा प्रसादमसमं मयि पादलग्ने,
मग्ने जडत्वजलधौ यदि योग्यताऽस्ति ।
मन्त्राधिराजवरयन्त्रयुतं तु मन्त्रं,
पात्रे निधेहि भगवन् ! सुतरी सदृक्षम् ॥ २१

हृज्जानुनाभिमुखमस्तकमस्य पञ्च-
तत्त्वाक्षरैस्तु सकलीकरणं विधाय ।
अभ्यर्चिते श्रवसि मन्त्रमथ त्रिवारं
पाणौ क्षिपेद् गुरुरमुष्य सुवर्णमम्भः ॥ २२

क्षेत्रे सुबीजमिव मे भवतां प्रसादान्
मन्त्रप्रभुः सफलतां कलयत्वमेयः ।
इत्थं वदन्नमति पादयुगं गुरूणां,
शिष्यो यतो भवति कार्यकरः प्रणामः ॥ २३

इति प्रस्तावनाप्रदानविधिर्नाम प्रथमः पटलः ॥

## द्वितीयः पटलः

मन्त्राधिराजवलयेषु यथास्थितानि,
वक्ष्यामि सप्तसु यथाक्रममक्षराणि ।
आद्ये जिनेन्द्रवलयेऽत्र विधिं तु मन्त्र-
वर्णक्रमेण सहितं तु हिताय वच्मि ॥ १

आदौ जिनेन्द्रवपुरद्भुतमन्त्रयन्त्रा-
ह्वानासनानि सकलीकरणं तु मुद्राम् ।
पूजा जपं तदनु होमविधिं षडेव
कर्माणि संस्तुतिमहं सकलं भणामि ॥ (द्वारकाव्यम्) २

आद्यावनीतलसरोवरहाटकाद्रि-
मालोद्भवाष्टहरिदग्रयदलासनस्थम् ।
चन्द्राभचीवरजयाविजयागृहीत-
गङ्गोदकप्रवरचामरवीज्यमानम् ॥ ३

ऐरावतप्रतिमकुम्भिकृताभिषेकं,
छत्रत्रयोत्प्रथजगत्त्रयनायकत्वम् ।
पर्यङ्कशायिवपुषं सुखसिन्धुमग्नं,
नाशानिवेशपरिपेशलदृष्टियुग्मम् ॥ ४

बालप्रवालकदलीदलकान्तकान्ति-
क्षाराब्धिमध्यवसुधातलतुल्यदेहम् ।
दुर्लक्ष्ययोगिकलया परया परीतं,
पञ्चेन्द्रियप्रसररोधकुबोधशुद्धम् ॥ ५

स्वीयातिनीलमहसा सहसामराद्रि-
वृक्षस्थलीभिरवनीं किल नीलयन्तम् ।

पार्श्वस्थपार्श्वकमठासुरसेविताङ्घ्रिं
स्पष्टाष्टकर्मपटलद्रुदवानलार्हम् ॥ ६

शान्तं शिवं सुखकरं परमस्वरूपं
व्यक्तेतरं परमहं सकलं गतारिम् ।
व्यक्तं शिवं शिववधूपरिरम्भयुक्तं,
सिद्धं बुधं निरवधिं परमव्ययं च ॥ ७

नीरञ्जनं निरुपधिं विगतस्पृहं च
निर्बाधमाधिरहितं सहितं कलाभिः ।
धातारमीशममलं विकलं ह्यनन्तं,
पारङ्गतं गतभयं शरणं शरण्यम् ॥ ८

निर्मोहमन्त्यममलं विरुजं विमानं
त्रैलोक्यलोकमहितं विगुणं गुणाढ्यम् ।
सूक्ष्मं निराश्रयमनुत्तरमुत्तमं च,
क्षीणाष्टकर्मपटलं परमं पवित्रम् ॥ ९

पार्श्वस्थितोरगपतिं प्रथितप्रभाव-
पद्मावतीपरिगतं वलयर्वृतं च ।
मायाक्षरत्रिवलयं जिनयक्ष-यक्ष-
योषिद्युतं ग्रहगणैः सह लोकपालैः ॥ १०

श्रीअश्वसेनतनयं विनयावनम्र-
देवेन्द्रमौलिमणिरञ्जितपादपद्मम् ।
द्व्यंसालिकद्विभुजसन्धिगुदान्तकोण-
षट्कोणयन्त्रगतमादरतो नमामि ॥ (कुलकम्) ११

पाषाणदुर्विषशरेभरिपुप्रहार-
मेघाम्बुबाहकरकाशनिसन्निभैस्तु ।
वाक्यैर्जघान शमिनं जिनमाप्य तस्माद्,
शान्ति विवश कमठः शठतोज्झितोऽयम् ॥ १२

श्रीस्तम्भने परमतो(हि?)कृतावतारं,
वामासुतः परिगतोऽभयदेवसूरिः ।
कुष्टं पिनष्टि गलदङ्गमसौ स्म तस्माद्,
वृत्तिं चकार गुरुरेष यतो नवाङ्ग्याः ॥ १३

श्रीपद्मदेवसुगुरोस्तपसोत्तमस्य,
विस्फूर्त्तयोऽद्भुततमा हि यतो बभूवुः ।
यस्याक्षराणि तुरगावनिसम्मितानि,
काष्ठौषधीपतिमितानि वदन्ति चान्ये ॥ १४

यस्माद् भवन्ति भविनां भुवि सिद्धयोऽष्टौ,
कष्टं विनश्यति समस्तमपीह यस्मात् ।
तन्मन्त्रवर्णनिचयं स्थिति-वर्ण-कर्म-
भेदैर्भणाम्यहमिहात्महिताय बालः ॥ कलापकम् १५

भाले नीलं दक्षिणेंऽसे च रक्तं,
वामस्कन्धे पञ्चवर्णं तु हस्ते ।
सिन्दूराभं वामकुक्षौ तु धूम्रं,
मेघश्यामं वामकट्यामरिघ्नम् ॥ १६

भूयो वामे जानुनीहापि धूम्रं,
वामे पादे पीतवर्णं वदन्ति ।

नाभौ विश्वस्वामिनः पञ्चवर्णं,
धूम्रं वर्णं लिङ्गसङ्गे भणन्ति ॥ १७

वामे पादे जानु-कट्योः सुवर्ण-
वर्णान् कुक्षौ दक्षिणे कृष्णवर्णम् ।
याम्ये हस्ते नीलवर्णं तमाहु-
श्वेतौ प्राहुः सूरयोऽमू हृदिस्थौ ॥ १८

मुक्तावस्थं मस्तके श्वेतमेव,
वर्णानेवं प्राहुरष्टादशाऽपि ।
यन्त्रस्यान्तः षड् बहिः षड् षडेव
कोणोर्द्ध्वेऽयं स्यात्क्रमः सर्वदैव ॥ १९

भाले नीलं दक्षिणेंऽसे च रक्तं,
नाभौ वर्णं पञ्चवर्णं वदन्ति ।
विज्ञा वक्षस्यक्षरे श्वेतवर्णे,
शेषान् रक्तान् योगिनः केचिदाहुः ॥ इत्यक्षरविवक्षा । २०

अथ मन्त्राधिराजस्य, कमठस्यैवोपदेशतः ।
प्रकटस्य तु बीजानां, निष्पत्त्यतिशयौ ब्रुवे ॥ २१

निष्पन्नः प्रथमो वर्णस्त्वर्हतामशरीरिणाम् ।
आचार्याणामुपाध्याय-मुनीनां प्रथमाक्षरैः ॥ २२

मोक्षसौख्यप्रदो भाले, पार्श्वनाथस्य नीलरुक् ।
सकलो नाद-बिन्दुभ्यामुपेतस्तेजसां चयः ॥ २३

स एव दक्षिणे स्कन्धे, रक्तवर्णस्तु चिन्तितः ।
जगद्वश्यमवश्यं हि, प्रदत्ते योगिनां पुनः ॥ २४

शून्यवन्ह्यक्षरभवः प्रभवः सर्वसम्पदाम् ।
नादबिन्दु-कलोपेतः साकारः पञ्चवर्णयुक् ॥ २५

वामातनूजवामांस-संस्थितो रूपकीर्तिदः ।
धनपुण्यप्रयत्नानि, जय-ज्ञाने ददात्यसौ ॥ २६

स एवेस्वरसंयुक्तः स्थितो हस्ते जिनेशितुः ।
योगिभिर्ध्यायमानस्तु, रक्ताभोऽतिशयप्रदः ॥ २७

षष्ठस्वरयुतोऽरिघ्नो, धूम्रवर्णः स एव हि ।
पूज्यतां विजयं रक्षां दत्ते ध्यातोऽस्य कुक्षिगः ॥ २८

विसर्गद्वयसंयुक्तः स एव श्यामलद्युतिः ।
जिनवामकटीसंस्थः, प्रत्यूहव्यूहनाशनः ॥ २९

सर्वाऽशिवप्रशमनोऽञ्जनकान्तिर्विसर्गयुक् ।
वामजानुस्थितो ध्यातः, षड्विंशतितमोऽक्षरः ॥ ३०

वामेयवामचरणे, पीतवर्णः कषात्मकः ।
पिशाचग्रहभूतानां, शाकिनीनां प्रमर्दनः ॥ ३१

सुवर्णभरहं नीलवर्णोकारसमन्वितम् ।
रक्तं प्रसकलं श्याम-बिन्दुं कुम्भन्दनादयुक् ॥ ३२

नाभिपद्मस्थितं ध्यायेत् पञ्चवर्णं जिनेशितुः ।
तस्थुर्हरे षोडशामी सुवर्णद्युतयो जिनाः ॥ ३३

ऋषभोऽप्यजितस्वामी सम्भवोऽप्यभिनन्दनः ।
सुमतिः श्रीसुपार्श्वः श्रीश्रेयांसः शीतलोऽपि च ॥ ३४

विमलो ह्यनन्तजिनो धर्मः श्रीशान्तितीथकृत् ।
कुन्थुनाथो ह्यरजिनो नमिनाथो वीर इत्यपि ॥ ३५

ईकारे संस्थितौ पार्श्व-मल्ली नीलौ जिनेश्वरौ ।
पद्मप्रभ-वासुपूज्यावरुणाभौ कलास्थितौ ॥ ३६

सुव्रतो नेमिनाथस्तु, कृष्णाभौ बिन्दुसंस्थितौ ।
चन्द्रप्रभ-पुष्पदन्तौ, नादस्थौ कुन्दसुन्दरौ ॥ ३७

हितं जयावहं भद्रं, कल्याणं मङ्गलं शिवम् ।
तुष्टि-पुष्टि-करं सिद्धि-प्रदं निर्वृतिकारणम् ॥ ३८

निर्वाणाभयदं स्वस्ति-शुभधृतिरतिप्रदम् ।
मति-बुद्धिप्रदं लक्ष्मी-वर्द्धनं संपदां पदम् ॥ ३९

त्रैलोक्याक्षरमेनं ये, संस्मरन्तीह योगिनः ।
नश्यत्यवश्यमेतेषा-मिहाऽमुत्रभवं भयम् ॥ ४०

द्वाविंशतितमो वर्णः, पञ्चमस्वरसंयुतः ।
धूम्रवर्णो जिनेन्द्रस्य, लिङ्गस्थानाग्रतः स्थितः ॥ ४१

वामेयदक्षिणे पादे, रुद्रसंख्याक्षरःस्वरः ।
हेमवर्णो जानुकट्यो-र्द्वाविमावेव संगतौ ॥ ४२

खान्तं लान्तसमायुक्तं, साकाशश्यामलद्युतिम् ।
वामेयदक्षिणे कुक्षौ, मरुद्वर्णं विचिन्तयेत् ॥ ४३

साकारं नीलवर्णं त्र्यधिकत्रिंशदक्षरम् ।
विचिन्तयेज्जिनेन्द्रस्य, संस्थितं दक्षिणे करे ॥ ४४

चिन्त्यमानमिदं वर्ण-षट्कं च संस्मृतं सदा ।
योगिभिर्ध्यानिभिःपूर्णैर्जिनधर्मपरायणैः ॥ ४५

तोयानिलविषादीनां ग्रहराजाजिरक्षसाम् ।
अरातिमारिदस्यूनां, श्वापदानां भयं हरेत् ॥ ४६

श्रीपार्श्वनाथवक्षोज-युग्मे कुन्दसमद्युती ।
रुद्रार्यमस्वरौ चिन्त्यावाद्यस्याधिपतिर्जया ॥ ४७

शिवा शान्तिकरी तुष्टि-पुष्टिस्वस्तिकरी हि सा ।
विजयान्यस्य वर्णस्य ते चामरपरे उभे ॥ ४८

त्रैलोक्य(काल)मक्षरमूर्ध्नि, कोणे रेखोपरि स्थितम् ।
हिमेन्दुकुन्दसङ्काशं पार्श्वनाथस्य चिन्तयेत् ॥ ४९

जातरूपसमाकारा यन्त्ररेखासु कारयेत् ।
मन्त्रयन्त्रात्मकं पार्श्व-मित्थं योगी विचिन्तयेत् ॥ ५०

ह्रौँ वामकांसशिखरस्यतुमध्यगो ह्रीँ
ह्रा मंगदौ ह्रं इति कूर्प्परमध्यदेशे ।
यः कूर्पराग्रवसतिस्तु कलाचिकास्थो
नाभेरधो विहितहुः स्फुटपार्श्वनाथः ॥ ५१

गे दक्षिणानघविशालकलाचिकान्तः
यः कूर्परान्तरगताऽवनदग्रगष्ठः ।
स्वा बाहुरक्षकमयः शुभहांसकाग्रा-
स्तन्मध्य ॐमिति कृतप्रकृतिः श्रियेऽस्तु ॥ ५२

नादाग्रबिन्दुतलचन्द्रकलाशिरस्क-,
ब्रह्मस्वरूपममलं जिनपार्श्वनाथम् ।
रम्भादलाभवपुषं हि निजे ललाटे
ध्यायन्ति ते त्रिजगतीं प्रविलोकयन्ति ॥ ५३

चन्द्राभनादसितबिन्दुकलारुणत्व-
भास्वत्सुवर्णलहरं शिर ई विनीलम् ।

ये बीजमेतदनघं सुधियः स्वनाभौ,
ध्यायन्ति ते त्रिजगतीं प्रविलोकयन्ति ॥ ५४

शीतांशुनिर्म्मलजया-विजया स्वरूप
रुद्रार्यमस्वरयुगप्रथितप्रचारम् ।
ये दक्षिणोत्तरकुचस्थितमध्यभागे,
ध्यायन्ति तेऽभिजगतीं प्रविलोकयन्ति ॥ ५५

षट्कोणयन्त्रवलये नवपार्श्वरूप,
भास्वत्किरीटमणिरश्मिविवृद्धशोभम् ।
ध्यायन्ति ये निजशरीरकृतावतारं
ते नाथ शाश्वतपदाश्रयिणो भवन्ति ॥ ५६

देवोऽष्टादशदोषवर्जितपुरोऽष्टप्रातिहार्यान्वितो,
नाशावंशनिवेसतारनयनः सर्वप्रभावैर्युतः ।
स्फूर्जत्कर्मकरीन्द्रविद्रवहरिः कर्माष्टकस्फूर्तिमान्,
वामेयः कमठासुरेण विनतः पायादपायादसौ ॥ ५७

इति मध्यवलये जिनमन्त्रव्यावर्णनो नाम द्वितीयः पटलः ॥

## तृतीयः पटलः

भक्तिप्रह्वेन्द्रालीवन्द्यः फणिपरिवृढफणनिवहैः कृतातपवारणः
श्रीमत्पार्श्वस्त्रैलोक्यैकक्षितिहरणविहितसुमतिर्हताघततिर्जिनः
प्राज्यस्फूर्जत्कर्मस्तम्भेरमगणकटदलनहरिर्विनीलतनुच्छवि-
र्वित्तं कीर्त्तिं सिद्धिं दद्यादतिशयसमुदयसहितो जितातुलमोहभ(?१

(भुजङ्गविजृम्भितवृत्तम्)

मन्त्राधिराजवलये विमले द्वितीये,
षट्चन्द्रकोष्ठकयुते परितः स्थिताश्च ।

विद्यासुरी रसविधि प्रमिता हि युक्ता
वर्णास्त्रवाहनभुजैरथ संस्तवीमि ॥ २

गोवाहना कुन्दसमानवर्णा, चापाक्षमालाशरशङ्खहस्ता ।
चतुर्भुजा भूषणभूषिताङ्गी सा **रोहिणी** नो दुरितानि हन्तु ॥ ३

त्रिशूलदण्डा-भयबीजपूर-हस्ता प्रशस्ता वरलोहिताङ्गी ।
या देवता **प्रज्ञपती**ति नाम्नी, सर्गासनस्था दुरितानि हन्तु ॥४

श्वेतद्युतिर्या वरदानपद्म,-सत्शृंखलारुद्चभुजा महाभा ।
या **वज्र**पूर्वा भुवि **शृंखलाख्या** पद्मासनस्था दुरितानि हन्तु ॥५

जाम्बूनदाभा गजगामिनी हि, फलाक्षमालाङ्कुशशूलपाणिः ।
अनेकदेवाभिनता नताङ्गी **वज्राङ्कुशी** नो दुरितानि हन्तु ॥ ६

या भिन्नवर्णा नरवाहनस्था भुजै श्चतुर्भिर्धुतभव्यचक्रा ।
विभूषणालङ्कृतदेहभागा **चक्रेश्वरी** नो दुरितानि हन्तु ॥ ७

रक्ताब्जवद्धासनसंस्थितिर्या, हेमप्रभा खेटकखड्गहस्ता ।
स बीजपूराऽभयदानशस्ता, **नृदत्त**नाम्नी दुरितानि हन्तु ॥ ८

घनाघनाभा कमलासनस्थाः त्रिशूलमालावरमुद्गराङ्का ।
**काली** कलाभासुरसच्छरीरा, सा देवता नो दुरितानि हन्तु ॥९

कलापिकण्ठावलिनीलदेहा, सरजमालावरघंटिकाङ्का ।
नृपृष्ठसंस्था तु महेतिपूर्वा,-सा **कालिका** नो दुरितानि हन्तु॥१०

उत्तप्तजाम्बूनदमूर्तिकान्तिः कुकुद्मवाहाभिरता वराङ्गी ।
अब्जक्षमालावरदण्डहस्ता, **गौरीति** देवी दुरितानि हन्तु ॥११

धाराधराकारशरीरयष्टिः सहस्रपत्रासनसंस्थिता या ।
त्रिशूलदण्डाभयदानहस्ता **गान्धारी**देवी दुरितानि हन्तु ॥ १२

श्वेतच्छदस्था सितरोचिरङ्गा चतुर्भुजन्यस्तसरिसृपाङ्का ।
चतुर्भुजा या च महेतिपूर्वा **ज्वालाभिधाना** दुरितानि हन्तु ॥१३

या भिन्नवर्णा कमलासनस्था वृक्षाक्षमालावरदानपाणिः ।
सा **मानवी** मानवनम्यपादपद्मद्वया नो दुरितानि हन्तु ॥ १४

विहङ्गराजासनबद्धसंस्था पयोधराभा भुजगेन्द्रपत्नी ।
फणीन्द्रयुग्मासिसुखेटकाङ्का **वैरोट्यदेवी** दुरितानि हन्तु ॥१५

तुरङ्गवाहा सितनित्यकाया खड्गासिपत्रीशरखेटकाङ्का ।
या जातरूपप्रतिजातरूपा **अच्छुप्त**देवी दुरितानि हन्तु ॥ १६

हेमांशुरीचिः प्रतिमा नितान्तश्वेतच्छेदस्था धृतशूलमाला ।
वरप्रसन्नाननपूर्णचन्द्रा सा **मानसी** नो दुरितानि हन्तु ॥ १७

सारङ्गसंस्था हिमरोचिराभा भृङ्गारखड्गाभयखेटकाङ्का ।
**श्रीमानसी** यापि **महेति** पूर्वा सा देवता नो दुरितानि हन्तु ॥१८

द्विरष्टविद्यावरदेवतानां स्पष्टाक्षरं स्तोत्रमिदं पठेत् यः ।
स प्रीतियोगं लभते मनुष्यः श्रीपार्श्वतः सागरचन्द्ररूपम् ॥१९

वामासुतक्रमकुशेशयभृङ्गभावं
ये बिभ्रतीह भविका मुदिताशयास्तु ।
तेषां गृहेषु दुरितप्रकरं हरन्त्य-
स्तन्वन्ति शान्तिकममूस्त्रिदशाङ्गना हि ॥(इति विद्यादेव्यः)२०

ततस्तृतीये वलये ह्यमुप्य (?ष्य) स्थिताश्चतुर्विंशतिकोष्ठकेषु ।
स्तवीमि सर्वज्ञतते: सवित्रीर्जगत्त्रयीवन्दितपादपद्माः ॥ २१

श्रीमरुदेवी विजया सेना देवी ततश्च सिद्धार्था ।
स्यान्मङ्गला सुसीमा पृथिव्यथो लक्ष्मणा देवी ॥ २२
रामा नंदा विष्णु र्जया ततः श्यामिकाथ सुयशा च ।
स्यात् सुव्रताऽचिरापि श्रीरथ देवी प्रभावती पद्मा ॥ २३
वप्रा शिवाथ वामा त्रिशला देवी च जिनजिननीः ।
निजनिजपुत्रसमेता एताः सन्ततमहं नौमि ॥
(इति जिनजनन्यः) २४

तुर्ये जिनेन्द्रवलये जलधिद्वि कोष्ठे
यक्षान् जिनेन्द्रपदपङ्कजचञ्चरीकान् ।
वर्णासनाननभुजायुधकीर्तनेन
स्तोष्यामि कामितददानहमादरेण ॥ २५

हेमच्छविर्गजगतिर्वरजापमाला-
संयुक्तदक्षिणकरो वृषभस्य भक्तः ।
सन्मातुलिङ्गकलपाशगवामपाणि-
र्दद्यात् सुखानि मम **गोमुख**यक्षराजः ॥ २६

श्यामो गजेन्द्रवदनो वरतुर्यवक्त्रो
याम्येऽक्षदामवरमुद्गरपाशपाणिः ।
सन्मातुलिङ्गशृणिशक्त्यभयाङ्कवाम-
पाणिर्महोदयद**यक्षवरः** सदा(वो)ऽस्तु ॥ २७

धाराधरच्छविरवत्वभयाहिशत्रु-
रङ्गद्गदायुगपसव्यभुजस्त्रिनेत्रः ।
नागाक्षसूत्रफलवामकरः शरीरं
सर्पासनस्थितिरयं **त्रिमुखो** मदीयम् ॥ २८

श्यामो गजेन्द्रगतिरी**श्वर**नामधेयः
सन्मातुलिङ्गजपमालिकयात्तहस्तः ।
बभ्चकुशप्रवरवामकरः पुनातु
तुर्योऽभिनन्दनजिनक्रमपद्मभृङ्गः ॥ २९

शीतद्युतिच्छवितनुर्वरशक्तियुक्त-
हस्तो गदोरगपपाशगवामपाणिः ।
यो वैनतेयगमनो दुरितापहारी
यक्षः स **तुम्बर** इह प्रथितप्रभावः ॥ ३०

रम्भादभाभवपुरेषकुमारयानौ
यक्षः फलाभयपुरोगभुजः पुनातु ।
बभ्चक्षदामयुतवामकरस्तु गात्रं
पद्मप्रभक्रमगतः **कुसुमा**भिधानः ॥ ३१

दुर्वाङ्कुराकृतिरिभासनबद्धसंस्थो
ब्रह्मद्रुबिल्वयुतदक्षिणपाणियुग्मः ।
**मातङ्ग** एष नकुलाङ्कुशवामहस्तो
विघ्नव्रजं हरतु नः सततं त्रिहस्तः ॥ ३२

हंसासनस्त्रिनयनो **विजयो** विनीलो
दद्याज्जयं हि मम मुद्गरचक्रपाणिः ।
श्वेतो**ऽजितः** कमठगोऽभयमातुलिङ्ग-
पाणिस्तनुं नकुलकुन्तकरः पुनातु ॥ ३३

पीयूषदीधितिसितः कमलासनस्थो
**ब्रह्मा**भिधस्त्रिनयनोऽथ चतुर्मुखश्च ।

सन्मातुलिङ्गवरमुद्गरपाशपाणि-
र्जाप्यस्त्रगङ्कुशगदानकुलाङ्कहस्तः ॥ ३४

पीयूषपानधवलो वृषयानयानो
यक्षो ददातु सुख**मीश्वर**नामधेयः ।
पाणिद्वयीधृतगदाकलमातुलिङ्ग-
बभ्चक्षदामयुतवामकरस्त्रिनेत्रः ॥ ३५

कुन्दद्युतिर्वरमरालगतिः **कुमारो**
यक्षोऽथ दक्षिणभुजेषु फलैः प्रशस्यः ।
बिभ्रद् धनुः सनकुलं त्विह वामपाणि-
युग्मे ददातु सुखमेष चतुर्भुजश्च ॥ ३६

चक्राक्षदामफलशक्तिभुजङ्गपाश-
खड्गाङ्कदक्षिणभुजः सितरुक् सुकेकी ।
चक्राङ्कुशाभयधनुः फलकोरगारि-
पाणिः श्रियं दिशतु **षण्मुख** एष यक्षः ॥ ३७

पद्मासनस्त्वरुणरुक् त्रिमुखस्त्रिनेत्रः
षट्पाणिरम्बुजकृपाणसुपाशपाणिः ।
**पाताल**नामकलितः फलकाक्षमाला-
बभ्चङ्कवामभुजयुग् दुरितानि हन्तु ॥ ३८

कूर्मस्थितिस्त्रिवदनोरुणरुक्शरीरः
सद्बीजपूरमभयं च गदां दधानः ।
याम्यैः करैर्नकुलपङ्कजजापमाला-
वामैः करैर्हरतु **किन्नर** एष दुःखम् ॥ ३९

धाराधरद्युतिकलः किरिवाहनस्थः
सन्मातुलिङ्गजलजे भुजयोर्दधानः ।
बभ्चवक्षदामयुतवामकरो **वराह**-
यक्षस्त्वयं मम सुखानि ददातु चषः ॥ ४०

पानीयपूरभृतनीरदतुल्यदेहः
प्रत्यूहसञ्चयमभिद्यतु हंसयानः ।
**गन्धर्व** एष वरपाशभृदग्र्यपाणिः
सन्मातुलिङ्गशृणिवामकरो मदीयम् ॥ ४१

यक्षोऽसितो वृषगतिः शरमातुलिङ्ग-
शूलाभयासिकलमुद्‍गरपाणिषट्कः ।
शूलाङ्कुशस्त्रगहिवैरिधनूंषि बिभ्रद्
वामेषु खेटकयुतानि हितानि दद्यात् ॥ ४२

इन्द्रास्त्रकान्तिरिभराजगतिः **कुबेरः**
शूलाभये वरकुठारयुते दधानः ।
याम्येषु मुद्‍गरजपस्त्रजमग्र्यशक्ति
सद्बीजपूरमपरेषु करेषु रातु ॥ ४३

कर्पूरपूरधवलोऽष्टभुजो वृषस्थ-
स्त्र्यक्षो जटी फलगदाशरशक्तिपाणिः ।
चापं कुठारमुदजं नकुलं दधानो
वामेष्वधस्य **वरुणो** हरणाद्यतः स्यात् ॥ ४४

स्वर्णद्युतिर्वृषगतिश्चतुराननश्च
त्र्यक्षोऽष्टपाणिरघहृद् **भृकुटिर्ववेत्तः** (स वोऽस्तु) ।

याम्ये फलाभयसुमुद्गरशक्तिपाणि-
र्वज्राक्षसूत्रपरशूरगवैरिपाणिः ॥ ४५

षटपाणिरम्बुदविभो नृगमिस्त्रिनेत्रो
**गोमेध** एष सुखमासजनस्य दद्यात् ।
सद्बीजपूरपरशावथ चक्रमग्र्य-
हस्तेषु शक्तिनकुलौ दधदग्र्यशूलम् ॥ ४६

श्यामो गजेन्द्रवदनोऽहिफणाढ्यमूर्धा
स्यात् कूर्मगः सुखकरः किल **पार्श्वयक्षः** ।
सन्मातुलिङ्गभुजगावपसव्यगौ च
बभ्रूरगावितरतः सततं दधानः ॥ ४७

श्रीवर्द्धमानजिनपादमराललीलः
श्यामो गजेन्द्रगमनो द्विभुजः पुनातु ।
**मातङ्गयक्ष** इह मङ्गलसिद्धिकारी
सद्बीजपूरनकुलौ भविनं दधानः ॥ ४८

वामासुतक्रमकुशेशयमात्मचित्ते
धत्ते हि योऽनवरतं नवरङ्गभक्तिः ।
यक्षावली किल विलीनविपक्षलक्ष-
स्यामुष्य शान्तिमियमोकसि सन्तनोतु ॥ इति यक्षाः ४९

यानाननायुधकराङ्गरुचिप्रभेदः
सङ्कीर्त्तग्राम्यहमतः स्थितिमादधानाः ।
यक्षाङ्गनाश्च वलये जिन२४सङ्ख्यकोष्ठे
यन्त्रस्य चास्य किल पञ्चमके सुकेश्यः ॥ ५०

ताक्ष्यस्थितिः कनककान्तितनुस्तु पाश-
चक्रेषुपुञ्जवरदक्षिणपाणिरेषा ।
चक्राङ्कुशाशनिधनुर्युतवामहस्ता
**चक्रेश्वरी** सुखकरी भविनां सदा स्यात् ॥ ५१

क्षीरार्णवोर्मिचयनिर्मलदेहकान्ति-
र्लोहासनाऽहिवरपाशयुताग्र्यपाणिः ।
सद्बीजपूरशृणिसङ्गतवामहस्ता
भूयादियं हि **विजया** विजयाय पुंसाम् ॥ ५२

देवी तुषारगिरिसोदरदेहकान्ति-
र्दद्यात् सुखं शिखिगतिः सततं परीताः ।
जापस्त्रजं परमियं तु फलाभये तु
सम्बिभ्रती भुजचतुष्टयशोभमाना ॥ ५३

सा **कालिका** मधुकरोत्करतुल्यदेहा
पद्मासनासिवरपाशगयाम्यपाणिः ।
नागाङ्कुशावितरपाणियुगे वहन्ती
सौख्यान्यसावसुभृतां विनता ददातु ॥ ५४

सम्मोहिनी कनकरुक् वरपाशहस्ता
दद्यान्मुदं फलशृणीं दधती कजस्था ।
श्यामा नृयानगतिकृद् वरबाणपाणि-
श्चापाभयान्वितकराप्यथ मानसी च ॥ ५५

ज्वालाकरालवदना द्विरदेन्द्रयाना
दद्यात् सुखं वरमथो जपमालिकां च ।

पाशं शृणिं मम च पाणिचतुष्टयेन
ज्वालाभिधा च दधती किल मालिनीव ॥ ५६

पीता वराहगमना ह्यसिमुद्गराङ्का
भूयात् कुठारफलभृद् भृकुटिः सुखाय ।
चाण्डालिका हिमसमा वरजापमाला-
युग्गोपतिश्च कलशाङ्कुशवामहस्ता ॥ ५७

गोमेधिका सवरपाशकराऽम्बुजस्था
नीला फलाङ्कुशकराऽभिमतानि दद्यात् ।
सिंहस्थितिर्हिमसमा वरमुद्गराङ्का
विद्युन्नदा भवतु कुम्भशृणी दधाना ॥ ५८

कृष्णाजिता तुरगगा वरशक्तिहस्ता
भूयाद्धिताय सुमदामगदे दधाना ।
पीतप्रभा कमलगा शरपाशहस्ता
चापाहिपाङ्कितकरा च विजृम्भिणीव ॥ ५९

पद्मासना वरभृता हिमरुक् सपाश-
खड्गान्विता सुखकरा शृणखेटकाङ्का ।
कन्दर्पिकाथ झषगोत्पलमङ्कुशं च
पद्मद्वयं हिमसमासि.......... वहन्ती ॥ ६०
कुन्दद्युतिः कमलगोत्पलपुस्तकाङ्का
स्याद्धारिणी वरकमण्डलुयुक् सुखाय ।
गान्धारिणी शिखिगतिः किल बीजपूर-
शूलान्वितोत्पलयुग्द्विकरेन्दुगौरा ॥ ६१

नीलोत्पलं कलमथाम्बुजमक्षसूत्रं
काली तमालदलरुक् कजमावहन्ती ।
कृष्णा मुदे जलदभा वरजापमाला-
युक् शक्तियुक्फलकरा वनजातदेवी ॥ ६२

भद्रासना हिमसमा वरजापमाला-
पाणिः सुगन्धिरिह शूलफलाभ्युपेता ।
श्वेता मरालगमना सुममालिनी शं
दद्याद्दर्सि वरफलं फलकं वहन्ती ॥ ६३

कुष्माण्डिनी कनककान्तिरिभारियाना
पाशाम्रलुम्बिसृणिसत्फलमावहन्ती ।
पुत्रद्वयं करकटीतटगं च नेमि-
नाथक्रमाम्बुजयुगं शिवदा नमन्ती ॥ ६४

पद्मावती भुजगराजवधूर्विधूत-
विघ्ना सुवर्णतनुकुर्कुटसर्पयाना ।
पाशाम्बुजाञ्चितकरा त्रिफणाढ्यमौलिः
पायात् फलाङ्कुशविराजितवामपाणिः ॥ ६५

सिद्धार्थिका नवतमालदलालिनील-
रुक् पुस्तिकाभयकरा नखरायुधाङ्का ।
वीणाफलाङ्कितभुजद्वितया हि भव्या-
नव्याज्जिनेन्द्रपदपङ्कजबद्धभक्तिः ॥ ६६

श्रीअश्वसेनतनयं विनयावनम्रा
ध्यायन्ति ये स्वहृदये विगतान्यकृत्याः ।

यक्षाङ्गना जिनपतीनिव तान्नताङ्ग्य-
आराधयन्ति सततं दुरितं हरन्त्यः ॥ इति यक्षिण्यः । ६७

एतस्य लाञ्छनतनुच्छविदेहमान-
नामानुवादजननीजनकाभिधानैः ।
स्तोष्ये जिनानहमिमान् वलये स्थितांश्च
षष्ठेऽधुनेह परितो हिततेहतवेऽपि ॥ ६८

श्रीनाभिभूपमरुदेविभवो वृषाङ्को
गाङ्गेयगौरशरपञ्चधनुःप्रमाणः ।
संसारसागरवितारतरी विनेता-
स्वामी शिवं दिशतु मे स युगादिनाथः ॥ ६९

अष्टापदद्युतिधरो द्विरदेन्द्रचिन्हः
पञ्चाशतीशतचतुष्टयचापतुङ्गः ।
दद्यान्मतानि विजयाजितशत्रुपुत्रो-
ऽयोध्याजनिर्जिनपतिस्त्वजितो द्वितीयः ॥ ७०

गाङ्गेयभः शतचतुष्टयचापदेहः
श्रावस्तिपूःकृतजनिस्तुरगाङ्कितांङ्गः ।
सेनाजितारितनयो विनयान्नतोऽयं
श्रीसम्भवः प्रभवताच्छिवतातये वः ॥ ७१

सिद्धार्थसंवरसुतः कपिपोतचिन्हो-
ऽयोध्याजनिर्मथितमन्मथसङ्कथस्तु ।
हेमद्युतिः खशरवह्निधनुः शरीर-
मानोऽभिनन्दनजिनो भविनः पुनातु ॥ ७२

हेमद्युतिस्त्रयधनुःशतदेहमाना-
ऽयोध्याजनिर्नृपतिमेघरथाङ्गजन्मा ।
चक्राङ्कितः सुवनतः किल मङ्गलाभू-
र्भूयादयं भवभिदे सुमतिर्जिनेशः ॥ ७३

पञ्चशतीद्विशतचापतनुं सुसीमा-
श्रीमद्धराभिधनृपप्रभवो विभूतिम् ।
कौशाम्बिभूकृतजनिर्जलजाङ्गलक्ष्मा
पद्मप्रभोऽरुणतनुर्वितनोतु देवः ॥ ७४

वाराणसीकृतजनिः फणपञ्चकाङ्को
हेमद्युतिः शतधनुर्द्वितयप्रमाणः ।
श्रीमत्प्रतिष्ठपृथिवीतनयो विभूति-
मत्स्वस्तिको जिनपतिर्जयतात् सुपार्श्वः ॥ ७५

व्योमेषुशीतरुचिसङ्ख्यधनुःप्रमाणः
श्रीलक्ष्मणाजठरभूर्महसेनपुत्रः ।
चन्द्राङ्कचन्द्ररुचिचन्द्रपुरीसुजन्मा
चन्द्रप्रभः प्रभवतां भवभीभिदे वः ॥ ७६

कामन्दकीकृतजनिः शतचापतुङ्गो
रामाङ्गमूर्धवलरुग् मकराङ्कचिह्नः ।
देवेन्द्रवन्द्यचरणः सुविधिर्विभूतिं
सुग्रीवभूर्वितरतां मम पुष्पदन्तः ॥ ७७

श्रीवत्सयुग् नवतिचापतनुप्रमाणो
नन्दासुतो दृढरथान्वयमण्डनोऽयम् ।

उत्तप्तहेमरुचिभद्दिलपूः सुजन्मा
श्रीशीतलोऽवतु जनं किल शीतशीलः ॥ ७८

श्रेयांस एष कलधौतसमो ह्यशीति-
चापोच्चदेह इह गण्डकलाञ्छनस्तु ।
श्रीविष्णुभूमिपतिविष्णुवधूतनूजः
श्रेयांसि यच्छतु सुसिंहपुराधिजन्मा ॥ ७९

रक्तप्रभो महिषलाञ्छनलाञ्छिताङ्ग-
श्चम्पाजनिस्त्वथ जयावसुपूज्यपुत्रः ।
यश्चापसप्ततितनुप्रमितिर्मतानि
श्रीवासुपूज्यजिन एष सतां ददातु ॥ ८०

श्यामाभवो ह्यवनिभृत्कृतवर्मपुत्रः
काम्पिल्यपत्तनजनिः कनकावदातः ।
कोदण्डषष्टितनुयष्टिरसौ वराह-
लक्ष्मा ददातु विमलः कमलां जिनेशः ॥ ८१

श्येनाङ्कसिंहरथभूः कनकस्त्वयोध्या-
जन्मा विनीतसुरसंस्तुतपादपद्मः ।
व्योमेषुकार्मुकतनुः सुयशातनूजो
दद्यादनन्तसुखमेष जिनस्त्वनन्तः ॥ ८२

वज्राङ्क ! रत्नपुरसम्भव ! हेमकान्ति-
श्रीभानुभूपकुलदीपक ! सुव्रताभूः ।
पञ्चाब्धिकार्मुकतनो ! जितमन्मथेश !
श्रीधर्मनाथ ! जय नाथ ! कृताधिनाथ ! ॥ ८३

सज्जातरूपवररूपधरो मृगाङ्कः
श्रीविश्वसेननृपभूरचिरातनूजः ।
व्योमाब्धिचापतनु–हस्तिपुरात्तजन्मा
शान्तिं तनोतु भविनामिह शान्तिनाथः ॥ ८४

श्रीसम्भवो गजपुरप्रतिलब्धजन्मा
हेमद्युतिः शरकृशानुधनुःप्रमाणः ।
यः छागलाञ्छनधरो नृपशूरजातो
देवो व्यपोहेतु तमो मम कुन्थुनाथः ॥ ८५

त्रिंशद्धनुस्ततवपुः कनकाभ ! नन्दा–
वर्ताङ्क ! नागपुरसम्भव ! देववन्द्य ! ।
देवीहृदम्बुजरवे ! च सुदर्शनाङ्ग–
जातारनाथ ! घननाथभवारिमारे ॥ ८६

श्रीमल्लिनाथ ! कदलीदल नीलदेह !
पञ्चद्विकार्मुकतनो ! नृपकुम्भपुत्र ! ।
श्रीमत्प्रभावतिजने ! मिथिलापुरीज !
कुम्भाङ्क ! भाविनरनेन्तरमर्त्यजन्म (?) ॥ ८७

तैलाक्तकज्जलकेलवर ! कूर्मचिह्नः !
त्रिंशद्धनुस्तनुविमान ! सुमित्रसूनो ! ।
पद्मावतीप्रभव ! राजगृहात्तजन्मा
जन्माघसङ्घमपि घातय सुव्रतार्हन् ॥ ८८

हेमद्युतिः कलविनीत महोत्पलाङ्कः
पञ्चेन्दुकार्मुकतनुर्मिथिलापुरीस्थः ।

वप्राभवो विजयभूपतिलब्धजन्मा
स्याच्छान्तये नमिजिनो भविनां तु नाम ॥ ८९

श्रीमत्समुद्रविजयात्मज ! शङ्खचिह्न !
कृष्णाङ्ग ! चापदशकोच्चतनो ! मतो नः !
श्रीमच्छिवाभव ! भवाघभवाधिहीनं
श्रीनेमिनाथ ! कुरु शौर्यपुरावतंस ! ॥ ९०

वाराणसीपुरजने ! कदलीदलाभ !
सर्पाङ्क ! हस्तनवकोच्चशरीर ! धीर ! ।
श्रीअश्वसेनकुलपङ्कजराजहंस !
वामातनूज ! जय मोक्षद ! पार्श्वनाथ ! ॥ ९१

सिद्धार्थपार्थिवभव ! त्रिशलातनूज !
हेमद्युते ! हि भुजसप्ततनुप्रमाण ! ।
कण्ठीरवप्रकटलाञ्छन ! वाञ्छितार्थं
श्रीवर्द्धमान ! मम देहि विमानमाय ! ॥ ९२

यश्चित्ते मुदितेऽवसीय सुपदद्वन्द्वं विधत्ते शिवं
शश्वद्वासनया प्रज्पदायो (?) मायः सुकायः पुमान् ।
एते वीतमदाः सदा दिविषदां वृन्देन ये वन्दिताः
सानन्दं शिवसम्पदं शमदयावन्तोऽस्य दद्युर्जिनाः ॥ ९३

इति जिनाः

त्रैलोक्यख्यातवर्णस्तपन इव तमस्तोमहत नितानं
विस्फूर्जद्बिन्दुनादौ निजपरशिरसीकारमात्तस्तु सज्जौ ।
एतद् यन्त्रं समस्तं क्षितिवलयमिवाम्भोनिधिं व्याप्य सिद्धो
मायावर्णाभिधानः स्थित इति सततं योगिभिर्ध्याय एव ॥९४

इति मायावर्णः ।

एतद् यन्त्रं बहिःपीठे यद् धरायां व्यवस्थितम् ।
न तस्याराधकाः सूत्रयन्ति यतो भणाम्यहम् ॥ ९५

एकचक्ररथ उष्णमयूषः सप्तसाप्तरिह पङ्कजहस्तः ।
सेवतेऽरुणरुचिः शुचिचेताः पार्श्वनाथपदपङ्कजमर्कः ॥ ९६

क्षीरसागरतरङ्गसमाङ्गः श्वेतवाजिदशकस्तु शशाङ्कः ! ।
सर्वदा जिनपतिक्रमसेवासङ्गि मानसमसावपि धत्ते ॥ ९७

मङ्गलोऽयमथ हिङ्गुलवर्णः शक्तिपाणिरिह मङ्गलहेतुः ।
भक्तियुक्तिपरिभावितचित्तः सेवते क्रमयुगं जिनभर्तुः ॥ ९८

बाणबाणधिशराशनपाणी रोहिणीरमणसंहत्त एषः ।
नीलदेहरुचिरस्य जिनस्य पादसेवनविधिं विदधाति ॥ ९९

स्वर्णकेतकसमानशरीरो वाक्पतिर्जिनपतिस्तुतिकारी ।
निर्जितामर मलि (?) लहरीभिस्तर्जितामृतरसोत्तमगीर्भिः ॥१००
भागर्वोऽसुरवितानतताङ्घ्रिः क्षीरनीरनिधिगौरशरीरः ।
सेवते क्रमयुगं जितभर्तुरश्वसेनकुलपङ्कजभानोः ॥ १०१

चण्डदीधितिसुतोऽपि सुचेतोदुःखनीरनिधितीरगमाय
सेवते जिनपतिं बत धूमस्तोमकान्तिरिह दण्डधरश्च ॥ १०२

ही शरीररहितोऽपि हिताय सिंहिकासुत इतोऽपि जिनेशम् ।
पश्यति प्रतिकलं कलभक्तिः स्यन्दनं तिमिरभो ह्यधिरूढः ॥१०३

देवदेवमभिवन्दति केतुः पातकाम्बुनिधिबन्धनसेतुः ।
खड्गपाणिरिह पादतलस्थश्चित्रवर्ण इव कल्मुषमालः ॥ १०४

ये जिनं निजमनस्युरुभक्तिव्यक्तरोमनिवहाङ्कुरसाराः ।
संवहन्ति विषमा अपि तेषां खेचरा मुदमिवेह वयस्याः ॥१०५

इति ग्रहनवकम् ।

बहुनेत्रसम्भववपुर्भगतां शमितुं जिनेन्द्र ! चरणौ शरणम् ।
तव देवराडिव नवस्तवनं कुरुतेऽनिशं समभिगम्य मुदा ॥१०६

निजतापसम्पदभितः शमितुं तव सेवते चरणयुग्ममिव ।
अनलस्फुलिङ्गपटलाकुलितं वपुरुद्वहन्निह महःखचितम् ॥१०७

बहुजन्तुघातततपातकतोऽञ्जननिभं महिषयानगतिः ।
वपुरुद्वहन्निव नवस्तवकृत् तव च दण्डपाणिरिह तच्छमितुम्॥१०८

सकलाम्बुदद्युतिरिव स्तुतिकृत् तव देव ! पादयुगलं नमति ।
नृकपालपाणिरिव रौद्ररसं शमितुं श्रितः प्रशमवारिनिधेः ॥१०९

निननाद ते जडपतिर्वरुणरश्चरणस्तुतिं बत जिनाऽयि कथम् ?।
तव भक्तिरेव मुखरीकुरुते त्वथवा जनं जडमपीह विभो ! ॥११०
चपलकुरङ्गतराशुबलः पवनः स्मव(स्वय?)न्नमति श्रयति ।
तव पादयुग्ममत एव जगत्तदशु स्वरूपमतदेव जिन ! ॥१११

धनदोऽन्धकारचितिहिताश्रयतोऽस्यभवत् कुबेर इति नामयुतः।
प्रभजन् पदे हि तव पुण्यनिधेर्विदितस्तु पुण्यजनराडिति सः॥११२

भसितत्रिनेत्रकदिगम्बरताभुजगास्थिरुषणच्छटापटलिः ।
वहतः शिवाश्रयसुतीनवपुर्भवतो भवस्य शिवनाभ भुवि ॥११३

विधिरच्छ्रवत् स्तुतिवचःसलिलैरभिवर्षति प्रतिजिनं यदिह ।
विमलीकरोति तदघं दुहितुः सुरताभिलाषजनिपङ्कमिव ॥११४

बलिधामसंस्थितिरभसं नमति स्तवसेवनं च नमनं नमितः ।
वदयन्त ईदृगतिसङ्गतिमन्निजवित्तमत्र...दति प्रकटाम् ॥ ११५

प्राच्यामिन्द्रो वह्निराग्नेयकोणे याम्यासंस्थो दण्डपाणिस्ततोऽपि।
रक्षोराजः स्याच्च नैऋत्यसंस्थो
यादोनाथः पश्चिमाशाकृतास्थः ॥ ११६

वायव्यस्थो गन्धवाहस्तु यक्षः कौबेरीस्थो रुद्र ईशानसंस्थः ।
ब्रह्मा प्राच्यां पश्चिमायामनन्तो
यं सेवन्ते लोकपाला दशामी ॥ इति लोकपालाः ११७

दक्षिणतो धरणेन्द्रो बहुफणभृत् कनकवर्णतनुरत्र ।
जिनभक्तं जननिवहं हृदयस्थितजिनवरस्त्ववति ॥ ११८

वामे पद्मावत्यथ कज्जलकालद्युतिस्त्रिफणकलिता ।
सर्पाभरणा कुर्कुटसर्पगतिस्त्रिभुवनं त्ववति ॥ ११९

क्षेत्राधिपतिर्मण्डलयानो व्यालोलकुन्तलकरालः ।
विहितभुजङ्गममालः षट्पाणिः सेवतेऽत्र जिनम् ॥ १२०

सितदीधितिसमवर्णे चामरजपमालिकावरफलाढ्ये ।
विमलालङ्कृतिवस्त्रे देव्यौ विजयाजये भवतः ॥ १२१

श्रीवामासुतभक्ते गजपतियाने करचतुष्कधरे ।
यन्त्रबहिःकोणगते एते दुरितालिमपहरतः ॥ १२२

अथ योजितकरकमलो मन्त्राधिपतिर्जिनाग्रतो ध्येयः ।
कमठो यन्त्रद्वारे कृतस्थितिर्द्वारपाल इव ॥ १२३

अरुणरुचिः शुचिमहीरुहहारिश्च विहितपीनकोपीनः ।
उच्छिखपावककीलापिङ्गलकुन्तलजटाजूटः ॥ १२४

उन्नतललाटपट्टप्रकटितभृकुटी कठोरकृतदृष्टे ! ।
विहितविकटाट्टहासत्रासितजगतीत्रितयसत्त्व ! ॥ १२५

तर्जितसघनघनाघनगर्जितहुंकारस्यवधिकराल ।
जिनपतिसकरुणवाचः श्रवणोत्पन्नासमदयासुलय ! ॥ १२६

जय कमठदुरितसन्ततिगजपतिभेनमृगपतितनूज ! ।
अहिपतिफणगणभूषण ! जिनवरचरणाम्बुरुहपुष्पलिह ! ॥१२७

कलापकम् ।

विगतमदैर्यशनावशतः सुगतिं विना वरचरणतपोभिः ।
सरसफला चमरकुलाविव शरणं कमठ ! जिनचरणौ ॥ १२८

इति कमठः ।

मन्त्राधिराजसज्जीविहितातिशयः सदाशयो जयति ।
श्रीपद्मदेवसूरिर्विख्यातो देवसूरिरिव ॥ १२९

प्रोद्यन्मार्तण्डबिम्बप्रतिमरुचिभरस्यास्य यन्त्रस्य विष्वक्
सर्वज्ञालीसुरेन्द्रासुरसुरयुवतीयक्षयक्षाङ्गनानाम् ।
सन्दोहैः सेवितस्य त्रिदशगिरिवनस्यावकासो वनाली-
नीलाभा भाति भूयो विबुधजनकृतानन्दकन्दप्रभेदाः ॥ १३०

## चतुर्थः पटलः ।

पूजाविधानमधुना सकलीकरणादिकं च सन्दर्श्य ।
कल्पेभ्यो विज्ञाय प्रवक्ष्यते निजहिताय मया ॥ १

भं१गां२इं३अं४वां५सं६आं७खं८लां९जं१०
वां११झ्वीँ१२क्षां१३वौँ१४वां१५ॐ१६स्यु:
सकलीकृते कनिष्ठाद्यङ्गुलिपर्वस्वतलौ च ॥ २

हरहुंहः सरसुंसः हरहुंहः पुनरथापि सरसुंसः ।
सकलीकरणं कुर्यात् पुरा चतुर्थं द्वितीयमपि ॥ ३

सत्त्वं रजस्तमो वाङ्गुलिपर्वसु चिन्तयेत् तृतीयं च ।
क्षिपॐस्वाहा वेन्यं......... गस्वेव तुर्यं तु ॥ ४

भूमि-जल-वसनशुद्धिर्विधिवद् विदधीत बुद्धिमान् मन्त्रैः ।
आह्वाननादिमुद्रापञ्चकमत्र प्रकुर्याच्च ॥ ५

ॐ विमले ! निर्मले ! सर्वतीर्थजले अशुचिः शुचिर्भवामि लों वों झ्वीं स्वाहा । इति जलशुद्धिः ।
ॐ ह्रीँ झ्वीँ क्ष्वीँ पां वां स्वाहा । इति वस्त्रशुद्धिः ।
इति मन्त्रान् त्रिरुच्चरन् भूमिं-जल-वस्त्राणि चक्षुर्भ्यां पश्यन् हस्तेन स्पृशेत् ।

हृदयान्तः समं लात्वा ससमो सम्मुखौ करौ ।
कृत्वोत्तानावधो नीत्वा मण्डले स्थापयेदिति ॥ ६
इति आह्वानमुद्रा ।

पराङ्मुखौ करौ कृत्वा हृद्न्तांससमौ पुनः ।
उत्तानौ स्थापयेद्यत्र मुद्रा सा स्थापनेति च ॥ ७
इति स्थापनमुद्रा ।

युक्तमुष्टिद्वयं बद्ध्वांगुष्ठौ मध्ये विनिक्षिपेत् ।
यन्त्रस्य दर्शयेन्मुद्रां सन्निरोधाख्ययेति च ॥ ८
इति सन्निरोधमुद्रा ।

हृदयान्तः स्कन्धसमौ सरलोर्ध्वमुखाङ्गुली ।
करौ संयोजयेच्चेति मुद्रेयं सन्निधानिका ॥ ९
इति सन्निधानमुद्रा ।

संस्पृशन् मध्यमा पृष्ठमङ्गुष्ठाभ्यां तु तर्जनीम् ।
कृत्वोर्ध्वौ बाहुमुष्टी च नामयित्वा करौ ततः ॥ १०

प्रत्येकं मण्डल अल्पे (?) कदयाय मथानयेत् ।
अवगुण्ठनमुद्रेति कार्या मन्त्रविचक्षणैः ॥ ११

इत्यवगुण्ठनमुद्रा । इति मुद्रापञ्चकम् ।

क्षिप ॐ स्वाहा हास्वा ॐ पक्षिरिति क्रमेण कृतरक्षः ।
अनुलोमं प्रतिलोमं पज्जानूदरमुखशिरस्सु ॥ १२

इत्यात्मरक्षा ।

ॐ ॐ ह्राँ ह्रीँ ह्रूँ ह्रः पातालवासिने च धमलवरयूं ।
धरणेन्द्राय स्वाहेति मन्त्रतः शीर्षरक्षाकृत् ॥ १३

इति शीर्षरक्षा ।

ॐ ॐ यः क्षौँ ह्रीँ फट् फट् गमलवरयूं च ।
श्रीपार्श्वाय स्वाहेति बाहुकुक्षिस्वलिङ्गकृतरक्षः ॥ १४

इति बाहूदरलिङ्गरक्षा ।

ॐ ॐ स्वाहा कठ कठ कमलवरयूं जये ! विजये ! ।
नम इति मन्त्राद् हृदये कृतरक्षो मन्त्रविधिवेत्ता ॥ १५

इति कण्ठहृदयरक्षा ।

पणवपुव्वं य वामाएवि ! य नियपुत्तपरियरिय रमसजाणे ।
मण्डलमज्झे आगच्छ तिट्ठ तिट्ठे य स्वाहेति ॥ १६

ॐ वामाएवि ! सपुत्ति ! सपरिवारे ! सवाहणि ! मंडल मज्झे आगच्छ आगच्छ, अत्र स्थाने तिष्ठ तिष्ठ स्वाहा ।

इत्याह्वानमन्त्राः ।

इत्याह्वानं कृत्वा विधाय मुद्रां जिनेन्द्रपार्श्वस्य ।
क्षुद्रोपद्रवरक्षाकृते जपेन्मन्त्रमिममेव ॥ १७

स्वसम्मुखौ करौ कृत्वा पाणावग्रथिताङ्गुली ।
चक्राङ्गुष्ठौ क्षिपेन्मध्ये पार्श्वमुद्रेति कीर्त्यते ॥ १८

ॐ उग्गे महाउग्गे उग्गे उग्गजसे पासे सुपासे पासमालिणि
ॐ ठः ठः ठः स्वाहा ।
अयं विघ्नोपशामको मन्त्रो । १०८ वार स्मरणीयः ।
यक्षाधिप-कमठ-जया-विजया-पद्मावतीप्रमुखमन्त्रैः ।
क्षेत्रपतेर्मन्त्रेण च स्मृतेन नश्यन्ति दुष्टाद्याः ॥ १९

मन्त्रो यथाक्रमम्-
ॐ ग्म्ल्व्र्यूँ मुद्गरत्रिशूलमुद्रया ग्रां ग्रीं ग्रूं ग्रौं ग्रः छिन्द्धि, छिन्द्धि भिन्द्धि भिन्द्धि, विहरि विहरि कम्ल्व्यूँ त्रां ब्रीं ब्रं ब्रौं त्रः ताडय ताडय ध्म्ल्व्र्यूँ घ्रां घ्रीं घ्रूं घ्रौं घ्रः यूः यूं ब्लूं ब्लूं फट् ह्म्ल्व्यूँ, ह्रांँ ह्रीँ हूँ हैँ हः हा हा इह कठोरमुद्रया ज्वल ज्वल, चालय चालय, प्रज्वल प्रज्वल, प्रज्वालय प्रज्वालय ॐ नमो भगवते पार्श्वयक्षाय चण्डक्रोधाय हूँ क्षँ स्तूं सम्ल्ब्र्यूं स्त्राँ स्त्रीँ स्त्रूं स्त्रौं स्त्रः हा हा घे घे वज्रासित्रिशूलधारया इदं भूतं हन हन, दह दह, पच पच, त्रासय त्रासय, स्वः स्वः, खाहि खाहि, मन्त्राधिराज आज्ञापयति हुं फट् स्वाहा । इति पार्श्वयक्षमन्त्रः ।
ॐ ग्म्ल्व्र्यूं रः रः रां रां ह्रां ह्रीँ आं क्रौँ ह्रीँ ह्रीँ ब्लूँ द्रां द्रीँ पार्श्वयक्षिणी ज्वल ज्वल, प्रज्वल प्रज्वल, हन हन, पच पच,

इदं भूतं निर्घाटय निर्घाटय धूमान्धकारिणी ज्वलनशिखे ! हुं फट् फट् यः यः यः ॐ मात्री दूतिका सहिते ! पार्श्वयक्षिणी आज्ञापयति स्वाहा । इति पार्श्वयक्षिणीमन्त्रः ।

ॐ ॐ ह्राँ ह्रीँ ह्रूँ ह्रः पातालवासिने घम्ल्व्यूँ ध्रां ध्रीं ध्रूं ध्रौं ध्रः अनेकफणमण्डिताय धरणेन्द्राय हुं क्लूँ हुं फट् स्वाहा ।

इति धरणेन्द्रमन्त्रः ।

ॐ ॐ क्म्ल्व्र्यूं कठ कठ पञ्चाग्नितपःसाधकाय ठम्ल्व्र्यूं द्रां द्रीँ कमठाय ह्रीँ फट् स्वाहा । इति कमठमन्त्रः ।

ॐ ॐ ऐँ श्रीँ जये विजये हर हर, सर सर, धम धम, हरय हरय, चूरय चूरय क्ष्म्ल्व्र्यूं हम्ल्व्यू स्म्ल्व्र्यूं यम्ल्व्र्यूं उम्ल्व्र्यूं स्वाहा

इति जयाविजयामन्त्रः ।

ॐ ऐँ क्लीँ हस्क्लीँ हसौँ देवी पद्मावती नमः ।

इति पद्मावती मन्त्रः ।

ॐ आँ हसौँ हस्क्लीँ ह्रौँ क्षेत्रपाल इदं स्थानं आगच्छ आगच्छ मम चिन्तितं कार्यं कथय कथय हुं वषट् ।

अथवा–

ऐँ ह्रीँ क्षाँ क्षीँ क्षूँ क्षौँ क्षौँ क्षः क्ष्म्ल्व्यूँ मण्डलक्षेत्रपालाय नमः।

इति क्षेत्रपालमन्त्रः ।

एते मन्त्राः पूजासमये स्मरणीयाः ।

इति मण्डलमन्त्रोद्वारः ।

वक्ष्ये विशेषमधुना ध्यानविधानस्य पार्श्वनाथस्य ।
यस्मात् साधकवर्गे त्रैकाल्यं ज्ञानमाविः स्यात् ॥ २२

क्षाराम्भोनिधिमध्ये जम्बूद्वीपाभिधोऽस्ति सद्द्वीपः ।
सुरयोजनलक्षपृथुः पृथ्वीधरतरुनदीभिरभिनीलः ॥ २३

अन्तर्नाडीनिर्गतजिनवरमौलौ विकस्वरं चिन्त्यम् ।
तदुपरि गैरिककमलं जलधिरस (६४) भ्राजमानदलम् ॥ २४

इदमुपरि कोमलतरा गब्दिका ततश्चिन्त्या ।
पूर्वोक्तरूपमहिमा तत्रासीनो जिनो ध्येयः ॥ २५

श्रीपार्श्वनाथवामे श्वेताभरणां स्वकानि बिभ्राणा ।
भुजषट्कं नेत्रत्रयमन्तो धरवरशरीररुचिः ॥ २६

पद्मावतीह देवी ध्यायन्ती तीर्थराजपदकमले ।
ध्यातव्या निजहृदये साधकवर्गेण सन्तुष्टा ॥ (यु.) २७

सितवाससी वसाने श्वेताभरणे च चामराढ्यकरे ।
विजयाजये च देव्यौ पक्षद्वितये ततश्चिन्त्ये ॥ २८

षोडशदलेषु षोडश विद्यादेव्यः स्थितास्तु परितोऽस्य ।
यक्षाः शासनदेव्यो नव ग्रहा लोकपालाश्च ॥ २९

एते चिन्त्याश्चेतसि धरणेन्द्रः फणसहस्रतः छत्रम् ।
बिभ्राणो जिनशिरसि स्फुटभक्तिव्यक्तिकश्चिन्त्यः ॥ ३०

अब्धिरसौ गीर्वाणाः कुर्वाणाः पञ्चवर्णसुमवृष्टिम् ।
गजपतिकरधृतकलसैर्ध्येयं च जिनेन्द्रमभिषिञ्चन् ॥ ३१

परितः स्थितोऽस्य वप्रो रत्नमयस्फुरितकिरणकपिशीर्षः ।
वज्रमयं तदुपरिगतमाच्छादनमत्र चिन्त्यं तु ॥ ३२

देदीप्यमानमूर्तिर्जिनवचनमनार्तिमाननुध्यायन् ।
करधृतवेत्रलतोऽयं कुर्वाणो द्वारपालत्वम् ॥ ३३

कमठः शठतारहितो ध्यातव्यो दुरिततिमिरदिनभर्ता ।
कुमतक्षितिजकुठारो दर्शनपङ्केरुहैकपुष्पलिहः ॥ (यु.) ३४

वप्रबहिस्तात् परिखा स्मर्तव्या खादिराङ्गारभृता ।
साधक एकाग्रमना ध्यानविधानं करोतीत्थम् ॥ ३५

इति विशेषध्यानम् ।

दक्षिणेतरभुजान्तरमध्यान्निःसरन्नथ सरीसर्पराजः ।
उज्जभेण सकलानपि वर्णानाश्लिषन्निजजनानिव बन्धुः ॥३६

स्वर्णसोदरसहस्रफणाभिशतपत्रमण्डलं तु दधानः ।
योगिभिर्जिनवरस्मृतिकाले
सन्ततं मनसि संस्मरणीयः ॥ (यु.) (इति ध्यानम्) ३७

अथ भणामि फणाङ्कजिनार्चनं न जपहोमविधौ विवद्यतः ।
फलति मन्त्र विहमतुं रात् (?) जलदवारिभरादिव पादपः ॥१

जय जिनेति वचः प्रथमं भणन् घुसणचन्दनतः कृतकङ्कणः ।
अगुरुधूपसुधूपितशुद्धरुक् सिचयसञ्चितदेहरुचिर्भृशम् ॥ २

त्रिंशांसकुसुमाञ्जलिपूर्वकं विलसीदलमम्बरपूरितैः ।
कनकभृत्कलधौतमयैर्विभुं स्नपयति प्रमदः कलसैरसौ ॥ ३

मृगमदागुरुचन्दनकुङ्कुमैर्मलयजैर्घनसारविमिश्रितैः ।
जिनवपुः परिलिप्य प्रपूजयेत् बकुलचम्पकमुख्यसुमैः शुभैः॥४

घृतविपक्त्रिममोदकसंयुतं सघृतमामिषमस्य च ढौकयेत् ।
विमलतन्दुलमङ्गलसत्फलावलिदलप्रददः कृतदीपकः ॥ ५

प्रणवपूर्वपदैस्तु नमोऽन्तगैरपि तुरीयविभक्तिगनामभिः ।
सकलमण्डलमर्चयति स्फुटं फलदलैः कुसुमैरसमैस्ततः ॥ ६

जय जयेति वदद्वदनाम्बरो जिनपदावभिनम्य सिताम्बरः ।
रजतहेममृदां वरकर्णिकामयमथो कुरु मङ्गलदीपकम् ॥ ७

धरणतद्दयिताविजयाजयाकमठपार्श्वनवग्रहसंयुतम् ।
सुरपवह्निकृतान्तपलादिनां वरुणवायुकुबेरपिनाकिनाम् ॥ ८

अजनरायणयोरपि नामभिः प्रणवपूर्वनमोऽन्तगतैरपि ।
समभिपूजयति स्फुटभक्तियुक् कुसुमधूपफलप्रमुखैः क्रमात् ॥९

गुदग-नाभिग-हृद्गत-कण्ठगा -
ऽऽस्यग-ललाटगवक्त्रचयादिवित् ।
श्वसनपञ्चकचारविचारणाकृदवबुद्धसमस्तसुतत्त्वकः ॥ १०
रहसि शीतमयूषमुपागते मरुति चारि कुमण्डलगे सति ।
कृतसमत्वरसो घनपावनः सुरपदिग्वदनो मदनोज्झितः ॥ ११

निजकरा वदित् (?) सुधराभवावनिरुहप्रभवं सुदलावलि ।
अशिथिलं विशदप्रभयान्वितं परिमलप्रसरं तु सुदन्तकम् ॥१२

परिहृताखिललोककथाप्रथः कुसुममेकमथैकमुदारधीः ।
अचलनिश्चलचित्तशरीरकं पवनयुक् प्रविधाय हृदग्रगम् ॥ १३

स्थिरतरीकृतनेत्रकनीनिको हृतसमस्तखवारमनोहरः ।
जिनपतिं परिवारयुतं स्मरन्न वचनो मरुता सह साहसी ॥ १४

जिनपतिक्रमयुग्मतले क्षिपन् रविसहस्रसुमानि पुमानिति ।
त्रितयमन्त्रजपप्रवराणि वै
जपविधिर्गदितः सकलस्त्वसौ ॥ (कु.) १५

जापान्ते नित्यपूजान्ते स्तवान्ते चैत्यवन्दनाम् ।
विदध्याद् बुद्धिमान् शुद्धां वामेयस्याग्रतो व्रती ॥ १६

मलयसम्भवशालिकतन्दुलोत्तमसिताघनसारविमिश्रितान् ।
जपितपुष्पचयीदशमांशतः सुरभिदुग्धघृतेन तु चूर्णितान् ॥१७

चनकमानगुटीः प्रकटार्चिषि रविशतप्रमिता ज्वलने कृताः ।
रसशशाङ्कमिताङ्गुलपिप्पलतरुसमिद्भिरथै महिषाभत्ततः (?)॥१८

दिवसते कमुते तृतयं यकः स्थिरमना अपि विघ्नशतार्दितः ।
निरशनैरहसि स्थितवान् मुनि-
र्धतयुताशयतः प्रतिहोमयेत् ॥ (कु.) १९

जिनपतिक्रमयुग्ममधुव्रतः सपदि वै कमठः शठतोज्झितः ।
प्रकटमूर्तिरमुष्य सुधाभुजां द्रुम इवालिमतानि ददात्यहो ॥२०
जिनपति... न जनं स्फुरच्छमदयं मदयन्त मुदारभम् ।
गतमर्तिर्बत नन्तुमहं तु सच्छमदयं मदयन्तमुदारभम् ॥ २१

बहुजनातपनस्त...पः पुनः शतकरो त रोति कलङ्कयुक् ।
जिनवरो... नववर्ण्यता मुपमया... न मया कया ॥ २२

जिन भवेद् भवते भवते ह वै न समता समता समता कृता ।
असुमते सुमतेर्निचयं तता वितरता तरता भवसागरम् ॥ २३

किमधुना मधुना मधुनान्त सुर-सुरवृतैरमतैरपि तैः किमु ? ।
जिनपतिं न पतिं न दधे लये त्रिजगती जगती तरशं किमु ?॥२४

जिनमते न मते भविनां मनः परमते रमते भवसङ्गते ।
जिनमतोद्यतभावनया विना विमदनं मदनं दम-त्वह ॥ २५

परममिच्छसि सद्प्रतिभेदनेऽवनमितं भजतं वशमाचले ।
सकलभं कलभञ्जितमोहभं सकलभं कलभं जितमोहभम् ॥२६
बिन्दुसञ्चारकम्

दमी महानन्द...नाश्रितो ददाति देवः पदमुच्चमुत्तमम् ।
वीरोऽथ हन्ता विदलं भवव्रजदवानलध्वंसदवारिवाहकः ॥२७
चक्रम् ।

तमानन्दकरं शान्तोद्धततोपगतागमम् ।
नमत्यविपदं भ्राजन्मोहारिसमरं न कः ? ॥परिधिश्लोकः । २८

मार्तण्डबिम्बवत् कान्तिः सिचये यद्यपुर्नवा ।
वारिदा सुरविप्लावेऽप्यौज्झतौ यन्मनः क्षमा ॥ २९

मायान्ते चक्रिवान् योऽपि यं तत्याज न चिद्रमा ।
मारबाणसुजेतारं तं जिनं नौमि सुस्थितम् ॥ युग्मम् । ३०
खड्गबन्धः ।

व्यञ्जितानेकलोकस्य जितानन्तरुचेर्गुणान् ।
तानङ्ग ! वक्तुमाशास्ते नेतर्वर्यकलोऽपि कः ॥ ३१

रमासारविदा रम्यतारसंसारसागर ! ।
गम्भीरसुन्दर श्रव्यरवान्तरतमो रवेः ॥ (यु.) ३२
कमलबन्धः ।

दीव्यद्देवेन्द्रवृन्दोद्यद्वादवन्द्यं दिवोददम् ।
देवदेवं विदं वन्देऽवद्यवादेद्यदावदम् ॥ द्व्यक्षरः । ३३

सर्वासुरसुरैः सेव्यो विश्वविश्वेश्वरः श्रिये ।
आश्रयः श्रेयसां सारः शिवसौख्याश्रयो वशी ॥ ३४

पञ्चवर्गपरिहारः ।

प्रणौमि मदजेतारं प्रध्वस्तान्तस्तमोभरम् ।
कामतस्तं सदानन्दकन्दास्तलवसम्पदम् ॥ (छत्रबन्धः) । ३५

रम्य वीरशरस्कारतिरस्कारपरः करः ।
स्फुरच्छरकरस्मेरश्रीरसौ रसरम्परः ॥ गोमुत्रिका । ३६

धरणेन्द्रनतो नम्योऽभवतापरतः शिवः ।
जिनो मदनहीनो न भवता परतः शिवः ॥ (यु.) ३७

गौरीभूतगुणोपेतं भवानीहितमागतम् ।
गौरीभूतगुणोपेतं भवानीहितमागतम् ॥ पादद्वययमकम् । ३८

भवन्तमीश्वरं प्राप्य तमचिराददहम् ।
भवन्तमीश्वरं प्राप्य भव्याजव्यामिनो पुनः ॥ (यु.) ३९

वामेयोऽजनि यो नम्यो विमेयो नाजि यो न दाः ।
दाने यो जितयोगज्ञः समयोजनि योगदः ॥ मरुजबन्धः । ४०

दम्भिमानजितं वन्दे देवं तं जिनमाभिदम् ।
वन्दितं ददने जन्यं न्यञ्जने ददतं दिवम् ॥ ४१

पिनाकिना नाकिनापि वन्दितं ददतं दिवम् ।
देवं दम्भिभिदं वन्दे मन्दरागगरादमम् ॥ गतप्रत्यागतौ । ४२

पादपीठस्फुरत्पार्श्वनाकिपं गतमन्मथम् ।
नम्याद् गिः सुकृतं स्तौमान्यमिद्चन वदावदम् ॥ ४३

पञ्चमपादेन स्यख्या (?)

यौवनेऽपि रमास्त्यक्त्वा वितताान तपोवनम् ।
आरसंसारनाशाय विततानतपोऽवनम् ॥ ४४

त्यक्त्वाक्षमाधनो भव्यामश्वसेनां गजोर्जिताम् ।
विदधे च तपः शुद्धमश्वसेनाङ्गजोऽर्जिताम् ॥ ४५

बिभ्रता मदनो येन देहे भव्याञ्जनश्रियम् ।
कुर्वता तृणवत्तूर्णं देहे भव्यां जनश्रियम् ॥ ४६

बभार मानसं शुद्धं कमठासुरसङ्गतः ।
वनं शमस्य सदनं कमठासु रसं गतः ॥ ४७

पुष्यत्वखिलभव्यानां भव्यं वामासुतो दिनम् ।
मनो दधानो भव्यास्वभव्यं वामासु तोदिनम् ॥ ४८

सद्ध्यानसन्धानमदो विहायमपारलोकश्रियमायतां ददत् ।
प्रमादपर्यङ्कतले भवोद्भवे
सुखावहे हे जिन ! मोहनिद्रया ॥ क्रियागुप्तकम् । ४९

त्रिभुवनजनतानां सर्वदा सम्मतानां
दलितदुरितलक्षः कामदः कल्पवृक्षः ।
विहितमदनमाथः सर्वविश्वैकनाथः
भवतु भवतुदे वः पार्श्वनाथः सदैव ॥ ५०

शमदामादमधीवा शमरसपीवा भवारिजनपामा ।
मोहान्धकारदीवा ध्यानदधिर्नन्दकैर्हि जिनः ॥ ५१
कृतप्रयोगेनायम् ।

श्रेयोवल्लिवनप्रकाशनघनः प्रह्वत्रिलोकीमन-
श्चिन्ताकल्पतरुर्जगत्त्रयगुरुः पापद्रुमालीत्सरुः ।

कारुण्यैकनिधिः कृतागमविधिर्विध्वस्तदुःखाम्बुधि-
र्दद्याच्छेकदयं सुखस्य निचयं वामेयदेवस्त्वयम् ॥ ५२

सद्गेहे कमला कलास्तु सकला देहेऽमलाः सिद्धयो
विस्फूर्जन्ति भजन्ति तं रुगचलाः सौभाग्यभाग्योदयः ।
तस्यारिप्रकरो करोत्यपि न किं रोषारुणोऽप्यप्रियं
यस्यायं कमठे शठत्वरहितो वश्याय वश्यं गतः ॥ ५३

## पञ्चमः पटलः

स्फूर्जत्कर्मवनप्रभेदलवनः संसारमानाशनः
प्रक्रीडन्मदनद्विषत्सु दमनः प्रोद्यन्मनोदामनः ।
मोहारेर्हननः सदा शमधनः प्रोत्फुल्लपद्मासनः
श्रीमत्पार्श्वजिनस्तनोतु भविनः सर्वश्रियां नन्दिनः ॥ १

षट्कर्ममर्मनिर्माणबीजान्यहमथ ब्रुवे ।
विज्ञायानल्पकल्पेभ्यो गुरुभ्योऽभ्यासतः स्वतः ॥ २

दिनमध्ये षड् ऋतवः षड् योगा दीपनादयः ।
षडासनानि षण् मुद्रा स्रग्दिग्बीजानि रञ्जिकाः ॥ ३

षड् वर्णा मन्त्रषट्कं च प्रभावसदनं तथा ।
एतत् सर्वं भणिष्यामि कर्मनिष्पत्तिहेतवे ॥ द्वारम् । ४

आदौ हि हेमन्तवसन्त सुक्षाः (उष्णाः)
प्रावृट्शरच्छीत ऋतुः क्रमेण ।
एकैकशः स्याद् दशभिर्घटीभि-
रित्थं विचार्येह च कर्म कार्यम् ॥ ५

उच्चाटनं जलऋतौ शिशिरे मृतिं च
शान्तिं शरद्यथ मधौ वशकर्मणेव ।
विद्वेषणं षड ऋतावथ लाभपुष्टी
हेमन्तगे इति बुधाः सततं प्रकुर्युः ॥ इति ऋतवः । ६

साध्याभिधा प्रथमतस्तत एव मन्त्र-
वर्णक्रमस्तदिति दीपनमत्र शान्त्यै ।
मन्त्रक्रमः प्रथमतोऽथ च साध्यनामा-
ऽसौ पल्लवः प्रकटितः कलिहेतुरेव ॥ ७

मन्त्रक्रमान्तरगतं किल साध्यनाम
यत्रापि सम्पुटमिदं वशहेतवे स्यात् ।
साध्याभिधान्तरगतोऽपि च यत्र मन्त्रो
रोधं तमाहुररिसंहतिबन्धनाय ॥ ८

मन्त्रक्रमग्रथितमत्र च साध्यनामै-
कैकाक्षरं ग्रथनकं त्विति लाभपुष्ट्यै ।
व्यस्ताभिधाक्षरगतं तु विदर्भणाख्यं
स्तम्भोऽत्र शत्रुनिवहस्य वदन्ति विज्ञाः ॥ ९

देवदत्त ॐ इति दीपनम् । १

ॐ देवदत्त इति पल्लवः । २

ॐ देवदत्त ॐ इति सम्पुटः ३

देव ॐ दत्त इति रोधः । ४

ॐ देॐव ॐदॐत्त इति ग्रथनम् । ५

ॐ त्तॐदॐवॐदे इति विदर्भणम् । ६

इति दीपनादियोगषट्कम् ।

दण्डासनं स्वस्तिकपङ्कजे च
स्यात् कुक्कुटं वज्रयुतं च भद्रम् ।
आकर्षणे वश्यवधे च पुष्ट्य-
शान्त्यै तथा द्वेषकृते वदन्ति ॥ इत्यासनानि । १०

आकृष्टि-वश्य-वध-रोध-विबोध-शान्ति-
विद्वेषणेषु सृणिरम्बुज-वज्र-शङ्खाः ।
बोध-प्रवालसहिताः षडमूर्हि मुद्रा
विद्रावणाय दुरितस्य सदा विदध्यात् ॥ ११

बद्ध्वा वामभुजस्य तु मुष्टिं बद्ध्वा तु तर्जनीचक्रम् ।
सन्दर्शयेदमुष्य तु मुद्राऽसावङ्कुशाख्येति ॥ १२

यन्मणिबन्धे पाणी सरल-प्रसृताङ्गुली बतौर्ध्वमुखौ ।
कुर्याद् यन्त्रस्याग्रे विधिविज्ञः कमलमुद्रेति ॥ १३

दक्षिणभुजेन वामा वामभुजेनापि दक्षिणा युगपत् ।
प्रसृताङ्गलिना ग्राह्या कलाचिका वज्रमुद्रेति ॥ १४

क्षिप्त्वाङ्गुष्ठो मध्ये मीलितसरलाङ्गुलीत्रयो यत्र ।
चक्रिततर्जनिकावथ भुजौ विदध्यात् तु शङ्खमुद्रा सा ॥ १५

चक्रकनिष्ठानामा न्यस्ताङ्गुष्ठाग्रयोर्यदिह भुजयोः ।
सरलचले तर्जनिकामध्यमिके स्तः प्रवालमुद्रेति ॥ १६

तिस्रोऽङ्गुलीस्तु सरलास्तर्जन्यङ्गुष्ठकौ च सम्मिलितौ ।
कुर्याद् यत्र प्रवचनबोधाख्या ज्ञानमुद्रा सा ॥ इति मुद्राः । १७

दृषत् प्रवालाम्बुजहेमपत्रजीवस्रजोऽङ्गुष्ठमुखाङ्गुलीभिः ।
मोक्षेऽभिचारे शमने वशे च आकर्षणे कर्मणि चालयेद्धि ॥१८

इति स्रजः ।

स्तम्भद्वेषाकर्षणपोषणशान्त्यादिवश्यमृतिकर्म ।
पूर्वादिकदिग्वदनः सुधीर्विदध्यात् सदा सर्वम् ॥ इति दिशः।१९

उच्चाटनद्वेषणमारणानि चण्डद्युतौ वायुरवतैजसस्थे ।
शान्तिं च पुष्टिं वशतां विबोधं चन्द्रे जलोर्वीप्रवहे विदद्यात् ॥२०

इति नाडि ।

काकोलूककपोतकङ्कतगरप्रेतालयास्थ्यंशुक-
क्षाराङ्गारकपालवालमहिषोष्ट्रश्वोत्थवालेयजाः ।
दन्तास्थ्य मृजचर्मकेशनिचया भद्रा च रिक्ता तिथि-
र्मन्देशार्कयमाग्निभं च मृतिकृत् योगादिरुच्चाटने ॥ २१

मध्यापराह्णास्तमयं हराग्निरक्षोयमाशा हरितालराज्यः ।
निम्बार्कपत्राणि च धूंसकेशनिर्माल्यधूलीतिलतैलभाषाः ॥२२

मषी च धर्त्तूरकपुष्पभूतद्रुशाल्मलीपिप्पलकीलकाद्याः ।
एतानि बीजानि बुधा भणन्ति विद्वेषणोच्चाटनमारणेषु ॥ २३

कर्पूरचन्दनसुकुङ्कुमगन्धधूली
प्रातर्निशार्धर विपुष्यभमूलयोगात् ।
श्वेतांशुकं दधिमधुप्रभृति प्रकामं
शान्त्यादि कर्मणि करोति बुधोऽथ सिद्ध्यै ॥ २४

इति द्रव्यसमुदायः ।

विद्वेषणाकर्षणचालनेषु हौं वौषडन्तं फडिति प्रयोज्यम् ।
वश्ये वषटवैरिवधे च घे घे
स्वाहा स्वधा शान्तिकपौष्टिकेषु ॥ इति रञ्जिकाः । २५

उदयार्करक्तशशधरधूमहरिद्रासिता वर्णाः ।
आकृष्टिवश्यशान्तिकविद्वेषणरोधवधसमये ॥ २६

मोहोषातरणिः प्रभाद्रुसरणिश्चिन्तामणिः प्राणिनां
चिन्तातीतफलप्रदानकुशलः कल्पद्रुदावानलः ।
मानस्फूर्तिहरः सरीसृपवरप्रोद्यत्फणाडम्बरः
पायात् पार्श्वजिनः समस्तभविनः पापेभपञ्चाननः ॥ २७

कर्मषट्कम्-

षट कर्माण्यहमधुना विधिना वक्ष्ये परार्थबोधाय ।
मन्त्राधिराजसत्कान्यवबुध्य च विमलकल्पेभ्यः ॥ २८

प्रातः पवित्रवसनो दीपनयोगेन पङ्कजासनकृत् ।
पूर्वाभिमुखः शुक्लध्यानयुतो बोधसंयुक्तः ॥ २९

हिमरुचिमञ्जनसङ्गतहंसौ विस्फूर्जदग्निजलतत्त्वे ।
शरदि प्रसन्नवदनो ह्यङ्गुष्ठेन प्रचालयेन्मालाम् ॥ ३०

कुङ्कुमचन्दनचन्द्रैः सुवर्णकुशलेखिनीभिरभिलिख्य ।
यन्त्रं पवित्रपात्रेऽष्टरवेन्दु कुसुमैः सितैर्जसम् ॥ ३१

पूर्वोक्तं योऽर्चयति च नित्यं शान्तिं करोति वामेयः ।
तस्य गृहे दुरिताली शाम्यति शरदीव घनमाला ॥ ३२

शमयति दुरितश्रेणिं दमयत्यरिसन्ततिं सततमसौ ।
पुष्णाति भाग्यनिचयं मुष्णाति व्याधिसम्बाधाम् ॥ ३३

शान्तिकयन्त्रम् ।

ह्रामलके ए स्कन्धे हा स्कन्धे फुं भुजे तु कुक्षावों ।
हूँ कटीतटगतः टो जानुनि वामपादे ॐ ॥ ३४

क्षौ नाभौ स्वा लिङ्गे ए पादे दक्षिणे यः फुः ।
जानुनि ह्रीँ कटि कः कुक्षौ ह्रीँ टः करयुगे योज्यः ॥ ३५

ह्रीँ शिरशि यन्त्रमिदं प्रवालमुद्रोऽथ कुक्कुटासनकृत् ।
वायव्यकोणवदनो मध्याह्ने हुं त्विति प्रयुञ्जानः ॥ ३६

प्रावृट्काले श्वसने तिग्मद्युतिनाडिकां समाश्रयति ।
निश्चलचेताः पवनगतत्त्वेऽसौ तर्जनीजापः ॥ ३७

घनसारघुसृणघूसकसुगन्धधूलीभिरेभिरभिलिख्य ।
कनकतरोर्लेखिन्या पात्रे जातीसुमैर्मषीमिश्रैः ॥ ३८

अष्टरवविधुप्रमाणैर्जपति नरो योऽनिशं विशङ्कः सन् ।
तदरिकुलं विद्वेषं मिथः प्रयातीह वामेयात् ॥ ३९

नार्या नरेण साकं नार्या सार्धं नरस्य विद्वेषम् ।
कुरुते कृष्णाशयतो ध्यातो वामासुतः सततम् ॥ ४०

शत्रूयति मित्रततिः सर्पति जनकः सपत्नति सवित्री ।
दस्यूयति दयितापि हि साधकशत्रोर्जिनप्रभावाच्च ॥ ४१

इति विद्वेषयन्त्रं द्वितीयम् ॥ २

भाले ह्रीमैं स्कन्धे ए स्कन्धे टो भुजे च कुक्षावोम् ।
हृः कटिगो जानुनि फुः पादे ॐ नाभिगो ह्रीं वः ॥ ४२

टो लिङ्गे चरणे ह्रां हृः कट्यां जानुनि स्वा तथैव ।
माया कुक्षौ हस्ते हा कुचयोर्यस्तथा हि फुः शिरसि ॥ ४३

सम्पुटयोगविधायी सरोजमुद्राविचक्षणो मन्त्री ।
रक्ताशयो वषट्कृत् पूर्वाभिमुखस्त्विदं यन्त्रम् ॥ ४४

उदयति हिमरुचि विलसति सलिलधरामण्डले ह्यनामिकया ।
जपमालां संवास्य प्रफुल्लहृदयश्च साधको ध्यायन् ॥ ४५

कर्पूरगन्धधूलीकुङ्कुमगोरोचनादिभिर्विमलगन्धैः ।
अभिलिख्य भूर्यपत्रे रक्तैः कुसुमैर्वसुखचन्द्रमितैः ॥ ४६

पूर्वाह्ने पूजयति च रक्ताशययुक् जिनेश्वरं भक्त्या ।
तस्यावश्यं वश्यं प्रयात्यरं विष्टपत्रितयम् ॥ ४७

नरनरपतियुवतिततिदुर्जनधीधनजिघांसुजनतापि ।
अपदद्विपदचतुःपदमुख्यं सर्वं हि वश्यं स्यात् ॥ ४८

इति वश्ययन्त्रं तृतीयम् ॥ ३

भाले ॐ स्कन्धे ॐ अंसे ए स्वान्तरों च यौ भुवनगः फुः ।
कुक्षौ टो जानुनि हुः पादे नाभिगोऽस्य भवति क्षः ॥ ४९

ह्रीं लिङ्गे पादयोर्यो हूँ जानुनि कुक्षिगो भवेद् द्विहृः ।
मायाभुजान्तरे ह्रीं हा कुचयोर्विद्धि ऐं शिरसि ॥ ५०

साधकयोगे निपुणो हरिहरिदुत्क्षिप्तरुद्रनयनयुगः ।
अपरार्धे वज्रासनविहितास्थः शङ्खमुद्रया कलितः ॥ ५१

चण्डद्युतावुदयति ज्वलने तत्त्वे समुद्यते नितराम् ।
मध्यमया कृतजापः साध्यं पीतप्रभं पश्यन् ॥ ५२

पीतप्रभमवनीतलमभितः पश्यन् हरिद्रया युतया ।
कुङ्कुमगोरोचनया लिखितं विजपंश्च हुंशब्दम् ॥ ५३

पीतैः कुसुमैरष्टखखेन्दुमितैरर्चयत्यनिशम् ।
यन्त्रमिदं यो योगी तस्यारीन् स्तम्भयेत् स जिनः ॥ ५४

कालसरीसृपरसनाप्रायान् दधतो हि तांश्च करवालान् ।
स्तम्भयति स्तम्भनकावतारपूर्जिनपतिस्तस्य ॥ ५५

गर्भव्याधिविबाधादुर्जनवादीन्द्रचोरदहनानाम् ।
निजपरचक्रजलाहिप्रभृतीनां स्तम्भनं कुरुते ॥ ५६

इति स्तम्भनयन्त्रं चतुर्थम् ॥ ४

ॐ भाले स्कन्धे ह्रीमंसे हृत्पाणिगो भवेत् प्रणवः ।
कक्षायां फुः कुक्षौ फुर्जानुनि ह्रीं पदे हि स्वा ॥ ५७

ह्रौं नाभौ लिङ्गे ह्रीं या पादे हूँ भवेत्तथा..... ।
जानुनि टः कुक्षौ फुः कक्षां (?) भुजेह्रीं कुचे एऐ ॥ ५८

यः शिरसि

याम्यादिग्वदनोऽयं दण्डासनसंस्थितो हि वौषट्कृत् ।
अङ्कुशमुद्रासहितोऽभ्युदितादित्यौजसं जिनं ध्यायन् ॥ ५९

हेमन्ते हिमकिरणे समुद्यते वायुमेदिनीतत्त्वे ।
पूरकवातविधाता कनिष्ठयाक्षस्रजं गमयन् ॥ ६०

अरुणोदयवेलायामिदं लिखित्वा तु भूर्यपत्रादौ ।
घुसृणघनसारचन्दनगोपित्तैर्यो हि पूजयति ॥ ६१

आयान्ति सम्पदस्तं नदीनमिव दूरतः सदा नद्यः ।
त्यजति नरं न हि सिद्धिर्वशीकृता मत्तनेत्रेव ॥ ६२

कनकगिराविव कनकं मणिरिव जलधौ निधाविव धनं च ।
रत्नमिव रोहणगिरौ तस्य गृहे चाक्षयं भवति ॥ ६३

इति लाभयन्त्रं पञ्चमम् ॥ ५

ह्रामलके ह्रीमंसे ह्रीमास्ये भुजान्तरे हि ह्रः फुः ।
फुः कट्याद्या जानुनि ह्रां पादे नाभियोगो हि ॥ ६४

ऐं लिङ्गे टः पादे हा जानुनि ह्रीं भवेत् कटीतटगः ।
कक्षायां क्षः करगः फुः कुचगावस्य चोंकारौ ॥ ६५

फट् शिरसि ।

कज्जलमलिनं भुवनं घनाघनश्यामलं जिनं पश्यन् ।
ज्वलनदिशि विहितवदनः सायं वज्रासनाश्रितो मन्त्री ॥ ६६

शिशिरे सवितरि वहति ज्वलनं तत्त्वं च कुम्भकविधायी ।
मध्यमया रिं नागैर्जपयुक्...........सं नमति ॥ ६७

योगविदर्भणवेत्ता यन्त्रमिदं मृतककर्पटे लिखति ।
कुङ्कुमकोकिलरक्तैर्हरिद्रया मिश्रितैस्तु शितिकुसुमैः ॥ ६८

पूजयति पार्श्वनाथं प्रसादतस्तस्य सुम... दरिनिवहः ।
क्षयति क्षुयति शीयति निवकृलब्ध्वा (?) ॥ ६९

अमिजातिजातिरस्य क्षयति हि कमलेव हीनपुण्यस्य ।
रोगैर्द्रव्यविनाशैरशुभैर्दुरितैश्च नृपरिपुभिः ॥ ७०

इति मारणयन्त्रं षष्ठम् ॥ ६

भाले क्ष्मीं (क्ष्मीं) ऐं स्कन्धयोः फुः करेऽन्तरे फुः स्वा ।
कटयां ना तुंन्यों ह्रीं पदे ह्रीं प नाभिगस्तस्व ॥ ७१

लिङ्गे पदगो हूंमौं जानुनि हा कटान्तरे टो हि ।
टः पाणावथ कुचयोर्यः क्षः शिरसि स्थिता माया ॥ ७२

इत्थं शशधरसदृशौ भुवनजितो बोधमुद्रया पश्यन् ।
................ नो घनसारैर्यन्त्रमभिलिख्य ॥ ७३

जातीकुसुमैरर्हति शश्वत्स्फटिकाक्षमालया जपति ।
एकाग्रमानसान्तर्निश इति घटिकाचतुष्टये मन्त्री ॥ ७४

स कविर्देवज्ञोऽपि हि वादीन्द्रो मन्त्रतन्त्रनिपुणश्च ।
सर्वकलाकुलसदनं भवति नरोऽवश्यमेवात्र ॥ ७५

इति ज्ञानयन्त्रं सप्तमम् ॥ ७

ह्रीमलके ॐ स्कन्धे ज्जामङ्घ्री भुजान्तरे हि ब्लूँ टेः ।
कट्यां जानुनि ह्रीं पादे फुः नाभिगो भवेद् द्विह्रः ॥ ७६

टो लिङ्गे त्वा पासा हा जानुनि वः कटीतटगतोऽपि ।
एऐ कक्षाकरगौ क्षः फुः कुचयोः शिरसि च प्रणवः ॥ ७७

इत्थं ग्रथनाभिज्ञः स्वस्तिकसंस्थश्च शङ्खमुद्राकृत् ।
पीतध्यानविधिज्ञः शब्दं फडिति प्रयुञ्जानः ॥ ७८

यन्त्रमभिलिख्य कुङ्कुमकोकिलरक्तैर्हरिद्रया युक्तैः ।
अष्टखखचन्द्रकुसुमैः कृष्णैरर्चयति...मध्याह्ने ॥ ७९

ग्रामं नगरं जनपदमरातिमवनीपतिं युवतिजातम् ।
क्षोभयति पार्श्वनाथः सन्ततमित्याग्रहध्यातः ॥ ८०

इति क्षोभयन्त्रं अष्टमम् ।

दिक्कालमुद्रासनवस्तुवर्णप्रभञ्जनादीनथ योगषट्कम् ।
विज्ञाय कल्पाद्रजतादिपट्टे
संलिख्य कर्माणि बुधो विदध्यात् ॥ ८१

अथ प्रस्तावाद् ध्यानविशेषं वच्मि-
जानुयुग्ममतिहेमसमानं रोहिणीरमणभं त्वभिनानि ।
कण्ठमानवदिवाकरकान्तिं कद्रुलानमभिलोलिसरोजम् ॥ ८२

वैनतेयमिव पार्श्वजिनेशं व्याधिविघ्नतिमिरौघदिनेशम् ।
जङ्गमास्थिरगरोत्करनाशमेनमस्मरत हर्षविकाशम् ॥ ८३

उक्तं च -
युक्तं कमलपद्माभ्यां धरणेन्द्रेणेह पद्मया ।
जयाविजयादेवीभ्यां सप्तफणाझरत्सुधम् ॥ ८४

श्वेतं पार्श्वं जिनास्याच्च निर्गत्य प्रविशच्छ्रियम् ।
मुखे ध्यायति यस्तस्य शान्तियुग्लाभतुष्टयः ॥ (यु.) ८५

ध्यानवर्णमिव फणैररुणाभिः सुधां झरन् ।
पार्श्वः स्वास्वरिपौरास्यैर्ध्यातः सम्मोहवश्यकृत् ॥ ८६

अध्यष्टकटिफणाभिर्झरन्तममृतं जिनम् ।
स्वाङ्गे ध्यायति यस्तस्य दिव्यस्तम्भो भवेदिह ॥ ८७

अध्युष्टकोटिफणाभिर्विषाद्यैः करकैर्जिनः ।
वर्षन्निगडबन्धं पुष्पैर्यस्तद्भङ्गहेतवे ॥ ८८

नवलक्षफणाग्रैस्तु श्यामः पार्श्वो विषं झरन् ।
ध्येयः शत्रुशरीरस्य दोषोच्चाटनमारिकृत् ॥ ८९

ध्यातव्यः प्रविगच्छद्भिर्नवलक्षफणाग्रतः ।
विषं वर्षन् जिनश्चौरभूताद्यास्तेषु बन्धकृत् ॥ १०

इति ध्यानविशेषः ।

उत्तप्तकनकमरकतविद्रुमघनचन्द्रबिम्बसङ्काशम् ।
सभार्यमोसावसेव्या द्यहातपत्त्रं प्रभोरुपरि ॥ ११

तद्वितयान्निजदेहं छदितमतितोऽपि सन्ततं ध्यायेत् ।
यः पार्श्वनाथजिनवरपदपङ्कजमधुकरो हि नरः ॥ १२

सप्तविधा डाकिन्यः सदस्यवो हस्तिनो रुजः सिंहाः ।
अरयः किरयो भूमीपतयो रक्षोऽधिपतयश्च ॥ १३

भूतप्रेतपिशाचग्रहमुद्गलखेचराः सवैतालाः
फणिनो दुर्जननिवहास्तमभिद्रोतुं न शक्ताश्च ॥इति प्रभावः। १४

यच्चेतः शंशान्तं करणगणो येन चाथ दंदान्तः ।
तन्तान्तं पुण्यमितो चंचान्तं तेन सिद्धिसुखम् ॥ १५

मन्त्राधिराजजिनपतिचरणाम्बुजसेवनात् सततमेव ।
ज्वरवातसन्निपातश्लेष्माद्याः शामयन्ति गदा : ॥ १६

शाकिन्यो यक्षिण्यः कुष्माण्डिन्यो जलादिवासिन्यः ।
वनवासिन्योऽथ नभोगामिन्योऽरण्यचारिण्यः ॥ १७

रेवत्यः क्षेत्रभवाः ग्रामभवाः शैलकोद्भवाश्चापि ।
जप्ताक्षतकणनिकराज् झटिति
विमुञ्चन्ति देवताः पात्रम् ॥ (यु.) १८

नित्यध्यानविधानाद् विधिना सिद्ध्यन्ति सिद्धयोऽष्टौ हि ।
दहनसमीरणसलिलस्तम्भनमपि चिन्तितः कुरुते ॥ १९

दौर्भाग्योपहतानां सौभाग्यं रोगिणां तथाऽऽरोग्यम् ।
सन्ततिमपपुत्राणां मृतवत्सानां सजीवसन्तितिताम् ॥ १००

विजयार्थिनां तु विजयं धनार्थिनामिह महद् विभवम् ।
जायार्थिनां तु जायां नियोगिनां विज्ञपतिनि योगम् ॥ १०१

निजदेशभ्रष्टानां भूमिपतीनां च भूमिलाभं च ।
विद्यार्थिनां तु विद्यां बहुपुत्रान् पुत्रकाम्यानाम् ॥ १०२

अपदद्विपदचतुःपदजनपदवशतां वशार्थिनां सततम् ।
अभिजातिजने निधनं स्तम्भनमथ मोहनं सुमहत् ॥ १०३

ऋद्धिं बुद्धिं सिद्धिं मतिं गतिं संस्मृतिं जने प्रीतिम् ।
कीर्तिं स्फूर्तिमनर्त्तिं दत्ते वामासुतो ध्यातः ॥(कुलकम्) १०४

इतिभाववर्णनम् ।

मन्त्राधिराज ! जिनराज ! तव प्रसादा-
दासादयन्ति यदिहाभिमतानि भव्याः ।
चित्रं किमत्र सुरमानवसर्पनाथ-
सम्प्रार्थितं निजपदं हि यतो ददाति ॥ १०५

वामेय ! वाक्पतिमतिप्रकरोर्जितोऽपि
को वक्तुमत्रभवतोऽतिशयान् प्रगल्भः ।
यस्य प्रसादलवतोऽप्यचिरात् प्रसूते
वन्ध्या तनूजमपि पश्यति नेत्रहीनः ॥ १०६

देवाधिदेवाङ्घ्रिसरोजसेवाहेवाकमेवाकलयामि तेऽहम् ।
तदस्मि हंसः सुगतिप्रशंसोऽसत्सज्जलक्षीरविवेकमिच्छुः ॥१०७

त्वद्ध्यानसन्धानसुधानिपानपानान्न दीनाऽऽननतां भजन्ते ।
कीनाशसेनां सगदां विजित्य
मृत्युञ्जितो यान्ति शिवालयं ते ॥ १०८

सौभाग्यमारोग्यमवन्ध्यभाग्यं श्रीकीर्तिविस्फूर्तिमनार्तिमन्तः ।
अत्रापि मन्त्रस्मरणाल्लभन्ते सद्यः समुद्यद्वरभक्तिभाजः ॥ १०९

त्वदङ्गसङ्गद्युतियामुनाम्भः स्नानेऽपि गङ्गाजलवद् विशुद्धाः ।
चकासति त्वां समुपासते ये
प्रभो ! प्रभूणां महिमा महीयान् ॥ ११०

सेवा लतावत् फलशालिनी ते सेवा भवाभव्यमयी नयस्व ।
स्तृणाति ते ध्यानसरो विशालं
पिपासिनां संसृतितापहारम् ॥ १११

संसारकान्तारचिरप्रचारनिवारणे कारणमामनन्ति ।
त्वामेकमेवेति नमामि तेऽङ्घ्री
भक्त्या तव भ्रान्तिहरावुदारौ ॥ ११२

श्रीवामेय ! गुणैरमेयमहिमा किं मादृशेनामुना
वाणीगोचरमत्र तत्रभवतः स्वा नीयते ते विभो ! ।
सर्वज्ञ ! स्मरणस्तवार्चननतिध्यानप्रभावोद्यते
मूको जल्पति संशृणोति बधिरः पङ्गुर्नरीनृत्यति ॥ ११३

वन्दे पार्श्वजिनं प्रभावसदनं विश्वत्रयीपावनं
श्रेयोवृक्षवनं नतामरजनं सम्फुल्लपद्मासनम् ।
सिद्धेः संवननं मदद्रुदहनं श्रद्धामयूरीघनं
विघ्नालीशमनं खवाजिदमनं संसारनिर्नाशनम् ॥ ११४

जम्बूद्वीपसरः सरोरुहसमुल्लासाय मानामर-
क्षोणीभृद्धरविष्ठरस्थिरतरं यत्तिष्ठते प्रष्टमम् (विष्टपम् ?) ।
यत्तत्रास्ति भुजङ्गपुङ्गवफणारत्नप्रभाभासुरः
श्रीमत्पार्श्वजिनेश्वरः स्वरसतस्तस्य स्तुतिः प्रस्तुता ॥ ११५

त्रिसन्ध्यं सन्धत्ते मनसि विशदां यः स्तुतिमिमा-
ममानध्यानश्रीप्रणयपरिणद्धप्रणतिभिः ।
श्रियो देवादीनामपि च स समासाद्य विभुतां
धुतान्तःकर्मौघः प्रणयति शिवश्रीप्रणयिताम् ॥ ११६

इति स्तवनम् ।

वज्रासनाद्यासनसंविधानैस्त्वगादिभिर्भेषजसञ्चयैर्वा ।
सीमन्तिनीदर्शनवर्जनाद् वा
प्रणीतभोज्योज्झनतोऽपि योगी ॥ ११७

निद्राजयध्यानविधानतोऽपि ब्रह्मानघं ब्रह्मकृते विदध्यात् ।
समीहितार्थाः प्रभवन्ति यस्माद्
द्रुमा इवाम्भोधरवारिपूरात् ॥ (यु.) ११८

किं चेष्टाभिरिहासनैः किमु तपोजापैस्तु किं सेवया
किं होमेन किमम्बरेण कुसुमैः किं किं सुभोगैरिति ।
एकं सुस्थिरमानसे तु विशदं ब्रह्मव्रतं कारणं
सिद्धीनामिह मन्त्रयन्त्रविधयो मोघा यदेकं विना ॥ ११९

सीमन्तो वनिताशिरःसु पदवी सीमन्तकस्य स्फुटं
बाला व्यालनिभा सुदुर्गतिपदानेतृणि नेत्राण्यपि ।
यासां भ्रूरुरगीव कालकुटिला मोक्षाध्वसंरोधकृद्
यद्देहं मलगेहमेव मनसि ध्यात्वेति नारीं त्यज ॥ १२०

इति ब्रह्मव्रतधारणम् ।

नो दाक्षिण्यवसान्न लोभवशतो नो वा भयात् स्नेहतो
नो कस्मायतिविस्मयार्थजनको मन्त्राधिराजः प्रभुः ।
देयः किन्तु परीक्ष्य मास...षट्कं सुचित्तं नते-
गाम्भीर्यं च कलादिकं च सुगुरुः शिष्याय यत्नादसौ ॥ १२१

मन्त्राधिराजजिनभर्तुरमर्त्यमर्त्य-
नागेन्द्रचन्द्रकमठासुरसेवितस्य ।
प्रत्यङ्गिरादिनवकल्पसहोदरोऽयं
कल्पस्तु पञ्चपटलः सकलार्थदोऽस्तु ॥ १२२

नेत्रानन्दकरस्तमस्ततिहरः सल्लोकपद्माकर-
श्रेणीघस्त्रकरः सुरासुरनरप्रत्यूहभिद् विद्धरः ।
संसारच्छिदुरप्रतापनिकरः सर्वश्रियामाकरः
श्रीमद्भोगिवरश्रितो जिनवरः स स्यात् प्रसादे परः ॥ १२३

शश्वत्श्रीप्रभ ! कर्मवृक्षपटलीनेमिप्रभ ! प्रोल्लस-
च्छान्तिश्रीललितप्रभामलविभाप्रोद्भाव ! देवैर्नत ! ।
श्रीसर्वज्ञ ! सुपुण्यसागरपरिस्फूर्जद्यशश्चन्द्रमः ।
सूरिप्रस्तुत ! सिद्धिबुद्धिसहित ! त्वं देहि मे मङ्गलम् ॥ १२४

## २४. ॥ श्रीचिन्तामणिकल्पसारः ॥

अष्टदलपद्मकोशे श्रीमत्पार्श्वं जिनेश्वरं न्यस्य ।
नागेन्द्रविधृतछत्रं प्रियङ्गुपत्रावदाताङ्गम् ॥ १

विजयाजयात्तचमरं वैरोट्यावन्दितं विगतमोहम् ।
सत्प्रातिहार्यकलितं देवीपद्मावतीपूज्यम् ॥ २

श्रीपार्श्वयक्षसकलत्रसंस्तुतं चाष्टनागकुलकलितम् ।
विद्यादेवीषोडशपरिकरितं ध्याययेद् देवम् ॥ ३

प्रणवं न्यस्य ललाटे जिनस्य गोक्षीरचन्द्रकरतुल्यम् ।
मायाबीजं हृदये ध्येयं तरुणार्कबिम्बनिभम् ॥ ४

हरिकान्ताया बीजं काञ्चनवर्णं निधाय पदकमले ।
अर्हमिति देवबीजं ध्येयं शिष्यैर्गुरोर्वचसा ॥ ५

शान्तिकपौष्टिकहेतोः श्वेतं ध्यायेच्छशाङ्ककरकल्पम् ।
पीतं स्तम्भादिविधौ वश्याकृष्टौ तथा रक्तम् ॥ ६

धूम्राभमथोच्चाटे कृष्णाभं मारणं विनिर्दिष्टम् ।
मोक्षार्थं व्योमाभं ध्येयं श्रीपार्श्वनाथजिनम् ॥ ७

यो योगी श्रावकः साधुः शुक्लध्यानपरायणः ।
ध्यायति श्रीजिनं देवं वामेयं भुजगावृतम् ॥ ८

भूतप्रेतपिशाचाद्यो नालम्भूष्णुस्तदग्रतः ।
नित्यावेलाकृतो रात्रिस्तथैकान्तरस्यन्तरः (?) ॥ ९

त्रि-चतुर्थ-पक्ष-मास-षण्मास-व्यन्तरादिकाः ।
ज्वराः सर्वेऽपि नश्यन्ति वातपित्तकफोद्भवाः ॥ १०

डाकिनी शाकिनी चण्डी याकिनी राकिनी तथा ।
लाकिनी नाकिनी सिद्धा सप्तधा शाकिनी स्मृता ॥ ११

एतेषां खलु ये दोषास्ते सर्वे यान्ति दूरतः ।
चिन्तामणिसुचक्रस्थपार्श्वनाथप्रसादतः ॥ १२

विलिख्य काञ्चनस्थाले श्रीखण्डेन घनेन च ।
चिन्तामणिमहच्चक्रं दर्भमूलेन योगिना ॥ १३

लिखनीयमिदं चक्रं गन्धधूपादिपूजितम् ।
जातिपुष्पसहस्रेण मूलमन्त्रेण पूजितम् ॥ १४

प्रक्षाल्याथ च दुग्धेन वारिणा वा प्रयत्नतः ।
ज्वरदोषादिभिर्ग्रस्तं पात्रं पातव्यमेव हि ॥ १५

एवं सप्तदिनान्याशु पुष्पजाप्यपुरस्सरम् ।
पीतं हि रोगदोषादीन् विनाशयति निश्चितम् ॥ १६

कार्मणं याति दूरेण यन्मध्यात् केनचित् कृतम् ।
यन्त्रपानप्रयोगेण देहिनां नात्र संशयः ॥ १७

रक्तकणवीरपुष्पैर्द्वादशसङ्ख्यैः सहस्रसञ्जप्तम् ।
वश्याकर्षणकार्यं करोति मन्त्राधिराजोऽयम् ॥ १८

स्तम्भयति शत्रुवाचं पीतध्यानेन पीतपुष्पौघैः ।
ईतिस्तम्भं करोति विधिना वरवालुकां जप्त्वा ॥ १९

अनवच्छिन्ना रेखा देया क्षेत्रेषु मूलमन्त्रेण ।
नाशयति शलभवृन्दं गुरूपदेशेन सञ्जप्तम् ॥ २०

श्मशानकर्पटे खलु श्मशानाङ्गारराजिका च विषैः ।
धत्तूरकरसलिखितं परिजप्तं काहलीपुष्पैः ॥ २१

उच्चाटयति महेश्वरध्वजातिबद्धं समस्तशत्रुगणम् ।
मारयति चिताङ्गारैः परिजप्तं नास्ति सन्देहः ॥ २२

इति सङ्क्षेपेण मया कथितं चिन्तामणेः फलं सारम् ।
विस्तरतो विज्ञेयं बृहदुद्धारान्महामतिभिः ॥ २३

इत्येवं तीर्थनाथप्रवरगुणगणं पार्श्वनाथस्य सम्यक्
चक्रं चिन्तामणिर्यः स्मरति विधिपरो भावशुद्धिस्त्रिसन्ध्यम् ।
सम्प्राप्नोत्याशु राज्यं त्रिदशपतिपदं तीर्थपत्वं च सिद्धिं
का वार्ताऽशेषसिद्धिप्रदभुवनपतेः पादपद्मप्रसादात् ॥ २४

## २५. ॥ श्रीमन्त्राधिराजस्तोत्रम् ॥

(इन्द्रवज्रा)

मन्त्राधिराजाक्षरवर्णयुक्तिस्तेषां जिनाङ्गेषु निवेश्य भङ्गीम् ।
वक्ष्ये यथावत्प्रथमं च तत्र, ॐ मक्षरं नीलरुचिं ललाटे ॥ १

ॐ दक्षिणांशे पुनरेव शोणं, वामांसके ह्रौंभज पञ्चवर्णम् ।
सिन्दूरभं ह्रौंस्मर वामहस्ते, ह्रौं धूम्रवर्ण भण वामकुक्षौ ॥ २

ह्रः कृष्णवर्णं कटिवामदेशे, यः सव्यजानुस्थिति धूम्रवर्णं ।
क्षः पीतभं पादतले च वामे, ह्रौं पञ्चवर्णं पुनरेव नाभौ ॥ ३

फु धूम्रवर्णं कथयति गुह्ये, ट् व्यजनं पादतलेऽपसव्ये ।
फु दक्षिणे जानुनि धूम्रवर्णं, ट् दक्षिणायां च कटी च कृष्णं ॥४

स्वाः कृष्णभं दक्षिणकुक्षि लक्ष्यं, हा दक्षिणे हस्ततले विनीलम्।
ए स्फाटिकं दक्षिणवक्षसोंऽशे, ए वामवक्षो जगतं सितां शुं ॥५

(गद्यं) - इति सप्तदशाक्षराणि साक्षादिव च निवेश्य पुरःस्थ जिनस्य मूर्त्तौ ध्यायति विजयाजयासमं यः स भवति नित्यवशीकृताष्टसिद्धिः

इह हि भवति तुष्टो यस्य मन्त्राधिराजः,
स भवति भुवि विद्वान् खेचरश्चक्रवर्ती,
सदतिशय समृद्धिः सर्व कल्याणसिद्धि-
र्धृतिमतिरतिकीर्ति श्रीपति धौतकीर्त्तिः

## २६. ॥ श्रीमन्त्राधिराजस्तोत्रम् ॥

सर्वातिशयसम्पूर्णान् ध्यात्वा सर्वजिनाधिपान् ।
पञ्चवर्णान् पञ्चरूपविषयद्रुमकुञ्जरान् ॥ १

चतुर्गात्राँश्चतुर्वक्त्राँश्चतुर्विंशतिसञ्ज्ञितान् ।
जैनीं सर्वाङ्गेषु रक्षां कुर्वे दुःखौघनाशिनीम् ॥ २

शिरो मे वृषभः पातु भालं श्रीअजितः प्रभुः ।
पातां मे श्रीजिनौ नेत्रे शम्भवश्चाभिनन्दनः ॥ ३

सुमतिः सुसीमजन्मा च श्रवणौ मम रक्षताम् ।
सुपार्श्वो रक्षतु घ्राणं मुखं चन्द्रप्रभः प्रभुः ॥ ४

रसनां सुविधिः पातु कण्ठं श्रीशीतलो जिनः ।
स्कन्धं श्रेयांसः श्रीवासुपूज्यश्च विमलो भुजौ ॥ ५

अनन्तश्रीधर्मनाथौ पातां मे करपल्लवौ ।
शान्तिर्मे हृदयं रक्षेन्मध्यं नाभिं च कुन्थ्वरौ ॥ ६

मल्लिः कटी सक्थिनीं (?) च रक्षतान्मुनिसुव्रतः ।
नमिर्जानुद्वयं पायान्नेमिर्जङ्घाद्वयं पुनः ॥ ७

श्रीपार्श्वो वर्द्धमानश्च रक्षतान्मे पदद्वयम् ।
चतुर्विंशतिरूपोऽव्यादर्हन्मे सकलं वपुः ॥ ८

एतां जिनबलोपेतां रक्षां यः सुकृतो पठेत् ।
स चिरायुः सुखी पुत्री निर्व्याधिर्विजयी भवेत् ॥ ९

पातालभूतलव्योमचारिणश्छद्मकारिणः ।
न द्रष्टुमपि शक्तास्तं रक्षितं जिननामभिः ॥ १०

जिनेति जिनभद्रेति जिनचन्द्रेति वा स्मरन् ।
नरो न लुप्यते पापैर्भुक्तिं मुक्तिं च विन्दते ॥ ११

जगज्जैत्रैकमन्त्रेण जिननाम्नैव रक्षितम् ।
लिखित्वा धारयेद् यस्तु करस्थाः सर्वसिद्धयः ॥ १२

वज्रपञ्जरनामेदं यो जैनकवचं पठेत् ।
अव्याहताङ्गः सर्वत्र लभते जयमङ्गलम् ॥ १३

ललाटे दक्षिणस्कन्धे वामस्कन्धे करेऽपि च ।
वामकक्षौ वामकट्यां जानौ पदतलेऽपि च ॥ १४

नाभौ गुह्ये दक्षिणांह्रि–तले दक्षिणजानुके ।
कटी कक्षे हस्ततले स्तनेषु दक्षिणेषु च ॥ १५

वामस्तने चेति मन्त्रवर्णान् सप्तदश स्मरेत् ।
ॐ ह्रीँ श्रीँ प्रमुखास्तस्य स्युर्मनीषितसिद्धयः । ॥ १६

यश्चैनां दृष्टवान् स्वप्ने जैनरक्षामिह प्रभुः ।
जिनेन्द्राख्यो गुरुः प्रातः प्रबुद्धस्तां तथाऽलिखत् ॥ १७

ॐ ॐ ह्राँ ह्रीँ ह्रूँ ह्रैँ ह्रौँ ह्रँ ह्रः यः क्षः फुट् स्वाहा ए ऐ ॥
अस्य स्तोत्रस्य मन्त्रम् ।

मन्त्राधिराजाक्षरवर्णयुक्तं तेषां जिनाङ्गेषु निवेशिताङ्गी (?) ।
वक्ष्ये यथा तत् प्रथमं च तत्र ॐक्षरं नीलरुचिं ललाटे ॥ १८

ॐ दक्षिणाङ्गे पुनरेव शोणं वामांसकं ह्रां भज पञ्चवर्णम् ।
सिन्दूरभं ह्रीँ स्मर वामहस्ते ह्रूँ धूम्रवर्णं भण वामकुक्षौ ॥ १९

ह्रूँः कृष्णवर्णं कटिवामदेशे यः सव्यजानुस्थितधूम्रवर्णम् ।
क्षं पीतभं पादतले च वामे ह्रीः पञ्चवर्णं पुनरेव नाभौ ॥ २०

ह्रूँः धूम्रवर्णं कथयन्ति गुह्ये फट्व्यञ्जनं पादतलेऽपसव्यः ।
फूः दक्षिणे जानुनि धूम्रवर्णं ह्रः
दक्षिणायां च कटौ नु कृष्णम् ॥ २१

स्वा कृष्णभं दक्षिणकुक्षिलक्षं हा दक्षिणे हस्ततले विनीलम् ।
ए स्फाटिकं दक्षिणवक्षसोऽन्ते ऐ वामवक्षोऽन्तगतं सितांशु ॥२२

इति दशाक्षराणि साक्षान्निवेश्य पुरस्तु जैनमूर्तौ ।
ध्यायति विजया जया स भवति नित्यं वशीकृतार्थसिद्धिः ॥२३

इह हि भवति तुष्टो यस्य मन्त्राधिराजः
स भवति भुवि विद्वान् खेचरश्चक्रवर्ती ।
सदतिशयसमृद्धः सर्वकल्याणतुष्टो
धृतिरतिमतिकीर्तिश्रीपतिध्येयसत्त्वम् ॥ २४

## २७. ॥ श्रीसूरिमन्त्रस्तोत्रम् ॥

चतुर्दश्यामथाष्टम्यां कृतोपवासो जपेद् गुरुः ।
अष्टोत्तरसहस्रं स सूरिः स्यान्महिमास्पदम् ॥ १

श्रीपतिर्नृपसन्मानपात्रं च यशसां पदम् ।
अजेयः शत्रुभिः स स्यान्निर्विघ्नो दोषवर्जितः ॥ २

सकलं मूलमन्त्रं तु प्रतिवर्षं दीपपर्वणि ।
कृतोपवासो जपेन्नित्यं सहस्रमष्टभिर्युतम् ॥ ३

क्षीरान्नभोजनं प्रातः कुरुते पारणे कृती ।
तद् वर्षं लाभ-सन्मानकारितैर्याति निश्चितम् ॥ ४

स्नात्रदुग्धं कथञ्चिच्च भोगं नैवेद्यसंयुतम् ।
सनालिकेर-ताम्बूलं या पिबेल्लभतेऽङ्गजम् ॥ ५

प्रतिवर्षं सकलं मन्त्रं सहस्रमष्टभिर्युतम् ।
शतपत्री सुमाम्भोजैर्यो जपेद् वाञ्छिताप्तये ॥ ६

मेरुमन्त्रं समालिख्य सुरभिद्रव्यसञ्चयैः ।
शुभे दिनेऽथ विधिना सा रक्षा विघ्नहारिणी ॥ ७

तुष्टि-पुष्टिकरः प्रौढप्रसादमहिमप्रभः ।
मेरुमन्त्रोऽस्य माहात्म्यं जगत्त्रितयमोहनम् ॥ ८

लक्षैर्यो जपेदेनमेक-त्रि-पञ्च-सप्तभिः ।
सकलं गौतमं मन्त्रं महासिद्धिकरं भवेत् ॥ ९

षट्कर्मकृज्जयश्रीद आकृष्टि-सुखकृत् सदा ।
ऐहिकार्थप्रदः स्वर्ग-मोक्षसौख्यकरस्त्वयम् ॥ १०

आदेशं सूरये दत्ते शुभो वाऽप्यशुभः पुनः ।
चिन्तारत्नप्रभः सप्तमेरुमन्त्रो जिनैः स्मृतः ॥ ११

प्रणवं मायाबीजं (च) श्रीपदं मेरुसञ्ज्ञकम् ।
इरि किरि गिरि पिरि सिरि हिरि आयरियं ॥ १२

वर्णत्रयादत उर्ध्वं गिरिमेरु नमस्ततः ।
'स्वाहा'शब्दं प्रयुञ्जीत सप्तमेरुप्रभावजुट्(युक्) ॥ १३

अष्टम्यां च चतुर्दश्यां कृतोपवासः स्मरेद् यतिः ।
आदेशाय महाविद्या महिम्ने वाञ्छिताय च ॥ १४

ॐ इरिइरिकालीति सच्चक्रमुद्रया तथा ।
क्षयाय कृष्णध्यानेन मासं यावत् प्रयुज्यते ॥ १५

ॐ इरि किरि गिरि पिरि सिरि हिरि आचार्यपदमन्त्रराजस्य ।
कुर्याज्जापं त्रिलक्षं च गौतमः स भवेद् गुरुः ॥ १६

अष्टोत्तरसहस्त्रं तु दीपोत्सवे जपः कृतः ।
तैः पुष्पैरक्षतैस्तैश्च चूर्णं वश्याय जायते ॥ १७

अष्टम्याञ्च चतुर्दश्यां मेरुमन्त्रं जपेद् गुरुः ।
अष्टोत्तरसहस्त्रं यो लभते स समीहितम् ॥ १८

अलोभो जितपञ्चाक्षः सच्छीलो नय-सत्यवाक् ।
शुचिश्च विहितस्नानो मन्त्रराजं स्मरेत् कृती ॥ १९

मौनेन सततं भुङ्क्ते कायोत्सर्गेण यः स्मरेत् ।
तं स्तुवन्ति सुराः सर्वे वक्तुमेतस्य कः क्षमः ॥ २०

## २८. ॥ श्रीशान्त्युद्घोषणास्तोत्रम् ॥

(अनुष्टुप्)

रोगशोकादिभिर्दोषै-रजिताय जितारये ।
नमः श्रीशान्तये तस्मै, विहितानन्तशान्तये ॥ १

श्रीशान्तिजिनभक्ताय, भव्याय सुखसम्पदम् ।
श्रीशान्तिदेवता देया-दशान्तिमपनीयते (मे)॥ २

अम्बा निहित डिम्भा मे, सिद्धबुद्धसम(सुता)न्विता ।
सिते सिंहे स्थिता गौरी, वितनोतु समीहितम् ॥ ३

धराधिपति पत्नी या, देवी पद्मावती सदा ।
क्षुद्रोपद्रवतः सा मां, पातु फुल्लत्फणावली ॥ ४

चञ्चच्चक्रधरा चारु, प्रवालदलदिधितिः ।
चिरं चक्रेश्वरी देवी, नन्दतादवताच्च माम् ॥ ५

खड्गखेटककोदण्ड-बाणपाणिस्तडिद्ग(द्यु)तिः ।
तुरङ्गगमनाच्छुप्ता, कल्याणानि करोतु मे ॥ ६

मथुरायां सपार्श्वश्री-सुपार्श्वस्तुपरक्षिका ।
श्रीकुबेरा नरारूढा, सुताङ्कावतु वो भयात् ॥ ७

ब्रह्मशान्तिः स मां पाया-दपायाद् वीर-सेवकः ।
श्रीमद् सत्यपुरे सत्या, येन कीर्तिः कृता निजा ॥ ८

श्रीशक्रप्रमुखा यक्षा, जिनशासनसंस्थिताः ।
देवदेव्यस्तदन्येपि, सङ्घं रक्षन्त्वपायतः ॥ ९

श्रीमान्(मद्)-विमानमारूढा, यक्षमातङ्गसङ्गता ।
सा मां सिद्धायिका पातु, चक्रचापेषु धारिणौ ॥ १०

## २९. ॥ श्री जैनरक्षास्तोत्रम् ॥

(अनुष्टुप्)

श्रीजिनं भक्तितो नत्वा, त्रैलोक्याह्लादकारिकाम् ।
जैनरक्षामहं वक्ष्ये, देहिनां देहरक्षिकाम् ॥ १

ॐ ह्रीँ आदीश्वरः पातु, शिरसि सर्वदा मम ।
एँ ह्रीँ श्रीँ अजितो देवः, भालं रक्षतु शर्मदः ॥ २

नेत्रयो रक्षको भूयाद्, ॐ आँ क्रौँ संभवो जिनः ।
रक्षेद् घ्राणेन्द्रिये ॐ श्रीँ, क्लीँ ब्लूँ श्रीअभिनन्दन ॥ ३

सजिह्वे समुखे पातु, सुमतिः प्रणवान्वितः ।
कर्णयोः पातु ॐ ह्रीँ श्रीँ, पृक्तः पद्मप्रभः प्रभुः ॥ ४

सुपार्श्वः सप्तमः पातु, ग्रीवायां ह्रीँ श्रियान्वितः ।
पातु चन्द्रप्रभः श्रीँ ह्रीँ, क्रौँ पूर्वं स्कन्धयोर्मम ॥ ५

सुविधिशीतलौ नाथौ, रक्षकौ करपङ्कजे ।
ॐ क्षाँ क्षीँ क्षूँ धुतौ कामं, चिदानन्दमयौ शुभौ ॥ ६

श्रेयांसवासुपूज्यौ मे, हृदयं सदयं यथा ।
भूयाद् रक्षाकरौ वारं, सारं श्री प्रणवान्वितौ ॥ ७

विमलाऽनन्तनाथौ च, मायाबीजसमन्वितौ ।
उदरे सुन्दरे सद्यो, रक्षायाः कारकौ मतौ ॥ ८

श्रीधर्मशान्तिनामानौ, नाभिपङ्केरुहासने ।
ॐ ह्रीँ श्रीँ क्लीँ ह्रः संयुक्तौ, पुण्यं पातां पुनः पुनः ॥ ९

श्रीकुन्थुअरनाथौ तु, सगुह्ये सकटीतटे ।
भवेतामवकौ भूरि, ॐ ह्रीँ क्लीँ सहितौ जिनौ ॥ १०

मे पातां चारुजङ्घायां, श्री मल्लिमुनिसुव्रतौ ।
ॐ ह्राँ ह्रीँ ह्रूँ ततो ह्रः ब्लूँ क्लीँ श्रीँ युक्तौ कृपापरौ ॥ ११

सयत्नरक्षकौ जानू, श्रीनमिनेमिनायकौ ।
राजराजीमती मुक्तौ, प्रणवाक्षरपूर्वकौ ॥ १२

श्री पार्श्वश्रीमहावीरौ, पातामंह्रौ सुसातदौ ।
ॐ ह्रीँ श्रीँ च तथा भूँक्लीँ, ह्राँ ह्रः श्रीँ श्रँः युतौ जिनौ ॥१३

रक्षाकरा यथास्थानं, भवन्तु जिननायकाः ।
कर्मक्षयकरा ध्यातां, भीतानां भयवारकाः ॥ १४

जैनरक्षां लिखित्वेमां, मस्तके यस्तु धारयेत्,
रविवद् दीप्यते लोके, श्रीमान् विश्वप्रियो भवेत् ॥ १५

तस्योग्ररोगवेतालशाकिनी भूतराक्षसाः ।
एते दोषा न दश्यन्ते, रक्षकाश्च भवन्त्यमी ॥ १६

जैनरक्षामिमां भक्त्या, प्रातरुत्थाय यः पठेत् ।
इप्सितान् लभते कामान्, संपदश्च पदे पदे ॥ १७

पू. गणिवर्यश्री आगममण्डनविजयविरचितम्

## ३०. ॥ श्रीह्रीँकारवर्णनस्तवनम् ॥

(शार्दूलविक्रीडित)

पद्मोद्बोधविधात्म(य) कात्मधवलध्यानोदयः सर्वतः
शुष्यद्दुःखदविघ्नपङ्कनिकरः सच्चक्रहर्षप्रदः ।
आत्मीयप्रकटप्रभावकिरणव्याधूतताम्यत्र भो,
ह्रीँकारस्तरणिस्तनोतु सततोद्योतं सतां चिन्मयम् ॥ १

एनः सा तु विभेदभग्नरदनः कुम्भानुकारोन्नुता-
ऽनुस्वारः पृथुपुष्टिरप्रतिमहत्पृष्टप्रदेशेंसलः ।
द्वैतीयीकगुरुस्वरायतकरः खण्डेन्दुरेखाङ्कुशो,
वंशारूढविशिष्टषड्जिनमहामात्रोऽतिमात्रोन्नतः ॥ २

उक्तिक्रोडगतद्विरष्टपरमेष्ठ्यष्टापदीयस्फुरद्-
घण्टः पादनिलीनरेफनिगुडः पद्माप्रतिष्ठावधिः ।
मायाबीजकरी दुरन्तदुरितव्रातद्रुमोन्मूलके,
ध्यानाधीनधियां तनोतु सुधियां प्रत्यूहवैरिक्षयम् ॥ (यु.) ३

ॐकारादिनमोऽन्तमन्त्रजगदन्तःस्थः कलाचूलिको-
ऽनुस्वारविहारहारिशिखरो द्वेधा सुवर्णात्मकः ।
अन्त्योपान्त्यशिरस्त्रिरेखविपिनश्रेणीत्रयः सर्वविद्-
देवानां सदनं हराक्षरसुरक्ष्माभृच्चिरं नन्दतु ॥ ४

हस्ताभ्यामिह शाखिताः कुसुमिताः कामाङ्कुशादर्शकै-
र्भूषाभिश्च विभूषिताः किसलिता दीर्घाङ्गुलीभिर्भृशम् ।
यत्र स्वःपतिपादपन्ति सपदि द्विर्द्वादश श्रीजिनाः,
ह्रीँकारा...रनन्दनं तदुदितच्छाया सुखायाऽस्तु वः ॥ ५

भव्यप्राणिसमीहितार्थपटलीसम्पादनप्रत्यलाः,
सर्वे सार्वप[सा]र्वदिव्यमणयस्तिष्ठन्ति यस्यान्तरे ।
चञ्चच्चन्द्रकलोर्ध्वभूम्यधिगतानुस्वारश्रृङ्गं दधि,
ह्रीँकाराकृतिरोहणक्षितिधरो दद्यात् सरत्नानि वः ॥ ६

नीलः शीर्षगलभरायभुग्जग व्यापादनव्यापृतः,
प्रेङ्खत्कालिमबिन्दुचन्द्रकलभोपेतः सदीर्घस्वरः ।
यः शोभाञ्चितपञ्चवर्णरुचिरो धत्ते मयूरश्रियं,
मायाबीजमयः स खेलतु हृदुद्यानेषु वर्णः सताम् ॥ ७

यः कायांह्रिषु शातकुम्भकपिशः शीर्षाश्रितेकारयो-
र्दूर्वानीलरुचिर्न चार्ककिरणरक्तश्च नादेद्भुते ।

बिन्दौ व्योमशितिः कलाधरकलासत्कः कलायामिति
स्याद्वादं प्रतिपादयन्नवतु वो ह्रीँकारवर्णो गुरुः ॥ ८

भूतोद्भाविभवज्जगज्जनजरां ह्रींकारवर्णोसितुम्,
सन्नादोंष्ठनिकोर्ध्वबिन्दुगकलापीयूषकुम्भोदधिः ।
तद्भारद्विवटीभवत्कटिरिवेकारैकयष्टेरव-
ष्टम्भात्तिष्ठति कष्टमुत्तमनरः सत्यं परार्थोद्यमः ॥ ९

स्वान्तस्थापितसर्वसार्वनिवहः संन्यस्तसर्वाशुभ-
व्यापारः स्थविरत्ववक्रवलितश्चेकारदण्डं दधन् ।
यो रेखात्रययोगपट्टमुररीकृत्यौपतिष्ठत्यलं,
दद्यात् सिद्धिमसौ स सौष्ठवकलो ह्रीँकारयोगीश्वरः ॥ १०

यत्रेकारखलीनलीनवदनेऽध्यारुह्य सद्योगिनां,
स्वान्तोद्यानवनान्तरे शशिकलापर्याणचर्याकृतौ ।
उच्चैः खेलति बिन्दुरूपपरमब्रह्माश्वचारः स वो,
मायाबीजहयः कुकर्मविजये भूयात्सहायः सदा ॥ ११

ख...गोयमतुर्यकस्वरधरोऽनुस्वाररूपं जटा-
जूटं मूर्ध्नि कलाकलाधरकलं बिभ्रन् शिवोल्लासकः ।
सर्वाभीष्टसुखप्रदः सुरसुरासंसेव्यमानोनिश !,
श्रीह्रीँकारहरस्त्रिपातकपुरक्षेप्ता तनोतु श्रियम् ॥ १२

ह्रींकारोऽस्ति तृणोटजस्तदुदरे सार्वावली जानकी,
रेखास्तत्परितश्च रामविहिताऽऽज्ञादानरूपाः किमु ।
तस्योर्ध्वं चतुरङ्गलाञ्छनकलालीलाविमानवरा-
नुस्वारो दशकन्धरस्तदुपरित्वात्तिष्ठतीवोन्नता ॥ १३

वज्ञा(ज्रा) गारमकारि धूर्त्तविधिना ह्रौँकाररूपं कलि,
स्तेनातङ्कवशाज्जिनार्थकलशस्तस्योदरे न्यस्य च ।
बिन्दुशेखरिकश्च तस्य परितो रेखाश्च तिस्रः कृता,
वप्रास्तिष्ठति तत्पुरो तु सततं क्रोङ्कारसत्क्रोन्तिकः ॥ १४

कुर्वाणं वृषभासनं वसुमिताः सिद्धीर्ददानं सतां,
कण्ठेकालमहीनसन्निगरणं सोमादिमन्त्रप्रथम् ।
नाम्ना चापि हराक्षराङ्गमितियंश्कत्वेव नादछला-
दद्र्धेन्दुः समुपास्ति सोऽस्तु भवतां ह्रौँकारवर्णः श्रिये ॥ १५

योगीन्द्राङ्गनणस्यगद् करगलद्वाग्निर्जरार्चिर्भवो,
ह्रौँकाराक्षरपाठपाटवसरित्पूरोधकारस्करान् ।
निःसंस्कारमयास्य याति परमज्योतिः समुद्रं चयः,
सोन्तः कर्ममलान्तमत्र भवतान्तंतन्यतामेपयः ॥ १६

धन्यास्ते कृतिनो यदीयहृदयावासेषु नक्तं दिवा,
शीर्षे वक्षसि पादयोश्च विधृतार्हद् [तू]प्रदीपव्रजः ।
अन्तर्निश्चलमुक्तबिन्दुसुलिकामिन्दोः कलामल्लिकां,
बिभ्रन् मूर्द्धनि नृत्यति प्रतिकलं ह्रौँकारशैभूषकः ॥ १७

अन्त्योपि प्रथमो हकार भवसि त्वं व्यञ्जने रेफ हे,
त्वं सत्योसि कटारमल्लविरुदीकारासि[करोषि]सत्यो गुरु ।
बिन्दो त्वं समवर्णशीर्षवसतिः स्थाने भवद्भिर्यतो,
मायाबीजमुरुप्रभावसदनं सम्भूय सम्भाष्यते ॥ १८

लक्ष्मीसागरवार्यमेयमहिमावासो यमेवं स्तुतो,
नित्यादित्यगुणेन [व]र्यनयकृद्योगीन्द्रहृद्व्योमनि ।

स्वर्णाच्च द्विपरत्नमण्डनमुखाभीष्टार्पणस्वस्तरु-
र्येणानामधिपस्तनोतु भवतां ह्रींकारवर्णः श्रियम् ॥ १९

## ३१. ॥ श्री मायाबीजरहस्यस्तोत्रम् ॥

(अनुष्टुप्)

श्वेतं रक्तं तथा पीतं, नीलं ध्यानं चतुर्विधम् ।
विधिना ध्यायमानं च, फलं भवति नान्यथा ॥ १

श्वेते मुक्तिर्भवेत् पुंसो, रक्ते वश्यं परं स्मृतम् ।
पीते लक्ष्मीर्भवत्येव, नीले च शत्रुमारणम् ॥ २

मन्त्राः सहस्रशःसन्ति, शिवशक्तिनिवेदिताः ।
अन्यथा ते च विज्ञेया, मायाबीजाग्रतो यथा ॥ ३

लक्षसंख्ये कृते जापे, दशांशेन तु होमयेत् ।
